विनियोग:—ओं अस्य श्री कार्तवीर्यार्जुन मन्त्रस्य दत्तात्रेय ऋषि: अनुष्टुप् छन्द: ओं वीजं नम: शक्ति: ममाभीष्ट सिद्धये जपे विनियोग: ॥



कार्तवीर्यपूजनयन्त्र

हृदयादि न्यास:—ओं आं फ्रों व्रीं हृदयाय नम: । ओं ईं क्लीं भ्रूं शिरसे स्वाहा । ओं हूं शिखायै वषट् । ओं क्रैं श्रैं कवचाय हुम् । ओं हुंफट् अस्त्राय फट् ।।

वर्णन्यास:—ओं फ्रों ओं हृदये । ओं व्रीं ओं जठरे । ओं क्लीं ओं नाभौ । ओं भ्रूं ओं जठरे । ओं आं ओं गुह्ये । ओं ह्लीं ओं दक्षपादे । ओं क्रौं ओं वामपादे । ओं श्रीं ओं ऊर्वो: । ओं हुं ओं जानुनो: । ओं फट् ओं जंघयो: । ओं कां मस्तके । ओं तं ललाटे । ओं वीं भ्रुवो: । ओं यां कर्णयो: । ओं जुं नेत्रयो: । ओं नां नासिकायाम् । ओं यं मुखे । ओं नं गले । ओं म: स्कन्धे ।

ध्यानम्—उद्यत् सूर्य सहस्र कान्तिरखिल क्षोणी धवै: वन्दितौ ।
हस्तानां शतपंचकेन च दधच्चापानिषूँस्तावता ।।
कण्ठे हाटकमालया परिवृतश्चक्रावतारोहरे: ।
पायात् स्यन्दन गोरुणाभ वसन: श्री कार्तवीर्यो नृप: ।

मन्त्र:—ओं फ्रों व्रीं क्लीं भ्रूं आं ह्रीं क्रों श्रीं हुम् फट् कार्तवीर्यार्जुनाय नम: ।।

जपसंख्या—हवन-पूजन=इस मन्त्र का एक लाख जप करना चाहिए । चावल की खीर में तिल मिलाकर दशांश हवन करना चाहिए । तथा वैष्णवी पीठ पर इसका पूजन करना चाहिए ।

कार्तवीर्य का ध्यान करके मानसोपचार से यन्त्र का पूजन कर अर्घ विधिवत् स्थापन कर सामान्य पूजा पद्धति के अनुसार पीठ पूजन करे ।

ओं आधार शक्तये नम: । ओं प्रकृतये नम: । ओं कूर्माय नम: । ओं ह्रीं ज्ञानात्मने नम: । ओं शेषाय नम: । ओं पृथिव्यै नम: । ओं क्षीर समुद्राय नम: । ओं श्वेत द्वीपाय नम: । ओं मणिमण्डपाय नम: । ओं कल्पवृक्षाय नम: । ओं मणिवेदकाय नम: । ओं रत्नसिंहासनाय नम: ।

इसके बाद आठ दिशाओं में तथा मध्य में वैष्णवी पीठ की शक्तियों का पूजन करे ।

ओं विमलायै नम: पूर्वे । ओं उत्कर्षिण्यै नम: आग्नेये ।

ओं ज्ञानायै नम: दक्षिणे । ओं शिवायै नम: नैर्ऋत्ये ।

ऊँ भोगायै नमः पश्चिमे। ऊँ प्राज्ञ्यै नमः वायव्ये।
ऊँ सत्यायै नमः उत्तरे। ऊँ ईशानायै नमः ऐशान्ये।
ऊँ अनुग्रहायै नमः मध्ये।

इससे आवरण पूजा करे

7. कार्तवीर्य स्तोत्रम्

ऊँ कार्तवीर्यः खलद्वेषी कृतवीर्य सुतो वली ।
सहस्रवाहु शत्रुघ्नो रक्तवासो धनुर्धरः ॥1॥
रक्त गन्धो रक्तमाल्यो राजा स्मतु रभीष्टदः ।
द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत ॥2॥
सम्पदस्तस्य जायन्ते जनाः सर्वे वशंगताः ।
राजानो दासतां यान्ति रिपवो वश्यतां गताः ॥3॥
आनत्याशु दूरस्थं क्षेमलाभयुत प्रियम् ।
सर्वसिद्धिप्रदं स्तोत्रं जप्तृणां सर्वकामदम् ॥4॥
कार्तवीर्य महावीर्य सर्वशत्रु विनाशन ।
सर्वत्र सर्वदा तिष्ठ दुष्टान् नाशाय पाहि माम् ॥5॥
उत्तिष्ठ दुष्ट दमन सप्तद्वीपैक पालक ।
त्वामेव शरणं प्राप्तं सर्वतो रक्ष रक्ष माम् ॥6॥
दुष्टघ्न किं त्वं स्वपिषि किं तिष्ठसि किं चिरायसि ।
पाहि नः सर्वदा सर्वभयेभ्यः स्वसुतानिव ॥7॥
मतिभंगः स्वरो हीनः शत्रूणां मुखभंजनम् ।
रिपूणां च सदैवास्तु सभायां मे जयं कुरु ॥8॥
यस्य स्मरण मात्रेण सर्व दुःख क्षयो भवेत ।
तं नमामि महावीरमर्जुनं कृतवीर्यजम् ॥9॥
हैहयाधिपतेः स्तोत्रं सहस्रावृत्तिकं कृतम् ।
वाञ्छितार्थप्रदं नृणां शूद्राद्यैर्नः श्रुतं यदि ॥10॥

ऊँ कार्तवीर्याय नमः, खलद्वेषिणे नमः, कृतवीर्यसुताय नमः, वल्मिने नमः, सहस्रवाहवे नमः, शत्रुघ्नाय नमः, रक्तवाससे नमः। धनुर्धराय नमः, रक्तगन्धाय नमः, रक्तमाल्याय नमः। राज्ञेनमः।

8. कार्तवीर्य मन्त्र की दूसरी विधि

ओं अस्य श्री कार्तवीर्याजुन मन्त्रस्य दत्तात्रेय ऋषिरनुष्टुप् छन्दः श्री कार्तवीर्यार्जुनो देवता फ्रों वीजं ह्रीं शक्तिः क्लीं कीलकं ममाभीष्ट सिद्धयर्थे जपे विनियोगः ।

ऋष्यादि न्यासः—ओं दत्तात्रेय ऋषये नमः शिरसि ।
ओं अनुष्टुप् छन्दसे नमः मुखे ।
ओं श्री कार्तवीर्यार्जुन देवतायै नमः हृदये ।
ओं फ्रों वीजाय नमः गुह्ये ।
ओं ह्रीं शक्तये नमः पादयोः ।
ओं क्लीं कीलकाय नमः नाभी ।

करन्यासः—ओं दत्तात्रेय ऋषये नमः अंगुष्ठाभ्यां नम :
ओं अनुष्टुप् छन्दसे नमः अनामिकाभ्यां नमः ।
ओं कार्तवीर्यार्जुन देवतायै नमः मध्यमाभ्यां नमः ।
ओं फ्रों वीजाय नमः तर्जनीभ्यां नमः ।
ओं ह्रीं शक्तये नमः कनिष्ठिाभ्यां नमः ।
ओं क्लीं कीलकाय नमः करतलकर पृष्ठाभ्यां नमः ।

हृदयादि न्यासः—ओं दत्तात्रेय ऋषये नमः हृदयाय ।
ओं अनुष्टुप छन्दसे नमः शिरसि ।
ओं कार्तवीर्यार्जुन देवतायै नमः शिखायाम् ।
ओं फ्रों वीजाय नमः कवचाय हुम् ।
ओं ह्रीं शक्तये नमः नेत्रत्रयाय वौषट् ।
ओं क्लीं कीलकाय नमः अस्त्राय फट् ।

ध्यानम्—ओं सहस्रवाहुं सशरं सचापं
रक्ताम्वरं रक्त किरीट भूषम् ।
चौरादि दुष्टार्ति हरं वरं तं
वन्दे महाशक्तिकं कार्तवीर्यम् ।


मन्त्रः—ओं फ्रों ह्रीं क्लीं कार्तवीर्यार्जुनाय नमः ।

कार्तवीर्य मन्त्र के जाप से सर्व शत्रुओं का नाश; सर्व सम्पत्तियों की प्राप्ति होती है ।

9. हनुमद् वडवानल स्तोत्रम्

विनियोग:—ओं अस्य श्री हनुमान वडवानल स्तोत्रमन्त्रस्य श्री रामचन्द्र ऋषिः, श्री वडवानल हनुमान देवता मम समस्त रोगप्रशमनार्थम् आयुरारोग्यैश्वर्याऽभि वृद्धयर्थं सीतारामचन्द्रप्रीत्यर्थं च हनुमद् वडवानल स्तोत्रजपमहं करिष्ये ॥

हनुमतयन्त्र



ध्यानम्—मनोजवं मारुततुल्यवेगं, जितेन्द्रियं बुद्धिमतां वरिष्ठम ।
वातात्मजं वानर यूथमुख्यं, श्री रामदूतं शरणं प्रपद्ये ॥

ओं ह्रां ह्रीं ओं नमो भगवते श्री महाहनुमते प्रकटपराक्रम सकलदिङ्मण्डल यशोवितान धवलीकृत जगतत्रितय वज्रदेह रुद्रावतार लंकापुरी दहन उमा अर्गलमन्त्र उदधिबन्धन दशशिरःकृतान्तक सीताश्वसन वायुपुत्र—अञ्जनीगर्भ सम्भूत श्री राम लक्ष्मणानन्दकर कपिसैन्यप्राकार सुग्रीवसाह्यरण पर्वतोत्पाटन कुमारब्रह्मचारिन् गम्भीरनाद सर्व पापग्रह वारणसर्वज्वरो-च्चाटनडाकिनीविध्वंसन ओं ह्रां ह्रीं ओं नमो भगवते महावीर वीराय सर्व दुःख निवारणाय ग्रहमण्डल सर्वभूत पिशाचमण्डलो च्चाटन भूत ज्वर-एकाहिक ज्वर-द्वयाहिक ज्वर-त्र्याहिक ज्वर चातुर्थिक



HANUMAN

Subhash Calendar Co.,
4416, Nai Sarak, Delhi-6.

ज्वर—सन्ताप-ज्वरान् छिन्धि-छिन्धि यक्षब्रह्मराक्षस भूत प्रेत पिशाचान् उच्चाटय उच्चाटय ।

ओं ह्रां श्रीं ओं नमो भगवते श्री महाहनुमते ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः आं हां हां हां हां ओं सौं एहि एहि एहि ओं हं ओं हं ओं हं ओं नमो भगवते श्री महाहनुमते श्रवण चक्षुर्भूतानां शाकिनी डाकिनीनां विषम दुष्टानां सर्वविषं हर हर आकाशभुवनं भेदय भेदय छेदय छेदय मारय मारय शोषय शोषय मोहय मोहय ज्वालय ज्वालय प्रहारय प्रहारय शंकलमायां भेदय-भेदयं ।

ओं ह्रां ह्रीं ओं नमो भगवते महाहनुमते सर्वग्रहोच्चाटनं परबलं क्षोभय-क्षोभय सकल-बन्धन मोक्षणं कुरु कुरु शिर:शूल-गुलमशूला न्निर्मूलय निर्मूलय नागपाशानन्त वासुकि तक्षक-कर्कोटक कालियान् यक्ष कुलजगतविलगत रात्रिञ्चर-दिवाचर-सर्पान्निर्विषं कुरु कुरु स्वाहा ।

राजभय—चोरभय-परमन्त्र-परयन्त्र-परतन्त्र-परविद्याश्छेदय स्वमन्त्र-स्वयन्त्र-स्वतन्त्र स्वविद्या: प्रकटय प्रकटय सर्वारिष्टान्नाशय नाशय सर्व शत्रून् नाशय नाशय असाध्यं साधय साधय हुं फट् स्वाहा ।।

यह वडवानल स्तोत्र सर्वसिद्धिप्रदायक है । इसके पाठ से मनुष्य की सभी कामनाएं पूर्ण हों जाती हैं । अत: सर्वप्रथम हाथ में जल लेकर ओं अस्य श्री हनुमानवाडवानलस्तोत्र मन्त्रस्य० आदि पढ़ कर संकल्प करे ।

ध्यान कर—हनुमान प्रतिमा की पूजा कर धूपदीप से अर्चन कर सम्पूर्ण स्तोत्र का पाठ करे । 21 दिन तक निरन्तर इसका पाठ करना चाहिए ।

इति, विभीषणकृतं हनुमद्वडवानलस्तोत्रं सम्पूर्णम् ।

10. हनुमत्-तन्त्रम्

ध्यानम्—ध्यायेद् बालदिवाकरद्युतिनिभं देवारि दर्पापहं
देवेन्द्र-प्रमुख-प्रशस्त यशसं देदीप्यमानं रुचा ।
सुग्रीवादि समस्त वानरयुतं सुव्यक्त तत्त्व प्रिय
संरक्तारुणलोचनं पवनजं पीताम्बरालंकृतम् ।।1।।

उद्यन्मार्तण्डकोटि प्रकटरुचियुतं चारुवीरासनस्थं
मौञ्जी यज्ञोपवीताऽऽभरण रुचिशिखा शोभितं कुण्डलाढ्यम् ।
भक्तानामिष्टदान प्रवण मनुदिनं वेदनाद प्रमोदं
ध्यायेद् देवं विधेयंप्लवग कुलपतिं गोष्पदीभूत वर्धिम् ।।
मनोजवं मारुत तुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्टम् ।
वातात्मजं वानरयूथ मुख्यं श्रीरामदूतं शरणं प्रपद्ये ।।3।।

यन्त्रोद्धारः—

वक्ष्ये हनुमतो यन्त्रं सर्वसिद्धिप्रदायकम् ।
वलयत्रितयं लेख्यं पुच्छाकार समन्वितम् ।।
साध्यनाम लिखेन्मध्ये पाशवीजं प्रवेष्टितम् ।
उपर्यष्ट दलं कृत्वा वर्मपत्रेषु संलिखेत् ।।
चतुरस्र रेखाग्रे त्रिशूलानि समालिखेत् ।।
भूपुरस्याष्ट वज्रेषु हसौं बीजं लिखेत्ततः ।
कोणेष्वङ्कुश मालिख्य मालामन्त्रेण वेष्टयेत् ।
तत्सर्वं वेष्टयेद् यन्त्रे वलयत्रितयेन च ।
वस्त्रे शिलायां फलके ताम्रपात्रेऽथ कुड्यजे ।
भूर्जे वा ताडपत्रे वा रोचना नाभि कुङ्कुमैः ।
मन्त्रमेतत् समालिख्य त्यक्ताशीर्ब्रह्म चर्यवान् ।।

माला प्रार्थना—ॐ मां माले महामाये सर्वशक्ति स्वरूपिणी ।
चतुर्वर्ग-स्त्वयि न्यस्तंस्तस्मान्मे सिद्धिदा भव ।
अविघ्नं कुरुमाले त्वं गृह्णामि दक्षिणे करे ।
जप काले च सिद्ध्यर्थं प्रसीद मम सिद्धये ।।

हनुमन्मालामन्त्रः—

ॐ नमोहनुमते प्रकट पराक्रम आक्रान्त दिङ्मण्डल यशोवितान धवलीकृत जगत्त्रितय वज्रदेह ज्वलदग्नि सूर्य कोटि समप्रभ-तनूरुह रुद्रावतार लङ्कापुरी दहनोदधिलङ्घन दशग्रीव शिरः कृतान्तक सीता श्वासन वायुसुताऽञ्जनीगर्भ सम्भूत श्रीराम लक्ष्मणाऽऽनन्दकर कपिसैन्य-प्राकार सुग्रीव सख्य कारण वालिनिर्वहण कारण द्रोण पर्वतोत्पादनाऽशोक

विदारणाऽक्ष कुमारक छेदनवन रक्षा कर समूह निभञ्जन ब्रह्मास्त्र ब्रह्म-शक्ति ग्रसन लक्ष्मण शक्ति भेद निवारण विशल्योषधिसमानयन बालोदित-भानुमण्डलग्रसन मेघनाद होम विध्वंसन इन्द्रजिद्वध कारण सीता रक्षक राक्षसीसङ्घविदारण कुम्भकर्णादि वध परायण श्री राम भक्ति तत्पर समुद्र व्योम द्रुम लङ्घन महास्तमर्थ्य महातेजः पुञ्ज विराजमान स्वामि वचन सम्पादिताऽर्जुन युगसहाय कुमार ब्रह्मचारिन् शब्दोदय दक्षिणाशा मार्तण्ड मेरु पर्वतपीठिकार्चन सकलमन्त्रागमाचार्य मम सर्वग्रहविनाशन सर्व ज्वरोच्चाटन सर्वविष विनाशनं सर्वापत्ति निवारण सर्वदुष्ट निवर्हण सर्वव्याघ्रादिभयनिवारण सर्व शत्रुच्छेदन मम परस्य च त्रिभुवन-पुम-स्त्री-नपुंसकात्मकं सर्व वीज जातं वशय-वशय ममाज्ञाकारकं सम्पादय सम्पादय नानानामधेयान सर्वान् राज्ञः सपरिवारान् ममसेवकान् कुरु कुरु सर्व-शस्त्रास्त्र विषाणि विध्वंसय विध्वंसय ह्लां ह्लीं ह्लं ह्लां एह्येहि ह् सौं ह् ख्फ्रें ह् स्रौं ख्फ्रें स्फ्रें ह्लीं सर्वशत्रून् हन-हन पर दलानि परसैन्यानि क्षोभय क्षोभय मम सर्व कार्य जातं साधय साधय सर्वदुष्ट दुर्जन मुखानि कीलय-कीलय धे-धे-धे हा-हा-हा-हुं-हुं-फट्-फट् स्वाहा ॥

पुरश्चरणम्—पुरश्चर्यस्य मन्त्रस्य प्रोक्ता चार्क सहस्रिका ।
भौमस्य वासरे पूजा कार्या हनुमतो ध्रुवम् ॥
प्रियङ्गवो व्रीहयश्च दध्याज्य क्षीर संयुतैः ।
कदली मातुः लिङ्गाऽऽम्रफलैर्नानाविधं हुनेत ॥
दशांशेन ततो ब्रह्मचारिणोंभोजयेद् ध्रुवम् ॥

हनुमद-गायत्री मन्त्रः—

ओं अञ्जनी नन्दनाय विद्महे वायुपुत्राय धीमहि तन्नो हनुमान् प्रचोदयात् ॥

हनुमद् अष्टार्ण मन्त्रः—ओं ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ओं ॥

द्वादशाक्षरमन्त्रः—ओं हुं हनुमते रुद्रात्मकाय हुं फट् ॥

शावर मन्त्र—लंका कोट समुद्रखाई ।
हनुमान की चौकी सीताराम की दुहाई ।।

11. भगवती दुर्गा का सब प्रकार के कष्टों को दूर करने का मन्त्र

ओं दुर्गे स्मृताहरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतीमतीव शुभां ददासि—ओं ह्रीं यदन्ति यच्च दूरके भयं विन्दति मामिह, पवमानऽवतं जहि । यदुत्थितं भयं भगवति दुर्गे तत्सर्वं शमय स्वाहा दुर्गा देवीं शरणमहं प्रपद्ये-प्रतिकूलं मम नाशय अनुकूलं मे प्रयच्छ ह्रीं ओं दारिद्र्य दुःखभय हारिणि का त्वदन्या सर्वोपकार-करणाय सदार्द्र चित्ता । नमः श्रीं ओं हुं फट् स्वाहा ।।

इस मन्त्र का भगवती दुर्गा का पूजन करते हुए । ग्यारह हजार जाप करना चाहिए । इस मन्त्र के जाप से भयंकर विपत्ति से भी छुटकारा मिल सकता है । ज्योति जलाकर दुर्गा पूजन सविधि करे ।

12. कुवेर मन्त्रः

विनियोगः—ओं अस्य श्री कुवेर मन्त्रस्य विश्रवा ऋषि वृहती छन्दः कुवेर देवता सर्वेष्ट सिद्धये जपे विनियोगः ।।

अङ्गन्यासः

ओं विश्रवा ऋषये नमः शिरसि ।
ओं वृहती छन्दसे नमः मुखे ।
ओं कुवेर देवतायै नमः हृदि ।।

करन्यासः—ओं यक्षाय अङ्गुष्ठाभ्यां नमः
ओं कुवेराय तर्जनीभ्यां नमः ।

ॐ वैश्रवणाय मध्यमाभ्यां नम: ।
ॐ धनधान्याधिपतये अनाभिकाभ्यां नम: ।
ॐ धनधान्य समृद्धिर्मे कनिष्ठिकाभ्यां नम: ।
ॐ देहि दापय स्वाहा करतल कर पृष्ठाभ्यां नम: ।

षडंगन्यास:—ॐ यक्षाय हृदयाय नम: ।
ॐ कुवेराय शिरसे स्वाहा ।
ॐ वैश्रवणाय शिखायै वषट् ।
ॐ धनधान्याधिपतये कवचाय हुम् ।
ॐ धनधान्यसमृद्धिं मे—नेत्रत्रयाय वौषट् ।
ॐ देहि दापय स्वाहा अस्त्राय फट् ॥

ध्यानम्—ॐ मनुजवाह्य विमानवर स्थितं
गरुड रत्ननिभं विधि नायकम् ॥
शिव सखं मुकुटादि विभूषितं
वरगदे दधतं भज तुन्दिलम् ॥

मन्त्र – ॐ यक्षाय कुवेराय बैश्रवणाय धनधान्याधिपतये धन्य धान्य समृद्धि मे देहि दापय स्वाहा ॥

शिव पूजन कर—विल्वपत्रादि चढ़ाकर वहीं कुवेर का पूजन करके इस मन्त्र को करे ।

13. दारिद्र्य-नाशक महालक्ष्मी-मन्त्र

ॐ श्रीं ह्रीं क्लीं त्रिभुवनपालिन्यै महालक्ष्म्यै अस्माकं दारिद्र्यं नाशय प्रचुरं धनं देहि देहि क्लीं ह्रीं श्रीं ॐ ।

दीपावली की रात्रि को इस का जप करें । जपसंख्या—12500 ।
भगवती लक्ष्मी का षोडशोपचार पूजन करके—इस मन्त्र को जपे ।

14. वटुक भैरव मन्त्र

विनियोग :—ॐ अस्य श्री आपद्उद्धरण श्रीवटुकभैरव मन्त्रस्य वृहदारण्यको नाम ऋषि: त्रिष्टुप् छन्द: श्री वटुक भैरवो देवता

ह्लीं वीजं स्वाहा शक्तिः भैरवः कीलकं मम कार्यसिद्ध्यर्थे जपे विनियोगः ।

अंगन्यास :—वृहदारण्यक ऋषये नमः शिरसि ।
त्रिष्टुप् छन्दसे नमः मुखे ।
श्री वटुक भैरव देवतायै नमः हृदि ।
ह्लीं वीजाय नमः गुह्ये । स्वाहा शक्तये नमः पादयोः ।
भैरवः कीलकाय नमः नाभौ । विनियोगाय नमः सर्वाङ्गे ।

करन्यासः—ओं ह्लां वां अंगुष्ठाभ्यां नमः ।
ओं ह्लीं वीं तर्जनीभ्यां नमः ।
ओं ह्लूं वूं मध्यमाभ्यां नमः ।
ओं ह्लैं वैं अनामिकाभ्यां नमः ।
ओं ह्लौं वौं कनिष्ठिकाभ्यां नमः ।
ओं ह्लः वः करतल कर पृष्ठाभ्यां नमः अस्त्राय फट् ॥


षडङ्गन्यासः—ओं ह्लां वां हृदयाय नमः ।
ओं ह्लीं वीं शिरसे स्वाहा ।
ओं ह्लूं वूं शिखायै वषट् ।
ओं ह्लैं वैं कवचाय हुम् ।
ओं ह्लौं वौं नेत्रत्रयाय वौषट् ।
ओं ह्लः वः अस्त्राय फट् ।

ध्यानम्—ओं कर कलित कपालः कुण्डलीदण्डपाणिः ।
तरुण तिमिर नील व्याल यज्ञोपवीतिः ।
क्रतुसमयसपर्या विघ्न विच्छेद हेतुः ।
जयति विघ्न नाथः सिद्धिदः साधकानाम् ॥

मन्त्र—ओं ह्लीं वं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्लीं ॥

विशेष—कुछ साधक ऐसा कहते हैं कि जिन की पत्नी जीवित हो उसे इस मन्त्र का अनुष्ठान नहीं करना चाहिए ?

विघ्नहर वटुक भैरव यन्त्र



विधि—इस यन्त्र को गोरोचन व कुंकुम से भोज पत्र पर स्वच्छ होकर लिखे। अमुककी जगह जिस पर विपत्ति हो उसका नाम लिखे। धूप-दीप आदि से पूजन करे। वटुक भैरव मन्त्र का जाप कर तावीज में रखकर हाथ में वान्ध ले। इससे आपत्तियों से उद्धार हो। लक्ष्मी बढे, शत्रुका नाश हो। कभी भी अनिष्ट न हो।

15. रुद्रयामलोक्त श्रीसूक्तस्य सम्पुटपुरश्चरणविधिः

ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः ॥

ओं दुर्गे स्मृता हरसि भीतिमशेषजन्तो-स्वस्थैः-स्मृता मतिमतीव शुभां ददासि—

ओं हिरण्यवर्णां हरिणीं सुवर्णरजत स्रजाम् ।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह ॥

ओं श्रीं ह्रीं श्रीं कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ॥1॥

दारिद्र्य दुःखभयहारिणी का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ॥

उों श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ।

उों दुर्गेस्मृता हरसि भीतिमशेषजन्तो: स्वस्थै: स्मृतामतिमतीव शुभां ददासि ।

उों तांम आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।

दारिद्र्य दु:ख भय हारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता
उों श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं उों महा लक्ष्म्यै नम: ।।2।।

उों श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महा-लक्ष्म्यै नम: ।।

उों दुर्गेस्मृता हरसि भीतिमशेषजन्तो: स्वस्थै: स्मृता मतिमतीव शुभां ददासि—

उों अश्व पूर्णां रथ मध्यां हस्तिनाद प्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ।।

दारिद्र्य दु:खभय हारिणि का त्वदन्या सर्वोपकारकरणाय सादार्द्रचित्ता
उों श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ।।3।।

उों श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ।

उों दुर्गेस्मृता हरसि भीतिमशेषजन्तो: स्वस्थै: स्मृतामतिमतीव शुभां ददासि ।

उों कांसोस्मितां हिरण्य प्राकारमार्द्रा ज्वलन्तीं तृप्तां तर्पयन्तीं
पद्मे स्थितां पद्म वर्णां तामिहोपह्वये श्रियम् ।।

दारिद्र्य दु:खभय हारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता
उों श्रीं ह्लीं श्रीं कमले कमलालये, प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ।।4।।

उों श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ।

ओं दुर्गेस्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

ओं चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
ओं तां पद्मनीमिं शरणं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥
दारिद्र्य दुःखभयहारिणी का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ॥
ओं श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नमः ॥5॥

ओं श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नमः ।

ओं दुर्गे स्मृताहरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

ओं आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तववृक्षोऽथ विल्वः ।
तस्य फलानि तपसा नुदन्तु मायारन्तरायाश्च वाह्या अलक्षमीः ॥
दारिद्र्य दुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ।
ओं श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नमः ॥6॥

ओं श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नमः ।

ओं दुर्गेस्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

ओं उपैतु मां देवसखः कीर्त्तिश्च मणिनासह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।
दारिद्र्य दुःखभय हारिणि का त्वदन्या सर्वोपकारकरणाय सद्रार्द्र चित्ता ।
ओं श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नमः ॥

ओं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नमः ।

ओं दुर्गेस्मृताहरसि भीतिमशेष जन्तोः स्वस्थैः स्मृतामतिमतीव शुभां ददासि ।

उों क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥

दारिद्र्य दुःख भयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ॥
उों श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महा लक्ष्म्यै नमः ॥8॥
उों श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः ।
उों दुर्गे स्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृतामतिमतीव शुभां ददासि—

उों गन्धद्वारां दुराधर्षां नित्य पुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥

दारिद्र्य दुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ।
उों श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः ॥9॥
उों श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यैः नमः ।
उों दुर्गेस्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृतामतिमतीव शुभां ददासि—

उों मनसः काममाकूतिं वाचः सत्यमशीयमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

द्रारिद्र्य दुःख भय हारिणि का त्वदन्या सर्वोपकार करणाय सदार्द्र चित्ता
उों श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः ॥10॥
उों श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महा-लक्ष्म्यै नमः ।
उों दुर्गेस्मृता हरसि भीतिमशेष जन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

उों कर्दमेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुलै मातरं पद्ममालिनीम् ॥

ॐ दारिद्रय दु:खभय हारिणि का त्वदन्या सर्वोपकार करणाय सदार्द्र चित्ता
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महा
लक्ष्म्यै नम: ॥11॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नम:
ॐ दुर्गे स्मृता हरसि भीतिमशेष जन्तो: स्वस्थै: स्मृतामतिमतीव शुभं
ददासि ।

ॐ आप: स्रजन्तु स्निग्धानि चिक्लींत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥
दारिद्रय दु:खभय हारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ॥
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महा
लक्ष्म्यै नम: ॥12॥

ॐ दुर्गे स्मृता हरसि भीतिमशेष जन्तो: स्वस्थै: स्मृता मतिमतीव
शुभां ददासि ।

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम् ।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आ वह ॥

दारिद्रय दु:खभय हारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै
नम: ॥13॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसींद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै
नम: ।

ॐ दुर्गे स्मृता हरसि भीतिमशेष जन्तो: स्वस्थै: स्मृतामतिमतीव शुभां
ददासि ।

ॐ आर्द्रां य: करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो म आ वह ॥

दारिद्रय दु:खभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ॥
ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महा-
लक्ष्म्यै नम: ॥14॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महा-
लक्ष्म्यै नम: ।

ऊँ दुर्गे स्मृताहरसि भीतिमशेष जन्तो: स्वस्थै: स्मृतामतिमतीव शुभां ददासि ।

ऊँ तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

दारिद्रय दु:खभय हारणि का त्वदन्या सर्वोपकारकरणय सद्रार्द्र चित्ता
ऊँ श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद ऊँ श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ॥15॥

ऊँ श्रीं ह्लीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ।

ऊँ दुर्गेस्मृता हरसि भीतिमशेष जन्तो: स्वस्थै: स्मृता मतिमतीव शुभां ददासि ।

ऊँ य: शुचि प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रिय: पञ्चदशर्चं च श्रीकाम: सततं जपेत् ॥

दारिद्रय दु:खमयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्र चित्ता ॥
ऊँ श्रीं ह्लीं श्रीं कमलेकमलालये प्रसीद प्रसीद श्रीं ह्लीं श्रीं महालक्ष्म्यै नम: ॥

इति श्रीसूक्त सम्पुट विधि

16. उच्छिष्ट गणपति मंत्र

इस मन्त्र के पुरश्चरण में कृष्ण पक्ष की चतुर्दशी से आरम्भ करके शुक्ल पक्ष की चतुर्थी तक इसका आराधन करे । प्रात: स्नान करके शुद्ध वस्त्र धारण कर पुर्वाभिमुख वैठ कर गणपति प्रतिमा का पूजन कर-मधु (शहद) से प्रतिदिन स्नान करवाए—मिश्री या लड्डू का भोग लगाए । अपने मुख में पान रखकर मन्त्र का जाप करें । कुछ का विचार है भोजन कर विना चूली किए जप करे ।

लाल चन्दन की वनी मूर्ति मिले तो वहुत अच्छा है । मूर्ति अंगुष्ठ प्रमाण होनी चाहिए । चन्दन की न मिले तो लाल पत्थर की मूर्ति से काम लेना चाहिए ।

इस मन्त्र का एक लाख संख्या में जाप करने का विधान है । जप

की समाप्ति पर दशांश हवन करना चाहिए। हरिद्रा तिल एवं चावल मिश्रित चरु से हवन करना चाहिए। हवन के पश्चात् वलि दें। ब्राह्मणों को भोजन करवाएं।

इस मन्त्र के विधान में किसी प्रकार का विशेष नियम नहीं है।

पूजन करते हुए लाल पुष्प चढ़ाते हुए निम्नलिखित नामों से पूजन करे—

पहले आठ विद्याओं का तत्पश्चात् अष्टदल कमल पर पूर्वादि दिशाओं में आठ शक्तियों का पूजन करे। ऊँ विद्यायै नम:। ऊँ विधात्र्यै नम:। ऊँ भोगदायै नम:। ऊँ विघ्नघातिन्यै नम:। ऊँ निधि प्रदीपायै नम:। ऊँ पापघ्न्यै नम:। ऊँ पुण्यायै नम:। ऊँ शशिप्रभायै नम:।

तत्पश्चात् अष्टदल कमल पर—

ऊँ वक्रतुण्डाय स्वाहा, ऊँ एकदंष्ट्राय स्वाहा, ऊँ लम्वोदराय स्वाहा, ओं विकटाय स्वाहा, ऊँ विघ्नेशाय स्वाहा, ऊँ गजवक्त्राय स्वाहा, ऊँ विनायकाय स्वाहा, ऊँ गणपतये स्वाहा।

इसके पश्चात् गणेश पीठ की शक्तियों का पूजन करें—

ऊँ तीव्रायै नम:, ऊँ चालिन्यै नम:, ऊँ नन्दायै नम:, ऊँ भोगदायै नम:, ऊँ कामरूपिण्यै नम:, ऊँ उग्रायै नम:, ऊँ तेजोवत्यै नम:।

ऊँ सत्यायै नम:, मध्ये—ऊँ विघ्ननाशिन्यै नम:॥

फिर ऊँ गं सर्व शक्ति कमलासनाय नम:, इस मन्त्र से आसन देकर मूल मन्त्र से गणेश जी की मूर्ति की कल्पना कर उसमें गणेश जी का आवाहन कर आसन, पुष्प. अर्घ्य आदि समस्त उपचारों से पूजन करे।

प्रार्थना—ऊँ सुमुखश्चैकदन्तश्च कपिलो गजकर्णक:। लम्वोदरश्च विकटो विघ्ननाशो विनायक:। धूम्रकेतुर्धनाध्यक्षो भालचन्द्रो गजानन:। द्वादशैतानि नामानि य: पठेच्छृणुयादपि। विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥

ऊँ वक्रतुण्ड महाकाय सूर्य कोटि समप्रभ।
अविघ्नं कुरु मे देव सर्वविघ्नोप शान्तये॥

ध्यानम्—रक्तमूर्ति गणेशं च सर्वाभरण भूपितम्।

रक्तवस्त्रं त्रिनेत्रं च रक्तपद्मासने स्थितम् ।।
चतुर्भुजम् महाकायं द्विदन्तं सस्मिताननम् ।
इष्टं च दक्षिणे हस्ते दन्तं च तदध: करे ।
पाशांकुशौ च हस्ताभ्यां जटामण्डलवेष्टितम् ।
ललाटे चन्द्ररेखाढ्यं सर्वालंकार भूषितम् ।।
चतुर्भुजं रक्त तनुं त्रिनेत्रं पाशांकुशौ मोदकपात्र दन्तौ ।।
करैर्दधानं सरसीरुहस्यमुन्मत्त मुच्छिष्ट गणेशमीढे ।।

न्यास:—सुघोर ऋषये नम: शिरसि ।
निविडगायत्री हृदये नम: मुखे ।
उच्छिष्ट गणपतये नम: हृदि ।।

करन्यास:—ओं ह्रीं अंगुष्ठाभ्यां नम: ।
ओं गं तर्जनीभ्यां नम: ।
ओं हस्ति मध्यमाभ्यां नम: ।
ओं पिशाचि अनामिकाभ्यां नम: ।
ओं लिखे कनिष्ठिकाभ्यां नम: ।
ओं स्वाहा करतल कर पृष्ठाभ्यां नम: ।।

अंगन्यास:—ओं ह्रीं हृदयाय नम:
ओं गं शिरसे स्वाहा
ओं हस्ति शिखायैवषट्
ओं पिशाचि कवचाय हुम्
ओं लिखे नेत्र त्रयाय वौषट्
ओं स्वाहा अस्त्रायफट् ।

मन्त्र:—ओं ह्रीं गं हस्ति पिशाचि लिखे स्वाहा ।

अथवा—ओं हस्ति पिशाचि लिखे स्वाहा ।

नोट :—कहीं-कहीं पूड़ों से, लड्डुओं से भी हवन करने का लिखा है ।

बलि मन्त्र:—ॐ गं हुं क्लौं ग्लौं उच्छिष्ट गणेशाय महायक्षाय नम: इयं बलि: ।।

विशेष विधान में बलि मन्त्र=ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं फट् स्वाहा—से बलि दें ।

विसर्जन करते समय दक्षिण दिशा में लाल पुष्प गिरा दे ।

गणपति का विशेष मन्त्र:

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा ।

17. हरिद्रागणेशमन्त्र:

विनियोग:—अस्य श्री हरिद्रागणनायक मन्त्रस्य मदनऋषि: अनुष्टुप छन्द: हरिद्रा गणनायको देवता ममाभीष्ट सिद्धये जपे विनियोग: ।।

मन्त्र:—ॐ हुं गं ग्लौं हरिद्रा गणपतये वर वरद सर्वजन हृदयं स्तम्भय स्तम्भय स्वाहा ।।

(द्वात्रिंशद् वर्णात्मक मन्त्र:)

ध्यानम्—पाशांकुशौ मोदक मेकदन्तं
करैर्दधानं कनकासनस्थम् ।
हारिद्रखण्डप्रतिमंत्रिनेत्रम् ।
पीतांशुकं रात्रि गणेशमीढे ।।

जप—चार लाख की संख्या ।

हवन—दशांशहवन—हरिद्रा, तण्डुल—घृत से । ब्राह्मणभोजन । चावल हल्दी मिश्रित हों ।

इस मन्त्र से अभीष्टफल की प्राप्ति होती है । कुमारी कन्या को वर की प्राप्ति होती है ।

शुक्लपक्षे चतुर्थ्यां तु कन्यापिष्टहरिद्रया ।
विलिप्यांगं जले स्नात्वा पूजयेद् गणनायकम् ।।

तर्पयित्वा पुरस्तस्य सहस्रं साष्टकं जपेत् ।
शतं हुत्वा घृतापूपैः भोजयेद् ब्रह्मचारिणः ।
कुमारीरपिसंतोष्य गुरुं प्राप्नोति वाञ्छितम् ।
लाजैः कन्यामवाप्नोति कन्या लभते वरम् ॥
वन्ध्यानारी रजः स्नात्वा पूजयित्वागणाधिपभ् ।
पलप्रमाणगोमूत्रे पिष्टाः सिन्धु-वचा निशाः ।
(निशा—हरिद्रा)
सहस्रं मन्त्रयेत् कन्यावटून संभोज्य मोदकैः ।
पीत्वा तदौषधं पुत्रं लभते गुणसागरम् ॥

18. शत्रुसंहार के लिए चक्रेश्वरीदेवी की आराधना

मन्त्र—ॐ नमश्चक्रेश्वरी चक्रवाहिनी रिपुदल भंजिनी काली महाकाली दैत्येन्द्र दमनी राजकुले द्यूते विवादे जले स्थले संकटे विकटे रक्षां कुरु ॐ ह्रीं क्लीं ठः ठः ठः स्वाहा ॥

वाम जानुपार्श्वे रिपुनामधेयं छुरिकयोल्लिख्य रक्तासनस्थो निशायां दीपं प्रज्वाल्य गणनाथादीन् संस्मृत्यारभेत् ।

सायंकाल रेत की वेदी बनाकर छुरी से उस पर शत्रु का नाम लिख कर लाल आसन पर बैठकर गणेश आदि का पूजन कर मीठे तेल का दीपक जलाकर प्रतिदिन एक हजार संख्या में जप करना चाहिए। 40 दिन का यह विधान है । इससे शत्रु का नाश हो जाता है ।

चक्रेश्वरी देवी स्तोत्रम्

ॐ श्री चक्रे चक्रभीमे ललिताम्बरभुजे लीलया लोल्लयन्ती ।
चक्रं विद्युत् प्रकाशं ज्वलितशितशिखं खे खगेन्द्राधिरूढ़े ॥1॥
तत्त्वैरुद्भूत भावे सकल गुण निधे त्वं महामन्त्रमूर्ते ।

क्रोधादित्य प्रतापे त्रिभुवनमहिते पाहि मां देवि चक्रे ॥2॥
क्लीं क्लीं कलींकार चित्ते कलि कलि वदने दुन्दुभी भीमनादे ।
ह्रां ह्रीं ह्रः सः खः वीजे खगपतिगमने मोहिनी शोषिणीत्वम् ॥3॥
तच्चक्रं चक्रदेवी भ्रमसि जगति दिक्चक्रे विक्रान्त कीर्तिः ।
निर्विघ्नौघं विघ्नयन्ती विजय जयकरी पाहि मां देवि चक्रे ॥4॥
श्रां श्रीं श्रौं श्रः प्रसिद्धे जनित जनमन प्रीति सन्तोष लक्ष्मी ॥
श्री वृद्धिं कीर्ति कान्ति प्रथमयसि वरदे त्वं महामन्त्रमूर्तिः ॥5॥
त्रैलोक्यं क्षोभयन्तीमसुरभिदुर हुंकार नादैक भीमे ।
क्लीं क्लीं क्लीं द्रावयन्ती हुतकनकनिभे पाहि मां देवि चक्रे ॥6॥
वज्रक्रोधे सुभीमे शशधर धवले भ्रामयन्ती सुचक्रे ।
रां रीं रौं हः कराले भगवति वरदे रुद्रनेत्रे सुकान्ते ॥7॥
आं ई ॐ भीषयन्ती त्रिभुवनमखिलं तत्त्वतेजः प्रकाशि ॥
क्षां क्षीं क्षुं क्षोभयन्ती विषं विषयुते पाहि मां देवि चक्रे ॥8॥
ॐ ह्रीं ह्रीं ह्रूं सहर्षं हा हसितसिते चक्र संकास वीजे ।
ह्रां ह्रीं ह्रूं क्षीर वर्णे कुवलयनयने विद्रवं द्रावयन्ती ।
ॐ ह्रौं ह्रः क्षः त्रिलोकीममृत जर जरैः वारगैः प्लावयन्ति ।
ज्वां ज्वीं ज्वों सत्व वीजे प्रलय विषयुते पाहि मां देवि चक्रे ॥
आं आं आं ह्रीं युगान्ते प्रलयदिनकरे कारकोटि प्रतापे ॥
चक्राणि भ्रामयन्ती विमलवरभुजे पद्ममेकं फलं च ।
सच्चक्रे कुंकुमांकैः विधृत विनिरुह्ं तीक्ष्ण रौद्र प्रचण्डे ॥
ह्रां ह्रीं ह्रींकार कारीर नरगण तपो पाहि मां देवि चक्रे ॥
श्रां श्रीं श्रूं श्रः सवृत्ति स्त्रिभुवनमहिते नाद विन्दु त्रिनेत्रे ।
वँ वँ वँ वज्रहस्ते लल-लल-ललिते नीलशो नीलकोषे ॥
चं चं चं चक्रधारी चल चलंकलिते नूपुरालीढ लेले ॥
त्वं लक्ष्मीः श्री सुकीर्ति सुरनर विनते पाहि मां देवि चक्रे ॥
ह्रीं ह्रीं ह्रूं यः प्रघोषे प्रलय युग पराजेय शब्दं प्रणादे ॥
याँ याँ याँ क्रोधमूर्ते ज्वल ज्वल ज्वलिते ज्वाल संज्वाल लीढे ।
आँ ई ॐ अः प्रघोषे प्रकटित दशने पाहि मां देवि चक्रे ॥

चक्रेश्वरी देवी का अन्य मन्त्र—ओं ह्रीं श्रीं चक्रेश्वरी चक्रवारुणी, चक्रधारिणी चक्रवेगेन मम उपद्रवं हन-हन शान्तिं कुरु कुरु स्वाहा ॥

इस मन्त्र की 21 दिन तक दसमाला प्रतिदिन करनी चाहिए। फिर प्रतिदिन एक माला करें—हर प्रकार के उपद्रव शान्त हो।

दूसरा मन्त्र—ओं नमः चक्रेश्वरी चिन्तित कार्यकारिणी मम स्वप्ने श्रुताश्रुतं कथय कथय दर्शय दर्शय स्वाहा ।

शुभ मुहूर्त में जाप करे। 12500 जाप होने के बाद एक माला फेरे। जिज्ञासित का स्वप्न में उत्तर मिले।

19. इन्द्राक्षी स्तोत्रम्

गणेशाय नमः। श्री नर्मदा देव्यै नमः ॥

विनियोगः—ओं अस्य श्री इन्द्राक्षी स्तोत्रमन्त्रस्य पुरन्दर ऋषिः अनुष्टुप् छन्दः, इन्द्राक्षी देवता, महालक्ष्मी बीजम् भुवनेश्वरी शक्तिः भवानीति कीलकम् मम सर्वाभीष्ट-सिद्ध्यर्थे जपे विनियोगः।

न्यास—ओं इन्द्राक्षी अंगुष्ठाभ्यां नमः।
ओं महालक्ष्मी तर्जनीभ्यां नमः।
ओं माहेश्वरी मध्यमाभ्यां नमः
ओं अम्बुजाक्षी अनामिकाभ्यां नमः।
ओं कात्यायनी कनिष्ठिकाभ्यां नमः।
ओं कौमारी करतल कर पृष्ठाभ्यां नमः ॥

हृदयादि न्यास—ओं इन्द्राक्षी हृदयाय नमः।
ओं महालक्ष्मी शिरसे स्वाहा।
ओं माहेश्वरी शिखायै वषट्।
ओं अम्बुजाक्षी कवचाय हुम्।

ऊँ कात्यायनी नेत्रत्रयाय वौषट् ।
ऊँ कौमारी अस्त्राय फट् ॥

ऊँ ह्लां हृदयाय नमः । ऊँ ह्लीं शिरसे स्वाहा । ऊँ ह्लूं शिखायै वषट् । ऊँ ह्लैं कवचाय हुम् । ऊँ ह्लौं नेत्रत्रयाय वौषट् । ऊँ ह्लः अस्त्राय फट् ।

दिग्बन्धः—ऊँ प्राच्यै दिशे नमः । इन्द्राय नमः ।
ऊँ आग्नेय्यै दिशे नमः । अग्नये नमः ।
ऊँ याम्यायै दिशे नमः । यमाय नमः ।
ऊँ नैर्ऋत्यै दिशे नमः । नैर्ऋत्यै नमः ।
ऊँ प्रतीच्यै दिशे नमः । वरुणाय नमः ।
ऊँ वायव्यै दिशे नमः । वायवे नमः ।
ऊँ उदीच्यै दिशे नमः । कुवेराय नमः ।
ऊँ ईशान्यै दिशे नमः । ईश्वराय नमः ।
ऊँ ऊर्ध्वायै दिशे नमः । ब्रह्मणे नमः ॥
ऊँ अधरायै दिशे नमः । अनन्ताय नमः ।
ऊँ भूः ऊँ भुवः ऊँ स्वः ओमिति दिग्बन्धनम् ॥

ध्यानम्—इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्र द्वयान्विताम् ।।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥1॥
इन्द्राक्षीं सहस्रयुवतीं नानालंकार भूषिताम् ।
प्रसन्न वदनाम्भोजामप्सरोगण सेविताम् ॥2॥

मन्त्र—ऊँ ऐं ह्लीं श्रीं क्लीं इन्द्राक्षी क्लीं श्रां ह्लीं ऐं ऊँ स्वाहा ॥

अष्टोत्तर शतं जप्त्वा सर्वसिद्धि प्रदायकम् ॥
इस मन्त्र की एक माला करके स्तोत्र पाठ करे ।

स्तोत्रम्

इन्द्राक्षी नाम सा देवी देवतैः समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गा नाम्नीति विश्रुता ॥1॥

कात्यायनी महादेवी चन्द्रघण्टा महातपा ।
सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥2॥
नारायणी भद्रकाली रुद्राणी कृष्णपिंगला ।
अग्नि ज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी ॥3॥
मेघश्यामा सहस्राक्षी विकटांगी जलोदरी ।
महोदरी मुक्त केशी घोररूपा महावला ॥4॥
आर्द्रजा भद्रजा नन्दा रोग हंता शिवप्रिया ।
शिवदूती कराली च प्रत्यक्ष परमेश्वरी ॥5॥
इन्द्राणी इन्द्ररूपा च इन्द्रशक्ति परायणा ।
सदा सम्मोहिनी देवी सुन्दरी भुवनेश्वरी ॥6॥
एकाक्षरी परब्रह्म स्थूल सूक्ष्म प्रवर्द्धिनी ।
वाराही नारसिंही च भीमा भैरव नादिनी ॥7॥
श्रुतिः स्मृति धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ।
अनन्ता विजया पूर्णा मानस्तोक पराजिता ॥8॥
भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा ।
शिवा भवानी रुद्राणी शंकरार्द्ध शरीरिणी ॥9॥
एतै र्नाम पदैर्दिव्यैः स्तुता शक्रेण धीमता ।
आयुरारोग्यमैश्वर्यं ज्ञानवित्तयशोवलम् ॥10॥
शतमावर्तयेद्यस्तु मुच्यते व्याधि वन्धनात् ।
आवर्तन सहस्रं तु लभते वाञ्छितं फलम् ॥11॥
राजानं च समाप्नोति इन्द्राक्षीं नात्रसंशयः ।
नाभिमात्रे जले स्थित्वा सहस्रपरिसंख्यया ॥12॥

जपेत्स्तोत्रमिदं मन्त्रं वाचासिद्धिर्भवेद् ध्रुवम् ।
सायं प्रात: पठेन्नित्यं षण्मासै: सिद्धिरुच्यते ॥13॥
संवत्सरमुपाश्रित्य सर्वकामार्थ सिद्धये ।
अनेन विधिना भक्ता: मन्त्रसिद्धि: प्रजायते ॥14॥
संतुष्टा च भवेद् देवी प्रत्यक्षं संप्रजायते ।
अष्टम्यां च चतुर्दश्यामिदं स्तोत्रं पठेन्नर: ॥15॥
धावतस्तस्य नश्यंति विघ्नसंख्या न संशय: ।
कारागृहे यदा वद्धो मध्यरात्रे तदा जपेत् ॥16॥
दिवसत्रयमात्रेण मुच्यते नात्र संशय: ।
सकामो जपते स्तोत्रं मन्त्रपूजाविचारत: ॥17॥
पंचाधिकैर्दशादित्यै रियं सिद्धिस्तु जायते ।
रक्त पुष्पै: रक्तवस्त्रै: रक्तचन्दन चर्चितै: ॥18॥
धूपदीपैश्च नैवेद्यै: प्रसन्ना भगवती भवेत् ।
एवं सम्पूज्य इन्द्राक्षोमिन्द्रेण परमात्मना ॥19॥
वरं लब्धं दिते: पुत्रा: भगवत्या: प्रसादत: ॥20॥
हरि: ओं तत्सत् ।

इति इन्द्राक्षीस्तोत्रम् सम्पूर्णम् ॥

इस इन्द्राक्षी स्तोत्र का अधिक महत्त्व है। महान् संकट में, मुकद्दमे में, जेल जाने पर, भीषण विपत्ति आने पर इसका निरन्तर पाठ करने से लाभ होता है।

20. श्रीमहालक्ष्म्यष्टक स्तोत्रम्

श्रीगणेशाय नमः

इन्द्रउवाच– नमस्तेऽस्तु महामाये श्री पीठे सुरपूजिते ।
शंख चक्र गदाहस्ते महालक्ष्मी नमोऽस्तु ते ॥1॥
नमस्ते गरुडारूढे कोलासुरभयङ्करी ।
सर्वपाप हरे देवि महालक्ष्मी नमोऽस्तु ते ॥2॥
सर्वज्ञे सर्ववरदे सर्वदुष्ट भयंकरी ।
सर्व पाप हरे देवि महालक्ष्मी नमोऽस्तुते ॥3॥
सर्वसिद्धिप्रदे देवि भुक्तिमुक्ति प्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मी नमोऽस्तुते ॥4॥
आद्यन्त रहिते देवि आद्यशक्ति महेश्वरि ।
योगजे योग सम्भूते महालक्ष्मी नमोऽस्तुते ॥5॥
स्थूल सूक्ष्मे महारौद्रे महाशक्ति महोदरे ।
महापाप हरे देवि महालक्ष्मी नमोऽस्तु ते ॥6॥
पद्मासन स्थिते देवि परब्रह्म स्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥7॥
श्वेताम्बर धरे देवि नानालंकार भूषणे ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥8॥
महालक्ष्यष्टकं स्तोत्रं यः पठेद् भक्तिमान्नरः ।
सर्वसिद्धिमाप्नोति राज्यं प्राप्नोति सर्वदा ॥9॥
एक काले पठेन्नित्यं राज्यं महापाप विनाशनम् ।
द्विकालं यः पठेन्नित्यं धनधान्य समन्वितः ॥09॥

त्रिकालं य: पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मी भवेन्नित्यं प्रसन्ना वरदाशुभा ॥11॥
इति इन्द्रकृतो महालक्ष्म्यष्टकस्तव: संपूर्ण: ।
॥ श्रीरस्तु ॥

इस स्तोत्र को करने के पश्चात् इस मन्त्र को करें ।

मन्त्र—उों श्रीं ह्रीं क्लीं त्रिभुवनपालिन्यै महालक्ष्म्यै अस्माकं दारिद्र्यं नाशय प्रचुरं धनं देहि देहि क्लीं ह्रीं श्रीं उों ।

दीपावली की रात्रि को इस इस मन्त्र का एक हजार जाप करके स्तोत्र का 108 वार पाठ करने से विशेप लाभ होता है ।

21. श्री विष्णुपुराणान्तर्गत प्रथमेऽंशे नवमेऽध्याये

महालक्ष्मी स्तोत्रम्

सिंहासनगत: शक्र: संप्राप्य त्रिदिवं पुन: ।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां तत: ॥1॥
इन्द्र उवाच—नमस्ते सर्व भूतानां जननीमब्जसंभवाम् ।
श्रियमुन्निद्र पद्माक्षीं विष्णु वक्षस्थल स्थिताम् ॥2॥
पद्मालयां पद्मकरां पद्मपत्र निभेक्षणाम् ।
वन्दे पद्ममुखीं देवीं पद्मनाभ प्रियामहम् ॥3॥
त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ।
सन्ध्या रात्रि: प्रभाभूतिर्मेधा श्रद्धा सरस्वती ॥4॥
यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्ति फलदायिनी ॥5॥
आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च ।

सौम्या सोम्यैर्जगद्रूपैः त्वयैतद् देवि परितम् ॥6॥
का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योग चिन्त्यं गदाभृतः ॥7॥
त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टं प्रायमभवत्त्वयेदानीं समेधितम् ॥8॥
दाराः पुत्रास्तथाऽऽगारं सुहृद्धान्यं धनादिकम् ॥
भवत्येतन्महाभागे नित्यं त्वद् वीक्षणान्नृणाम् ॥9॥
शरीरारोग्यमैश्वर्यमपरिपक्ष क्षयः सुखम् ।
देवि त्वद् दृष्टि दृष्टानां पुरुषाणां च दुर्लभम् ॥10॥
त्वमम्वा सर्वभूतानां देव देवो हरिः पिता ।
त्वयैतद् विष्णुना चाम्वा जगद् व्याप्तं चराचरम् ॥11॥
मानः कोशं तथा कोष्ठं मा गृहं मा परिच्छदम् ।
या शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥12॥
मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणम् ।
त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलाश्रये ॥13॥
सत्त्वेन सत्य शौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यजन्ते ते नराः सद्यः संत्यक्ता ये त्वयाऽमले ॥14॥
त्वयाऽवलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
कुलैश्वर्यैश्च युज्यन्ते पुरुषाः निर्गुणा अपि ॥15॥
स श्लाध्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः सच विक्रान्तो यस्त्वया देवि वीक्षितः ॥16॥
सद्यो वैगण्यमायान्ति शीलाद्याः सकलाः गुणाः ।
पराङ्मुखी जगद्धात्री यस्य त्वं विष्णु वल्लभे ॥17॥
न ते वर्णयितुं शक्ता गुणाञ्जिह्वापि वेधसः ।
प्रसीद देवि पद्माक्षि माऽस्मांस्त्याक्षीः कदाचन ॥18॥

पराशर उवाच—एवं श्रीः संस्तुता सम्यक् प्राह हृष्टा शतक्रतुम् ।
शृण्वतां सर्वदेवानां सर्व भूतस्थिता द्विज ॥19॥

श्रीरुवाच—परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे ।
वरं वृणीष्व भद्र त्वं वरदाहं तवागता ॥20॥

इन्द्र उवाच—वरदा यदि मे देवी वरार्हो यदि वाऽप्यहम् ।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वर: पर: ॥21॥
स्तोत्रेण यस्तवैतेन त्वां स्तोष्यत्यब्धि संभवे ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥22॥
श्रीरुवाच—त्रैलोक्यं त्रिदश श्रेष्ठं न संत्यक्ष्यामि वासव ।
दत्तो वरो मयाऽयं ते स्तोत्राराधन तुष्टया ॥23॥
यश्च सायं तथा प्रात: स्तोत्रेणानेन मानव: ।
मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥24॥
पराशर उवाच—एवं वरं ददौ देवी देवराजाय वै पुरा ।
मैत्रेय श्रीर्महाभागा स्तोत्राराधन तोषिता ॥25॥
भृगो: ख्यात्यां समुत्पन्ना श्री पूर्वमुदधे: पुन: ।
देवदानव यत्नेन प्रसूताऽमृतमन्थने ॥26॥
त्वया जगत्स्वामी देवराजो जनार्दन: ।
अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी ॥27॥
पुनश्च पद्मा संभूता यदाऽदित्योऽभवद् हरि: ।
यदा च भार्गवोरामस्तदाऽभूद् धरणीत्वियम् ॥28॥
राघवत्वेऽभवत्सीता रुक्मिणी कृष्ण जन्मनि ।
अन्येषु चावतारेषु विष्णोरेषाऽनपायिनी ॥29॥
देवत्वे देवदेहेयं मानुषत्वे च मानुषी ।
विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम् ॥30॥
यश्चैतच्छृणुयाज्जन्म लक्ष्म्याश्च पठेन्नर: ।
श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयम् ॥31॥
पठ्यते येषु चैवेष गृहेषु श्रीस्तवो मुने ।
अलक्ष्मी: कलहाधारा न तेष्वास्ते कदाचन ॥32॥
एतत्ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥33॥

इति सकलविभूत्यावाप्ति हेतु:, स्तुतिरियमिन्द्र मुखोद्गताहि लक्ष्म्या: । अनुदिनमिह पठ्यते नृभिर्यै: वसति न तेषु कदाचिदप्य लक्ष्मी: ॥

22. कृष्णयजुर्वेदीय चाक्षुषोपनिषद्

नेत्ररोग का हरण करने वाली पाठमात्र से सिद्ध होने वाली चाक्षुषी-विद्या की व्याख्या करते हैं। जिससे समस्त नेत्ररोगों का सम्पूर्णतया नाश हो जाता है और नेत्रतेजयुक्त हो जाते हैं। उस चाक्षुषीविद्या के ऋषि अहिर्बुध्न्य हैं, गायत्री छन्द है, सूर्यभगवान देवता हैं, नेत्ररोग की निवृत्ति के लिए इसका जप होता है।

विनियोग—अस्याश्चाक्षुषीविद्यायाया: अहिर्बुध्न्य ऋषि: गायत्री छन्द: सविता देवता चक्षूरोग निवृत्तये जपे विनियोग:।

चाक्षुषीविद्या

ॐ चक्षु: चक्षु: चक्षु: तेज: स्थिरोभव। मां पाहि पाहि। त्वरितं चक्षूरोगान् शमय शमय। मम जात रूपं तेजो दर्शय दर्शय। यथाहं अन्धो न स्यां तथा कल्पय कल्पय। कल्याणं कुरु कुरु। यानि मम पूर्वजन्मोपार्जितानि चक्षु: प्रतिरोधक दुष्कृतानि तानि सर्वाणि निर्मूलय निर्मूलय। ॐ नम: चक्षु स्तेजोदात्रे दिव्याय भास्कराय। ॐ नम: करुणाकरायाऽमृताय। ॐ नम: सूर्याय। ॐ नमो भगवते सूर्यायाक्षितेजसे। खेचराय नम:। महते नम:। रजसे नम:। तमसे नम:। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। उष्णो भगवान् शुचि रूप:। हंसोभगवान् शुचिरप्रति-रूप:। य इमां चाक्षुष्मतीविद्यां ब्राह्मणो नित्यमधीते न तस्याक्षिरोगो भवति। न तस्य कुले अन्धो भवति। अष्टौ ब्राह्मणान् ग्राहयित्वा विद्यासिद्धिर्भवति॥

उों विश्वरूपं घृणितं जातवेदसं हिरण्मयं ज्योति रूपं तपन्तं सहस्त्ररश्मिभि: शतधा वर्तमान: । पुर:प्रजाता-मुदयत्येष सूर्य: । उों नमो भगवते आदित्याय अवाग् वादिने स्वाहा ।

विशेष विधि—नेत्र रोगपीडित साधकों को चाहिए कि प्रतिदिन प्रात: काल हल्दी से अनार की कलम के द्वारा कांसे के पात्र में निम्नलिखित यन्त्र लिखे—

८	१५	२	७
६	३	१२	११
१४	९	८	१
४	५	१०	१३

मम चक्षूरोगान् शमयशमय

फिर इसी यन्त्र पर तांबे की कटोरी में चतुर्मुख (चारों ओर चार वत्तियों का) घी का दीपक जला कर रखें। तदनन्तर पुष्पादि यन्त्र का पूजन करे। फिर पूर्व की ओर मुखकरके बैठे। और हल्दी की माला से "उों ह्लीं हंस:" इस वीजमन्त्र की छ: माला जपकर नेत्रोपनिषद के कम से कम वारह पाठ करे। पाठ के पश्चात् फिर उपर्युक्त वीजमन्त्र की पांच मालाएं करे। तदनन्तर सूर्य भगवान् को श्रद्धा पूर्वक अर्घ्य देकर प्रणाम करे और मन से यह निश्चय करे कि मेरा नेत्ररोगशीघ्र ही दूर हो जाएगा। ऐसा करते रहने से इस उपनिषद का नेत्ररोग नाशक अद्भुत प्रभाव

बहुत शीघ्र देखने को मिलता है।

इस चाक्षुषोपनिषद् के पाठ के वाद सूर्यस्तुति को पढ़ना अत्यधिक फलप्रद होगा।

23. वगलामुखी मन्त्र

मन्त्र—ओं ह्लीं वगलामुखी सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ओं स्वाहा ॥

विनियोग:—ओं अस्य श्री वगलामुखी मन्त्रस्य नारद ऋषि: वृहती छन्द: वगलामुखी देवता शत्रूणां स्तम्भनार्थाय (ममाभीष्ट सिद्धये वा) जपे विनियोग: ॥

षडंगन्यास:—ओं ह्लीं हृदयाय नम:। वगलामुखी शिरसेस्वाहा।

सर्वदुष्टानां शिखायै वषट्। वाचं मुखंपदं स्तम्भय कवचाय हुम्। जिह्वां कीलय नेत्र त्रयाय वौषट्। बुद्धिं विनाशय ह्लीं ओं स्वाहा अस्त्राय फट् ॥

ध्यानम्—सौवर्णासन संस्थितां त्रिनयनां पीतांशु कोल्लासिनीम्। हेमाम्भांग रुचिं शशांक मुकुटां सच्चम्पकस्रग्युताम्। हस्तै:मुद्गरपाश वज्ररसना: संविभ्रतीं भूषण:, व्याप्तांगीम् वगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत ॥

जपसंख्या—इस मन्त्र का एक लाख जप करना चाहिए। चम्पा के फूलों से दस हज़ार आहुतियां देनी चाहिएं। यन्त्र का पूजन करना चाहिए।

विधानम्—एवं ध्यात्वा जपेल्लक्षं अयुतं वा।
चंपकोद्भवै. कुसुमै: जुहुयात्।
चन्दनागुरु चन्द्राद्यै: पूजार्थं यन्त्रमालिखेत्।
त्रिकोणषड्दलाष्टास्रषोडशारधरापुरम् ॥
मध्ये संपूजयेद् देवीं कोणे सत्त्वादिकान् गुणान्।
षट्कोणेषु षडंगानि मातृभैरव संयुता:।
संपूज्याष्ट दले पद्मे षोडशारे यजेदिमा:।

मंगलास्तम्भिनी चैव जृम्भिणी मोहिनी तथा ।
वश्याचला वलाका च भूधरा कल्मषाभिधा ।
धात्री च कलना कालकर्षिणी भ्रामिकापि च ।
मंद गमना च भोगस्था भाविकाषोडशीस्मृता ॥
भूगृहस्य चतुर्दिक्षु पूर्वादिषु यजेत्क्रमात् ।
गणेशं वटुकं चापि योगिनीं क्षेत्रपालकम् ।
इन्द्रादींश्च ततो वाह्ये निजायुध समन्वितान् ॥
इत्थं सिद्धमनुं मंत्री स्तम्भयेद्देवतादिकान् ।
पीतवस्त्रस्तदासीनः पीतमाल्यानुलेपनः ।
पीत पुष्पैर्यजेत् देवीं हरिद्रोत्थस्रजा जपन् ।
पीतां ध्यायेत् भगवतीं प्रयोगेषु अयुतं जपेत् ॥
त्रिमध्वक्त तिलैं र्होमो नृणां वश्यकरो मतः ।
मधुरत्रितयाक्तैः स्यादाकर्षो लवणैः ध्रुवम् ॥
तैलाभ्यक्तैः निंवपत्रैः होमो विद्वेष कारकः ॥
ताल लोणहरिद्राभिः द्विषां संस्तम्भनं भवेत् ।
अंगारधूमं राजीश्च माहिषं गुग्गुलं निशि ।
श्मशानपावके हुत्वा नाशयेदचिरानरीन् ॥
गरुतोगृध्रकाकानां कटु तैलं विभीतकम् ।
गृहधूमं चितावह्नौ हुत्वा प्रोच्चाटयेदरीन् ।
दूर्वां गुडूचीलाजान् यो मधुरत्रितयान्वितान् ।
जुहोति सोऽखिलान् रोगान् शमयेद् दर्शनादपि ॥
ब्रह्मचर्य व्रतो लक्षं जपेदखिल सिद्धये ।
एक वर्णगवी दुग्धं शर्करामधु संयुतम् ।
त्रिशतं मन्त्रितं पीतं हन्याद् विषपराभवम् ॥
श्वेतपलाश काष्ठेन रचितेरम्य पादुके ।
अलक्त लक्षं मन्त्रयेन्मनुनामुना सदा ॥
तदारूढ़ः पुमान् गच्छेत् क्षणेन शतयोजनम् ॥
पारदं च शिलां तालपिष्टं मधु समन्वितम् ।

मनुनामन्त्रयेल्लक्षं लिपेत्तेनाखिलां तनुम् ।
अदृश्य: स्यान्नृणामेष आश्चर्यं दृश्यतामिदम् ।
षट् कोणे विलिखेत् वीजं साध्यनामान्वितं मनो: ।
हरिताल निशाचूर्णैरुन्मत्तरस संयुतै: ।
शेषाक्षरै: समावीतं धरागेह विराजितम् ।
तद् यन्त्रं स्थापितं प्राणं पीतसूत्रेण वेष्टयेत् ।
भ्राम्यत् कुलालचक्रस्थां गृहीत्वा मृत्तिकां तया ।
रचयेत् वृषभं रम्यं यन्त्रं तन्मध्यत: क्षिपेत ।
हरितालेन संलिप्य वृषं प्रत्यहमर्चयेत् ।
स्तंभयेत् द्विषां वाचं गतिं कार्यपरम्पराम् ।
आदाय वाम हस्तेन प्रेतभूमिस्थ खर्परम् ॥
अंगारेण चितास्थेन तत्र यंत्रं समालिखेत् ।
मन्त्रितं निहितं भूमौ रिपूणां स्तंभयेद् गतिम् ।
प्रेत वस्त्रे लिखेद् यन्त्रं मंगारेणैव तत्पुन: ।
मंडूकबदने न्यस्येत् पीत वस्त्रेण वेष्टितम् ॥
पूजितं पीत पुष्पै: तद् वाचं संस्तम्भयेद् द्विषाम् ॥

आवरण पूजा—यन्त्र के मध्य में देवी का पूजन करना चाहिए तथा त्रिकोण में सत्त्व आदि गुणों की पूजा करनी चाहिए। षट्कोण में षडंगपूजा तथा अष्ट दल में भैरवों के साथ मातृकाओं का पूजन करना चाहिए। षोडश दल में इन शक्तियों का पूजन करना चाहिए। मंगला, स्तंभिनी, जृम्भिनी, मोहिनी, वश्या, चला, वलाका, भूधरा, कलमषा, धात्री, कलना, कालकर्षिणी, भ्रामिका, मन्दगमना, भोगस्था एवं भाविका ये 16 शक्तियां कही गई हैं। भूपुर की पूर्व आदि चार दिशाओं में गणेश, वटुक, योगिनी एवं क्षेत्रफल का पूजन करना चाहिए और फिर उसके वाहर अपने आयुधों के साथ इन्द्र आदि दिक्पालों का पूजन करना चाहिए। इस प्रकार पूर्व आदि में पूजा करके सिद्धमन्त्र से मन्त्रित देवता आदि सभी को स्तम्भित कर सकता है।

काम्यप्रयोग—पीले वस्त्र, पीले आसन पर बैठकर पीली माला धारण कर तथा पीला चन्दन लगाकर साधक पीले पष्पों से देवी की पूजा

करे। तथा पीतवर्णा देवी के स्वरूप का ध्यान करते हुए काम्य प्रयोगों में हल्दी की माला पर 10 हजार जप करना चाहिए।

त्रिमधु मिश्रित तिलों के होम से मनुष्यों को वश में किया जाता है। मधुत्रय मिश्रित लवण के होम से निश्चित रूप से आकर्षण होता है। तैल मिलाकर नीम के पत्तों का होम करने से विद्वेषण होता है। लाल लोण एवं हरिद्रा के होम से शत्रुओं का स्तम्भन होता है। श्मशान की अग्नि में रात्रि के समय अंगार, धूप, राजी एवं गुग्गल की आहुतियां देने से शत्रुओं का नाश होता है।

शिवालय, घोर जंगल, नदियों के संगम में एक लाख संख्या में जप करने से सब सिद्धियां मिलती हैं।

हरिताल एवं हल्दी के चूरे में धतूरे का रस मिलाकर उससे षट्-कोण में 'ह्लीं' वीज के साथ शत्रु के नाम के साथ 'स्तम्भय' लिखें। फिर मन्त्र के शेष अक्षरों से उसे वेष्टित कर भूपुर बनावे, उस यन्त्र में प्राण प्रतिष्ठा कर पीले धागे से वेष्टित करे फिर घूमती हुई कुम्हार की मिट्टी लेकर सुन्दर वैल बनावे तथा उसके बीच में इस यन्त्र को रख दें। फिर उस पर हरताल का लेप कर प्रतिदिन वैल का पूजन करें। ऐसा करने से शत्रु का सम्मान होगा।

24. त्रिपुरवाला-मन्त्र

विनियोग:—ओं अस्य श्री त्रिपुर बालामन्त्रस्य दक्षिणामूर्ति: ऋषि: पंक्ति: छन्द: त्रिपुरवाला देवता, क्लीं शक्ति: सौ: वीजम् ममाभीष्ट सिद्धये जपे विनियोग: ॥

न्यास—शरीर में नाभि से पैरों तक प्रथम बीज, हृदय से नाभि तक द्वितीय वीज, तथा शिर से हृदय तक तृतीय वीज का न्यास करना चाहिए।

ओं ऐं नम: नाभे: पादान्तम्। ओं क्लीं नम: हृदयान्नाभ्यन्तम्। ओं सौं: नम: मूर्ध्नि हृदन्तम् ॥

इसके वाद वायें हाथ में प्रथम वीज, दाहिने हाथ में द्वितीय वीज,

दोनों हाथों में तृतीय बीज का न्यास करना चाहिए ।

ओं ऐं नम: वाम करे। ओं क्लीं नम: दक्षिण करे, ओं सौ: नम: करयोरुभयो: ।

फिर शिर, गुप्तांग, एवं वक्ष स्थल में क्रमश: तीनों बीजों का न्यास करना चाहिए ।

ओं ऐं नम: मूर्ध्नि । ओं क्लीं नम: गुह्ये । ओं सौ: नम: वक्षे ॥

नवयोनि न्यास—

ओं नम: वाम कर्णे । क्लीं नम: दक्षिण कर्णे । सौ: नम: चिवुके ।
ऐं नम: वाम गण्डे । क्लीं नम: दक्षिण गण्डे । सौ: नम: मुखे ॥
ऐं नम: वामनेत्रे । क्लीं नम: दक्षिण नेत्रे । सौ: नम: नासिकायाम् ।
ऐं नम: वाम स्कन्धे । क्लीं नम: दक्षिण स्कन्धे । सौ: नम: उदरे ॥
ऐं नम: वाम कूर्परे । क्लीं नम: दक्षिण कूर्परे । सौ: नभ: नाभौ ॥
ऐं नम: वाम जानौ । क्लीं नम: दक्षिणजानौ । सौ: नम: लिंगोपरि ।

त्रिपुरवाला के मन्त्रों का भेद

1. ह्लीं क्लीं ह्सौ:=त्र्यक्षर मन्त्र ।
2. ऐं क्लीं सौ: सौ: क्लीं ऐं=षडक्षर मन्त्र ।
3. श्रीं क्लीं ह्लीं ऐं क्लीं सौ: ह्लीं क्लीं श्रीं=नवार्ण मन्त्र ।
4. ऐं क्लीं सौ: वालात्रिपुरे स्वाहा=दशार्ण मन्त्र ।
5. ऐं क्लीं ह्सौ: वाला त्रिपुरे सिद्धि देहि नम:=चतुर्दशाक्षर ।
6. ऐं श्रीं क्लीं त्रिपुरा भारती कवित्वं देहि स्वाहा । षोडशाक्षर ।
7. श्रीं ह्लीं क्लीं त्रिपुरामालिनि मह्यं सुखं देहि स्वाहा । सप्तदशाक्षर ।
8. ह्लीं ह्लीं ह्लीं प्रौढ त्रिपुरे आरोग्यं ऐश्वर्यं देहि स्वाहा । अष्टादशाक्षर ।
9. ह्लीं श्रीं क्लीं त्रिपुरामदने सर्वशुभं साधय स्वाहा ॥ ,,
10. ह्लीं श्रीं वालात्रिपुरे मदायत्तां विद्यां कुरु नम: स्वाहा ॥ विंशत्यक्षर ।
11. ह्लीं श्रीं क्लीं परापरे त्रिपुरे सर्वमीप्सितं साधय स्वाहा । ,,

12. क्लीं क्लीं श्रीं श्रीं ह्लीं ह्लीं त्रिपुरा ललिते मदीप्सितं योषितं देहि वांछितं कुरु स्वाहा। अष्टाविंशति:।

13. 'क्लीं क्लीं क्लीं श्रीं श्रीं श्रीं ह्लीं ह्लीं ह्लीं त्रिपुर सुन्दरि सर्वजगन्मम वशं कुरु कुरु मह्यं वलं देहि स्वाहा ॥

॥ पंच त्रिंशदक्षरात्मक:।

ऐं नम: वामपादे।	क्लीं नम: दक्षिणपादे।	सौ: नम: गुह्ये।
ऐं नम: वामपार्श्वे।	क्लीं नम: दक्षिणपार्श्वे।	सौ: नम: हृदि।
ऐं नम: वामस्तने।	क्लीं नम: दक्षिणस्तने।	सौ: नम: कण्ठे।

रत्यादि न्यास:—

ऐं रत्यै नम: गुह्ये।	सौ: अमृतेश्यै: नम: गुह्ये।
सौ: प्रीत्यै नम: हृदि	क्लीं योगेश्यै नम: हृदि।
क्लीं मनोभवायै नम: भ्रूमध्ये।	ऐं विश्वयोन्यै नम: भ्रूमध्ये ॥

मूर्ति न्यास—ह्लीं मनोभवाय नम: शिरसि। क्लीं मकरध्वजाय नम: गुह्ये। ऐं कन्दर्पाय नम: हृदि। ब्लूं मन्मथाय नम: गुह्ये। स्त्रीं कामदेवाय नम: चरणयो: ॥

वाणन्यास:—द्रां द्राविण्यै नम: शिरसि। द्रीं क्षोभिन्यै नम: पादयो:। क्लीं वशीकरण्यै नम: मुखे। ब्लूं आकर्षण्यै नम: गुह्ये। स: सम्मोहिन्यै नम: हृदि ॥

षडङ्गन्यास:—सौ: क्लीं ऐं हृदयाय नम:। सौ: क्लीं ऐं शिरसे स्वाहा। सौ: क्लूं ऐं शिखायै वषट्। सौ: क्लैं ऐं कवचाय हुम्। सौ: क्लीं ऐं नेत्र त्रयाय वौषट्। सौ: क्ल: ऐं अस्त्राय फट् ॥

ध्यानम्—रक्ताम्वरां चन्द्रकलावतंसां।
समुद्यदादित्य निभां त्रिनेत्राम्।
विद्याक्षमालाभय दान हस्तां।
ध्यायामि वालामरुणाम्वुजस्थाम् ॥

मन्त्र—ओं ऐं क्लीं सौ: त्रिपुरवालायै स्वाहा ॥

जपसंख्या—इस मन्त्र का तीन लाख जप करना चाहिए। मधु-सहित टेसू के फूलों या कनरे के फूलों से दशांश होम करना चाहिए। नव

योनि वाले यन्त्र के बाहर अष्टदल और उसे भूपुर से वेष्टित कर यन्त्र का पूजन करे।

---

25. कर्णपिशाचिनी मन्त्र:

विनियोग:—ऊँ अस्य कर्णपिशाचिनी मन्त्रस्य पिप्पलाद-ऋषि: निचृत् छन्द: कर्णपिशाचिनी देवता ममाभीष्ट सिद्धये जपे विनियोग:।

षडङ्गन्यास:—ऊँ हृदयाय नम:। ऊँ ह्लीं शिरसे स्वाहा। ऊँ कर्ण-पिशचिनि शिखायै वषट्। ऊँ कर्णे मे कवचाय हुम्। ऊँ कथय नेत्रत्रयाय वौषट्। ऊँ स्वाहा अस्त्राय फट्।

ध्यानम्—चितासनस्थां नरमुण्डमालाम्,
विभूषितामस्थि मणीन् कराब्जै:।
प्रीतां नरान्त्रैर्दधतीं कुवस्त्रां,
भजामहे कर्णपिशचिनीं ताम्॥

मन्त्र—ऊँ ह्लीं कर्णपिशाचिनि कर्णे मे कथय स्वाहा॥

प्रयोगविधि:—श्मशान में वैठकर या शव पर वैठकर एकाग्रमन से इस 16 अक्षर वाले मन्त्र का एक लाख जप करना चाहिए। तथा विभीतक की समिधाओं द्वारा अग्नि में दशांश होम करना चाहिए।

पूर्वोक्त पीठ पर षडङ्ग पूजा, दिक्पाल एवं उनके आयुध सहित देवी का पूजन करना चाहिए। इस प्रकार मन्त्रसिद्ध हो जाने पर वेर के पेड़ के नीचे अपवित्रता पूर्वक एक लाख मन्त्र का जप करना चाहिए। इससे सन्तुष्ट होकर पिशाचिनी दूसरों के मन की बात तथा भरैवी घटनाओं को कान में वतला देती है।

26. पुत्रप्रदकृष्ण-मन्त्र (सन्तानगोपालमन्त्र)

विनियोग:—ऊँ अस्य श्री सन्तान गोपाल मन्त्रस्य नारद ऋषि:

अनुष्टुप् छन्द: सुतप्रद: कृष्णो देवता ममाभीष्ट सिद्धये जपे विनियोग: ।

मन्त्र:—ओं क्लीं देवकी सुत गोविन्द वासुदेव जगत्पते । देहिमे तनयं कृष्ण त्वामहं शरणं गत: ।।

न्यास:—देवकीसुत गोविन्द हृदयाय नम: । वासुदेव जगत्पते शिरसे स्वाहा । देहि मे तनयं कृष्ण शिखायैवषट् । त्वामहं शरणं गत: कवचाय हुम् । देवीति (संपूर्णपाठ पढ़कर) । अस्त्रायफट् ।

ध्यान—विजयेन युतो रथस्थित: प्रसभानीय समुद्रमध्यत: ।
प्रददत्तनयान् द्विजन्मने स्मरणीयो वसुदेव नन्दन: ।।

जपसंख्या—इस मन्त्र का एक लाख जप करना चाहिए । मधु, घी एवं शक्कर मिश्रित तिलों से दस हज़ार आहुति डालनी चाहिए । एक हज़ार तर्पण हो, एक सौ मन्त्र द्वारा मार्जन हो ।

प्रतिदिन भगवान् वासुदेव का विधिपूर्वक पूजन करना चाहिए । श्री वासुदेव कृष्ण पर विश्वास रखते हुए जप करने से कामना सिद्धि होती है ।

27. गारुडमन्त्र प्रयोग:

विनियोग:—ओं अस्य श्री गरुड मन्त्रस्य अनन्त ऋषि: पंक्ति: छन्द: पक्षीन्द्रो देवता ओं बीजं स्वाहा शक्ति: ममाभीष्ट सिद्धये जपे विनियोग: ।।

मन्त्र:—क्षिप ओं स्वाहा । इति पंचार्ण: मन्त्र: ।



सर्पभयहर यन्त्र

षडंगन्यास:—ओं ज्वल ज्वल महामति स्वाहा हृदयाय ।
ओं गरुड चूडानन स्वाहा शिरसि ।
ओं गरुड शिखेस्वाहा—शिखायाम् ।
ओं गरुड प्रभंजय प्रभंजय प्रभेदय प्रभेदय ।
वित्रासय वित्रासय विमर्दय विमर्दय स्वाहा हुं कवचाय ।
उग्ररूपधर सर्व विषहर भीषय भीषय सर्व दहदह भस्मी कुरु कुरु स्वाहा नेत्रत्रयाय ।
अप्रतिहतवल्या प्रतिहत शासन हुं फट् स्वाहा अस्त्राय ।

ध्यानम्—तप्त स्वर्ण निभं फणीन्द्र निकरै: कलृप्तांग भूषं प्रभुम् ।
स्मतृ णां शमयन्तमुग्रमखिलं नृणां विषं तत्क्षणात् ।
चंच्वग्र प्रचलद् भुजंगमभयं पाण्योर्वरं विभ्रतम्,
पक्षोच्चारित सामगीत ममलं श्री पक्षिराजं भजे ।।

मन्त्र—2. ॐ आं क्रौं ह्रीं ऐं क्लीं ह्रौं देवि श्री पद्मावति त्रिपुर काम साधिनि दुर्जनमति विनाशिनि त्रैलोक्य क्षोभिणि श्री पार्श्वनाथ उपसर्ग निवारिणि क्लीं क्लीं मम दुष्टान् हन हन क्लीं क्लीं मम सर्वकार्याणि साधय-साधय कुरु स्वाहा ॥

21 दिन में 12500 जाप करना, पश्चात् प्रतिदिन एक माला करने से ऋद्धि-वृद्धि की प्राप्ति होती है ।

मन्त्र—3. ॐ ह्रीं श्रीं धरणेन्द्र पद्मावती सहि-

ताय श्री शंखेश्वर पार्श्वनाथाय नमः ।।

तेला का तप करके 12500 मन्त्र का जाप करे । पश्चात् त्रिकाल एक-एक माला करने से सर्व कार्यसिद्धि होती है ।

मन्त्र—4. उों ह्रीं श्रों क्लींश्री पार्श्वनाथाय नमः पद्मावती सहिताय नमः धरणेन्द्रपूजिताय नमः लक्ष्मीं देहि देहि फट् स्वाहा ।।

इस मन्त्र का 1100 जाप 21 दिन तक नियम बद्ध करना चाहिए। पश्चात् कार्यसिद्धि तक एक माला प्रतिदिन करे । यह मन्त्र लक्ष्मी प्राप्ति में सहायक होगा ।

11. भूत-प्रेत वाधा को दूर करने का सर्व सिद्धमन्त्र

मन्त्र—उों नमो भगवते श्री पार्श्वनाथाय ह्रीं धरणेन्द्र पद्मावती सहिताय अट्टे मट्टे भूतविघट्टे भूतान् स्तम्भय स्तम्भय, क्षुद्रान् स्तम्भय स्तम्भय, दुष्टान् निग्रह-निग्रह चोरान् बन्धय-बन्धय मम सर्व वशी कुरु कुरु स्वाहा ।।

पार्श्वनाथ के जन्म दिन पर पवित्र होकर पार्श्वनाथ की प्रतिमा को सामने पट्टे पर बैठाकर चमेली के फूलों से, अष्ट द्रव्यों से पूजाकर पांच माला फेरे । कुल संख्या 21 हज़ार हो । इससे यह मन्त्रसिद्ध हो जाएगा । पूजन-जब तक मन्त्र संख्या पूरी न हो तब तक प्रतिदिन करना चाहिए ।

जब किसी को कोई वाधा उत्पन्न हो जाए—इस मन्त्र से 108 वार अभिमन्त्रित जल को पिलाने से भूत वाधा दूर होगी ।

मन्त्र—2. उों नमो भगवते श्री पार्श्वनाथाय श्री

धरणेन्द्र पद्मावती सहिताय अट्टे मट्टे भूतविघट्टे भूतान् स्तम्भय स्तम्भय छिन्धि छिन्धि भिन्दि भिन्दि मारय मारय स्वाहा ।

तीन आयम्बिल करके 12500 संख्या में जप करना चाहिए ।

जब भी किसी की भूत बाधा हो तो इस मन्त्र से अभिमन्त्रित जल पिलाने से, या अभिमन्त्रित सात इलायची खिलाने से भूतबाधा से छुटकारा मिल जाता है ।

12. शत्रु-उच्चाटन मन्त्र

मन्त्र—ओं आं क्रों ह्रीं श्रीं ऐं क्लीं ह्नौं देवि पद्मावति अमुकं (यहां उस शत्रु का नाम देना चाहिए) उच्चाटनं कुरु कुरु स्वाहा ।

राई, सरसों, धोसा, आंवली, नमक, शत्रु के पैरों की धूल, चौराहे की धूल । इन सब को मिला कर शत्रु का रूप बनाएं, उस पर शत्रु का नाम अंकित करें ।

सवा लाख की संख्या में जाप करें । मीठे तेल का दीपक जलाएं ।

जाप के पूरा होने पर—हवन कुण्ड बनाएं । हवन कुण्ड के नीचे शत्रु का नाम लिखें ।

सेती सरसों, गुग्गल, लाल कनेर के फूलों को मिलाकर गोलियां बनाएं । उन गोलियों को मीठे तेल में भिगोकर—आक की लकड़ियों पर आहुति डालें ।

खैर की लकड़ी का कीला 12 अंगुल लम्बा बनाकर रविवार की सन्ध्या के समय दक्षिण दिशा में कीला गाढ देवे । फिर प्रतिदिन 108 वार इस मन्त्र का जप कर लाल कनेर के फूलों से पूजा करे । प्रतिदिन एक-एक अंगुल कील ज़मीन में गाडता जाए । 12 दिन में समाप्त करके शत्रु का उच्चाटन निश्चय होगा ।

13. शान्तिकारक-मृत्युंजय मन्त्र

मन्त्र—ओं ह्रीं णमो अरहन्ताणं, ओं ह्रीं णमो सिद्धाणं, ओं ह्रीं णमो आयरियाणं, ओं ह्रीं णमो उवज्झायाणं, ओं ह्रीं णमो लोए सव्वसाहूणं मम सर्व-ग्रहारिष्टान् निवारय निवारय अपमृत्युं घातय सर्वं शान्तिं कुरु कुरु स्वाहा।

जैन शास्त्रों में नवकार मन्त्र की बहुत महिमा है। उस मन्त्र का जाप प्रायः सभी जैन सम्प्रदाय भक्तिभावना से करता है। उसी मन्त्र से वेष्टित यह मन्त्र है—जिससे सभी प्रकार के अरिष्ट ग्रहों का प्रभाव दूर होता है—तथा अपमृत्यु को दूर करता है।

इस मन्त्र का 31000 जाप करना चाहिए। जप की समाप्ति पर दशांश हवन करना चाहिए।

14. धनवृद्धिकर मन्त्र

मन्त्र—ओं णमो अरहन्ताणं ओं णमो सिद्धाणं ओं णमो आयरियाणं ओं णमो उवज्झायाणं ओं णमो लोए सव्वासाहूणं ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्वाहा।

पुष्य नक्षत्र के दिन पीले वस्त्र पहन कर, पीले आसन पर बैठकर पीली माला से इस मन्त्र का सवा लाख जाप करना चाहिए।

पुष्य नक्षत्र वाले दिन से आरम्भ कर पुष्य नक्षत्र वाले दिन ही समाप्त करना चाहिए। 27 दिन के अनुष्ठान का विधान है।

मन्त्र जाप के समय धूप-दीप जलाए। मन्त्र के जप की समाप्ति पर दशांश हवन करे।

अतुलधन-सम्पत्ति की प्राप्ति होती है। इस मन्त्र को करने से पूर्व अंगन्यास करना चाहिए—

करन्यासः

ओं ह्लीं णमो अरहंताणं स्वाहा=अंगुष्ठाभ्यां नमः।
ओं ह्लीं णमो सिद्धाणं स्वाहा=तर्जनीभ्यां नमः।
ओं ह्लीं णमो आयरियाणं स्वाहा=मध्यमाभ्यां नमः।
ओं ह्लीं णमो उवज्झायाणं स्वाहा अनामिकाभ्यां नमः।
ओं ह्लीं णमो लोए सव्वसाहूणं स्वाहा—कनिष्ठिकाभ्यां नमः।
ओं ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः—करतल करपृष्ठाभ्यां नमः॥

अंगन्यास

ओं ह्लां हृदयाय नमः।
ओं ह्लीं शिरसे स्वाहा।
ओं ह्लूं शिखायै वषट्।
ओं ह्लैं कवचाय हुम्।
ओं ह्लौं नेत्रंत्रयाय वौषट्।
ओं ह्लः अस्त्राय फट्।

ओं ह्लीं क्रौं स्वर्ण वर्णे सर्वलक्षण सम्पूर्णे स्वायुधवाहन, वधूचिन्ह परिवार सहितं पद्मावती देवी अवतर अवतर तिष्ठ तिष्ठ—ठः ठः मम सन्निहतो भव वषट्=इस मन्त्र से भगवती पद्मावती देवी का आवाहन करे।

ओं ह्लीं क्रौं स्वर्ण वर्णे सर्वलक्षण सम्पूर्णे स्वायुध वाहन वधूचिन्ह परिवार सहित पद्मावती देवी जलं गृह्ण गृह्ण स्वाहा।

इस मन्त्र को पढ़ते हुए जल, चन्दन, पुष्प, धूप, दीप, अक्षत नैवेद्य फल, वस्त्र, अलंकार चढ़ाए।

15. रोगनिवारण मन्त्र

मन्त्रजाप आरम्भ करने से पूर्व—

ओं श्री गणधर प्रसादात् एष योगः फलतु—ऐसा पढ़ें।

मन्त्र—ओं णमो आमोसहि लद्धिणं ओं णमो विप्पो-सहि लद्धिणं ओं णमो खेलोसहि लद्धिणं ओं णमो जल्लो-

सहि लद्धिणं ॐ णमो सव्वोसहि लद्धिणं एर्णसि रोगोप-समणे पसिज्ज उ स्वाहा ।

सर्वप्रथम 12500 इस मन्त्र का जाप कर इसे सिद्ध करना चाहिए। फिर जिस रोगी के निमित्त करना हो—उस दिन 108 बार इस मन्त्र का जप कर अभिमन्त्रित दूध या अभिमन्त्रित जल पिलावे। 7 दिन या 14 दिन निरन्तर इस विधि को करने से रोग शान्त हो जाता है।

16. मनोवाञ्छित कार्यसिद्धि मन्त्र

मन्त्र—ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः असि आउसाय नमः ॥

इस मन्त्र का त्रिकाल जाप करने से सब प्रकार की मनोकामनाएं पूर्ण होती हैं।

17. शत्रुनिवारणमन्त्र

मन्त्र—ॐ ह्लीं असिआउसा सर्वदुष्टान् स्तंभय स्तंभय मोहय मोहय अंधय अंधय मूकवत्कारय कुरु कुरु ह्लीं दुष्टान् (शत्रून्) ठः ठः ठः स्वाहा।

इस मन्त्र का सवा लाख जप करने से शत्रुओं का नाश होता है।

सर्वसिद्धिकरमन्त्र

नवकार मन्त्र का यह संक्षिप्त रूप है। प्रत्येक पद का प्रथम अक्षर अ, सि, आ, उ, सा के मेल से इसका निर्माण हुआ है।

यह अनेक सिद्धियों को देने वाला और आपत्तिकाल में हर प्रकार की सहायता पहुंचाने वाला महाप्रभावी मन्त्र है।

उक्त मन्त्र की साधना में इस ढंग को अपनाया जाए—कि प्रथम अक्षर अकार का नाभिकमल में ध्यान किया जाए, दूसरे अक्षर सि का मस्तक में, तीसरे आ का मुखकमल में, चौथे उ का हृदय कमल में पांचवें स का कण्ठ में ध्यान करना चाहिए।

मन को एकाग्र करने में यह प्रक्रिया विशेष शक्ति प्रदान करती है।

नोट—विशेष विपत्ति में इस मन्त्र का जाप प्रतिदिन तीन काल करना चाहिए। प्रातः, सायं, मध्यान्ह, तीनों समय 1100-1100 संख्या में जाप हो।

40 दिन तक यह प्रक्रिया चलनी चाहिए। यह अभूतपूर्व फलप्रद है।

मन्त्र—उों ह्रीं ह्रीं ह्रूं ह्रौं ह्रः असिआउसाय नमः।

18. कर्णपिशाचिनी देवी का मन्त्र

मन्त्र—उों ह्रीं अर्हं णमो जिणाणं, लोगुत्तमाणं लोग नाहाणं, लोग हियाणं लोग पईवाणं लोग पज्जोयगराणं मम शुभाशुभं दर्शय दर्शय, कर्णपिशाचिनी नमः स्वाहा ॥

प्रतिदिन स्नान कर, शुद्ध वस्त्र पहनकर पूर्व की ओर मुख करके, रुद्राक्ष की माला पर जाप करें। दशों दिशाओं में एक एक माला करें, 21 दिन तक यही क्रम रहे। तथा रात्रि को एक माला कर जमीन पर सोएं। चन्दन घिस कर कान पर लगाएं। स्वप्न में प्रश्न का पूर्ण उत्तर प्राप्त होगा।

दूसरा मन्त्र—उों कर्णपिशाचिनी महादेवी रति प्रिये स्वप्न कामेश्वरी पद्मावती त्रैलोक वार्ता कथय कथय स्वाहा।

विधि—एकान्त कमरे का चयन करें, उसमें अगरवत्ती जलाएं, पूर्व की ओर मुख करके वैठ जाएं। प्रतिदिन एक माला फेरें। माला करते समय अगरवत्ती अवश्य जलती रहे। जिस दिन साधना प्रारम्भ करें उस दिन उपवास रखना चाहिए। नौ दिन साधना करनी है। अन्तिम दिन खाण्ड व गुग्गल से हवन करें। उसी कमरे में सोना चाहिए। प्रतिदिन

कुंआरी लड़की को खीर-रोटी से भोजन कराएं। तीसरे दिन उस लड़की को एक चुनरी, एक कांचली, व कुछ दक्षिणा देनी चाहिए।

फिर प्रतिदिन एक माला करनी चाहिए। जब कोई प्रश्न पूछे तो दाहिना हाथ दाहिने कान पर रखकर सात वार मन्त्र को पढ़ें, प्रश्न का उत्तर मिल जाएगा।

19. रोगनिवारकनमस्कारमन्त्र

मन्त्र—ओं णमो आमो सहि पत्ताणं ओं णमो खेलो-सहि पत्ताणं, ओं णमो जल्लो सहि पत्ताणं ओं णमो सव्वो-सहि पत्ताणं स्वाहा ॥

इस मन्त्र की प्रतिदिन एक माला करने से सर्व प्रकार के रोगों की पीड़ा शान्त हो जाती है।

नवग्रह पीड़ा निवारण नमस्कार मन्त्र

सूर्य—ओं ह्लीं णमो सिद्धाणम्।
दस माला का जाप प्रतिदिन।
चन्द्र—ओं ह्लीं णमो अरहन्ताणं।
दस माला का जाप प्रतिदिन।
मंगल—ओं ह्लीं णमो सिद्धाणं।
ओं ह्लीं वासु पूज्य प्रभवे नम: मम शान्तिं कुरु कुरु स्वाहा।
बुध—ओं ह्लीं णमो उवज्झायाणं।
श्री शान्तिनाथ प्रभवे नम: मम शान्तिं कुरु कुरु स्वाहा।
गुरु—ओं ह्लीं णमो आयरियाणं।
ओं ह्लीं ऋषभदेव प्रभवे नम: मम शान्तिं कुरु कुरु स्वाहा।
शुक्र—ओं ह्लीं णमो अरहन्ताणं।
ओं ह्लीं सुविधिनाथ प्रभवे नम: मम शान्तिं कुरु कुरु स्वाहा।
शनि—ओं ह्लीं णमो लोए सव्वसाहूणं।
ओं ह्लीं मुनिसुव्रत प्रभवे नम: मम शान्तिं कुरु कुरु स्वाहा।

राहु—उों ह्रीं णमो लोए सव्वसाहूणं ।
उों ह्रीं नमिनाथ प्रभवे नम: मम शान्तिं कुरु कुरु स्वाहा ।
केतु—उों ह्रीं णमो लोए सव्वसाहूणम् ।
उों ह्रीं श्रीं पार्श्वनाथाय नम: मम शान्तिं कुरु कुरु स्वाहा ।

श्री परमात्म-द्वात्रिंशिका

20. स्तोत्रम्

(आचार्य अमितगति)

जैन सम्प्रदाय में आचार्य अमित गति का महत्त्वपूर्ण स्थान है। वे अपने समय में लब्धिधारी वेद-वेदांग पारंगत मनीषी थे। उन द्वारा रचित यह स्तोत्र मनुष्य के अन्तर्मन को शुद्ध कर. प्रायश्चित्त रूप में सर्वकषायों को धोकर—प्रभु चरणों में समर्पित होने की प्रेरणा देता है। यह एक ऐसा स्तोत्र है जो सम्प्रदाय से वद्ध नहीं। अपितु उदार हृदय की पराकाष्ठा है। प्रतिदिन शुद्ध हृदय से इसका पाठ करने से मनुष्य के समस्त कषाय धुल जाएंगे, वह निर्मल आत्मा होकर प्रभुस्वरूप को प्राप्त करने में समर्थ हो सकेगा।

1. सत्त्वेषु मैत्रीं गुणिषु प्रमोदं,
क्लिष्टेषु जीवेषु कृपापरत्त्वम् ।
माध्यस्थ भावं विपरीत वृत्तौ,
सदा ममात्मा विदधातु देव ॥

2. शरीरत: कर्तुमनन्तशक्तिं
विभिन्नमात्मानमपास्त दोषम् ।
जिनेन्द्र ! कोषादिव खड्ग यष्टिं,
तव प्रसादेन ममास्तु शक्ति: ॥

3. दु:खे सुखे वैरिणी बन्धुवर्गे
योगे वियोगे भवने वने वा ।
निराकृताशेषममत्व बुद्धे:,
समं मनो मेऽस्तु सदाऽपि नाथ ॥

4. मुनींश । लीनाविव कीलिताविव,
स्थिरौ निखाताविव विम्वताविव ।
पादौ त्वदीयौ मम तिष्ठतां सदा,
तमो धुनानौ हृदि दीपकाविव ॥

5. एकेन्द्रियाद्या: यदि देव ! देहिन:,
प्रमादत: संचरता यतस्तत: ।
क्षता विभिन्ना मिलिता निपीड़िता,
ममास्तु मिथ्या दुरनुष्ठितं तद् ॥

6. विमुक्ति मार्ग प्रतिकूल वर्तिना,
मया कषायाक्ष वशेन दुर्धिया ।
चारित्रशुद्धेर्यदकारि लोपनं,
तदस्तु मिथ्या मम दुष्कृतं विभो ॥

7. विनिन्दनालोचन-गर्हणैरहं,
मनो वच: काय-कषाय निर्मितम् ।
निहन्मि पापं भवदु:ख कारणं
भिषग् विषं मन्त्र गुणैरिवाखिलम् ॥

8. अतिक्रमं यं यमपि व्यतिक्रमं,
जिनातिचारं स्व चारित्रकर्मण: ।
व्यधामनाचारमपि प्रमादत:,
प्रतिक्रमं तस्य करोमि शुद्धये ॥

9. क्षतिं मन: शुद्धि-विधेरतिक्रमं
व्यतिक्रमं शील वृतेर्विलंघनम् ।
प्रभोऽतिचारं विषयेषु वर्तनम्,
वदन्त्यनाचारमिहाति सक्तताम् ॥

10. यदर्थ मात्रा-पद-वाक्यहीनं
मया प्रमादाद् यदि किंचनोक्तम् ।
तन्मे क्षमित्वा विदधातु देवी,
सरस्वती केवल-बोध लब्धिम् ॥

11. वोधिः समाधिः परिणाम शुद्धिः,
स्वात्मोपलब्धिः शिवसौख्यसिद्धिः ।
चिन्तामणिं चिन्तित वस्तुदाने,
त्वां वन्द्यमानस्य ममास्तु देवी ।।

12. यः स्मर्यते सर्वमुनीन्द्र-वृन्दैर
यः स्तूयते सर्वनरामरेन्द्रैः ।
यो गीयते वेद पुराण शास्त्रैः,
स देव-देवो हृदये ममास्ताम् ।।

13. यो दर्शन-ज्ञान-सुखस्वभावः,
समस्तसंसार-विकार-वाह्यः ।
समाधिगम्यः परमात्म संज्ञः,
स देव देवो हृदये ममास्ताम् ।।

14. निषूदते यो भव दुःख जालं,
निरीक्षते यो जगदन्तरालम् ।
योऽन्तर्गतो योगि-निरीक्षणीयः,
स देवदेवो हृदये ममास्ताम् ।।

15. विमुक्त मार्गं प्रतिपादको यो,
यो जन्म-मृत्यु व्यसनाद् व्यतीतः ।
त्रिलोक लोकी सकलोऽकलंकः,
स देव देवो हृदये ममास्ताम् ।।

16. क्रोडीकृताशेष शरीरि-वर्गाः,
रागादयो यस्य न सन्ति दोषाः ।
निरीन्द्रियो ज्ञान मयोऽनपायः,
स देव देवो हृदये ममास्ताम् ।।

17. यो व्यापको विश्वजनीन वृत्तिः,
सिद्धो विवुद्धो धुतकर्म बन्धः ।
ध्यातो धुनीते सकलं विकारं,
स देव देवो हृदये ममास्ताम् ।।

18. न स्पृश्यते कर्मकलंक दोषैर्,
यो ध्वान्त संघैरिव तिग्मरश्मि: ।
निरंजनं नित्य मनेकमेकं
तं देवमाप्तं शरणं प्रपद्ये ॥

19. विभासते यत्र मरीचि मालि-
न्यविद्यमाने भुवनावभासि ।
स्वात्मस्थितं वोधमय-प्रकाशं,
तं देवमाप्त शरणं प्रपद्ये ॥

20. विलोक्यमाने सति यत्र विश्वं,
विलोक्यते स्पष्टमिदं विविक्तम् ।
शुद्धं शिवं शान्तमनाद्यनन्तं,
तं देवमाप्तं शरणं प्रपद्ये ॥

21. येन क्षता मन्मथ-मान मूर्च्छा-
विषाद-निद्रा-भय-शोक-चिन्ता: ।
क्षय्योऽनलनेव तरु-प्रपंचस्,
तं देवमाप्तं शरणं प्रपद्ये ॥

22. न संस्तरोऽश्मा न तृणं न मेदिनी,
विधानतो नो फलको विर्निमित: ।
यतो निरस्ताक्ष—कषाय विद्विष:,
सुधीभिरात्मैव सुनिर्मलो मत: ॥

23. न संस्तरो भद्र ! समाधि साधनं,
न लोक पूजा नच संघमेलनम् ।
यतस्ततोऽध्यात्मरतो भवानिशं,
विमुच्य सर्वामपि वाह्यवासनाम् ॥

24. न सन्ति वाह्या मम केचनार्था,
भवामि तेषां न कदाचनाऽहम् ।
इत्थं विनिश्चित्य विमुच्यवाह्यं,
स्वस्थ: सदा त्वं भव भद्र ! मुक्त्यै ॥

25. आत्मानमात्मन्यवलोक्य मानस् ।
त्वं दर्शनज्ञानमयो विशुद्धः ।
एकाग्रचित्तः खलु यत्र तत्र,
स्थितोऽपि साधुर्लभते समाधिम् ।।

26. एकः सदा शाश्वतिको ममात्मा,
विनिर्मलः साधिगमस्वभावः ।
बहिर्भवाः सन्त्यपरे समस्ता,
न शाश्वताः कर्मभवाः स्वकीयाः ।।

27. यस्यास्ति नैक्यं वपुषापि सार्धं,
तस्यास्ति किं पुत्रकलत्रमित्रैः ।
पृथक्कृते चर्मणि रोमकूपाः,
कुतो हि तिष्ठन्ति शरीरमध्ये ।।

28. संयोगतो दुःखमनेकभेदं,
यतोऽश्नुते जन्मवने शरीरी ।
तत स्त्रिधाऽसौ परिवर्जनीयो,
यियासुना निर्वृतिमात्मनीनाम् ।।

29. सर्वं निराकृत्य विकल्प जालं,
संसारकान्तार-निपात हेतुम् ।
विविक्त मात्मानमवेक्ष्यमाणो
निलीयसे त्वं परमात्मतत्त्वैः ।।

30. स्वयं कृतं कर्म यदात्मना पुरा,
फलं तदीयं लभते शुभाशुभम् ।
परेण दत्तं यदि लभ्यते स्फुटं,
स्वयं कृतं कर्म निरर्थकं सदा ।।

31. निजार्जितं कर्मविहाय देहिनो,
न कापि कस्याऽपि ददाति किंचन ।

विचारयन्नेव मनन्यमानस:,
परो ददातीति विमुंच शेमुषीम् ॥
32. यैः परमात्माऽमितगतिवन्द्य:,
सर्वविविक्तो भृशमनवद्य: ।
शश्वदधीतो मनसि लभन्ते,
मुक्तिनिकेतं विभववरं ते ॥

मुस्लिम मन्त्र

विस्मिल्ला रहमान नीर रहीम

मन्त्र—ख्वाजा खिज्र जिन्द पीर मैदर, मादर दस्तगीर मदत मेरा पीरान पीर करो, घोड़े पर भीड़ चढ़ो, हजरत पीर हाजर सो हाजर ॥

विधि:—आधी रात को या सुवह पश्चिम की ओर मुख करके उल्टी माला से (माला के मनके पीछे से आगे को सरकाते हुए) 21 दिन तक रोज एक माला फेर कर मन्त्र सिद्ध कर लें। फिर जिस दिन हाजरात चढ़ानी हो, उस दिन सवेरे आठ बजे से पहले-पहले सीधे, सच्चे बालक को लाकर उसके दाहिने हाथ के अंगूठे पर काली स्याही लगा देवें। बालक स्नान आदि किया हो, पवित्र हो, नाखून पर लगाई गई काली स्याही में लड़के को देखने को कहें, जब लड़का साधक से यह कहे कि मुंह दीखने लग गया है, तो कहा जाए दो आदमी आए, तब दो और फिर दो और फिर दो। इस प्रकार आठ आदमी आ जाएं तो उनसे कहे झाड़ू वाले को बुलाओ, चिश्ती को बुलाओ, पानी छिड़काओ, गद्दी बिछवाओ, फर्श वाले से फर्श मंगवाओ विछवाओ दो कुर्सी और तख्त मंगवाओ, यह सब हो जाने पर कहा जाए कि पीरान के पीर साहब से जाकर अर्ज करो कि आपका भक्त (साधक का नाम) आपको याद करता है। मुंशी साहब

को साथ लेकर पधारें। जब पीरान पीर साहब आकर कुर्सी पर बैठ जाएं, तो मुंशी साहब से कहें कि पीरान पीर साहब से अर्ज करें कि आपका भक्त आपसे प्रश्न पूछता है। लड़के को उत्तर मिलेगा। अगर लड़का वह उत्तर न समझ सके तो मुंशी साहब से कहें कि हमें अमुक भाषा में लिखकर समझाए या दिखाए। मुंशी साहब लड़के को इच्छित भाषा में लिख कर समझा देंगे। काम पूरा होने गर पीरान पीर साहब से जाने की अर्ज करें और तकलीफ देने के लिए माफी मांगे। फिर लड़के के अंगूठे को धो दे। 8-9 वर्ष के बच्चे को हाजरात अच्छी चढ़ती है।

मन्त्र सिद्ध करने के समय—लौंग, इलायची, लोबान डालता जाए।

श्री रामचरितमानस के सिद्ध प्रयोग

गोस्वामी तुलसीदास विरचित "श्री रामचरितमानस" एक अद्भुत रचना है। इसकी प्रत्येक चौपाई, दोहा, सोरठा में र, म अक्षरों को स्थान मिला है। अर्थात् समस्त रचना 'राम' नाम से सुशोभित है। जहां इस में राम कथा का विस्तार है वहीं अत्यधिक रचना मन्त्रमय हो गई है। इन मन्त्रमय रचना का कार्यसिद्धि के लिए विधान है। अत्यधिक संख्या में जनता ने अपने सांसारिक दु:खों के निवारण के लिए इन का प्रयोग किया है। उन अनुभूत योगों को जहां दिया जा रहा है।

जिस दिन भी रामचरितमानस की चौपाई आदि का मन्त्र जाप करना हो उस दिन नित्यक्रिया से निवृत्त हो राम परिवार का विधिवत पूजन करे। मौन रह कर व्रत का आचरण करे। जिस कार्य के लिए जिस चौपाई का जाप करना हो, रात्रि के समय पूर्वाभिमुख शुद्ध आसन पर, शुद्ध वस्त्र पहन कर बैठ जाए। 1008 वार मनोऽनुकूल चौपाई का जप करे। अपनी श्रद्धाएवं पूर्ण विश्वास रखना चाहिए। यह दृढ़ भावना हो कि इस प्रयोग से मेरा कार्य अवश्य सिद्ध होगा। श्री राम की कृपा मुझ पर अवश्य होगी।

जप करने के पश्चात् 108 वार मन्त्र पढ़ते हुए आहुति दें।

सामग्री—श्वेत चन्दन	पाव भर
काले तिल	पाव भर
जौं	एक छटांक
शक्कर	सौ ग्राम
पंच मेवा	सौ ग्राम

अगर, तगर, कपूर, केसर, नागरमोथा 3-3 माशे, घी पाव भर, चावल 200 ग्राम।

इन सभी वस्तुओं को साफ कर एक साथ मिला लें। स्थण्डिल का पूजन कर इस सामग्री से मन्त्र पढ़ते हुए आहुति दें। आहुति देते समय

स्वाहा शब्द को अवश्य बोलना चाहिए। इस के बाद प्रतिदिन प्रातः काल एक माला उस मन्त्र की अवश्य करे, जब तक कार्य सिद्धि न हो।

1. विपत्ति नाश के लिए—

राजीव नयन धरें धनुसायक।
भगतविपत्ति भंजन सुखदायक॥

2. संकट नाश के लिए—

जो प्रभू दीनदयालु कहावा।
आरति हरन वेद जसु गावा॥ 1/59

अथवा—दीनदयाल विरिद संभारी।
हरउनाथ मम संकट भारी॥

3. मंगल कार्य के लिए—

जब ते राम ब्याही घर आये।
नित नव मंगल मोद वधाए॥ 2/1

4. उपद्रवं नाश के लिए—

दैहिक दैविक भौतिक तापा।
रामराज नहिं काहुहि व्यापा॥ 7/21

5. खोई गई वस्तु की प्राप्ति के लिए—

गई वहोर गरीव नेवाजू।
सरल सबल साहिव रघुराजू॥ 1/13

6. सम्पत्ति के लिए—

जे सकाम नर सुनहिं जे गावहि।
सुख सम्पत्ति नानाविधि पावहिं॥ 7/15

7. पुत्र प्राप्ति के लिए—

प्रेम मग्न कौसल्या निसिदिन जात न जान।
सुतसनेह बस माता बाल चरित कर गान॥ 1/200

8. लक्ष्मी प्राप्ति के लिए—

जिमिसरिता सागर महुं जाहीं
जद्यपि ताहि कामना नाहीं।

तिमि सुखसंपति विनहिं बोलाएं
धरमसील पहिं जाहिं सुभाए ।। 1/294

9. आजीविका के लिए—
विस्वभरन पोषण कर जोई ।
ताकर नाम भरत अस होई ।। 1/197

10. मुकद्दमा जीतने के लिए—
पवन तनय बल पवन समाना ।
बुद्धि विवेक विग्यान निधाना ।। 4/30

11. मनोरथ सिद्धि के लिए—
सुनहु देव सचराचर स्वामी, प्रनपताल उर अन्तर्जामी ।।
मोर मनोरथु जानहु नीके वसहु सदा उर पुर सबही के ।।

12. पाप नाश के लिए—
राम राम कहिं जे जमुहाहिं, तिन्हहि न पाप पुंज समुहाहिं ।।
1/113

13. श्री राम की भक्ति के लिए—
दानि सिरोमनि कृपानिधि, नाथ कहहुं सतिभाउ ।
चाहहुं तुम्हहि समानसुत प्रभु सन कवन दुराउ ।। 1/149

15. अकाल मृत्यु के लिए—
नाम पाहरु दिवसनिशि ध्यान तुम्हार कपाट ।
लोचन निज पद जन्त्रित, जाहिं प्रान केहिं वाट ।। 5/30

16. रक्षा के लिए—
मामभिरक्षय रघुकुलनायक, धृतवरचाप रुचिर कर सायक ।
6/114

17. परीक्षा में उत्तीर्ण होने के लिए—
मोरि सुधारिहि सो सब भान्ति, जासु कृपा नहिं कृपा
अघाती ।। 1/27

18. रोग नाश के लिए—

राम कृपा नासहिं सब रोगा, जौं एहि भांति बनै संयोगा।
7/121

19. सर्व संकट निवारण के लिए—
महावीर विनवउं हनुमाना, राम जासु जस आप वखाना।
कवन सों काज कठिन जगमाहिं जो नहिं होई तात तुम पाहिं।
प्रनवऊं पवन कुमार खलवन पावक ज्ञानघन।
जासु हृदयं आगार वसहिं राम सरचापधर॥

20. संकट निवारण के लिए दूसरा मन्त्र—
कहइ रीछपति सुनहु हनुमाना का चुपसाधि रहेहु वलवाना।
पवनतनय वल पवनसमाना, वुद्धि विवेक विग्यान निधाना।
कवन सो काज कठिन जग माहिं जो नहिं होइ तात तुम्ह
पाहिं॥ 4/30

21. भवभीर नाश के लिए—
मो समदीन न दीन हित तुम्ह समान रघुवीर।
अस विचारि रघुवंस मनि हरहु विषम भवभीर॥ 7/130

22. कृपा दृष्टि के लिए—
मामवलोकय पंकज लोचन, कृपा विलोकिनि सोच विमोचन॥
7/20

23. जीवन सुधार के लिए—
मोरि सुधारिहि सो सब भांति, जासु कृपा नहीं कृपा
अघाती॥ 1/27

24. भ० शंकर की प्रसन्नता प्राप्ति के लिए—
आसुतोष तुम्ह अवढर दानी, आरति हरहु दीन जनु जानी॥
2/43

25. मंगल कार्य के लिए—
मंगलभवन अमंगलहारी द्रवउ सो दसरथ अजिरविहारी॥
1/111

26. स्नेही की प्राप्ति के लिए—

जेहि के जेहिं पर सत्य सनेहु सो तेहिं मिलइ न कछु सन्देहु ॥
1/258

27. विद्या प्राप्ति के लिए—

गुर गृह गए पढन रघुराई, अल्पकाल विद्या सब आई ॥
1/203

28. मुकद्दमा जीतने के लिए—

पवनतनय वल पवनसमाना, बुद्धि विवेक विग्यान निधाना ।

29. खोई हुई वस्तु की प्राप्ति के लिए—

गई वहोर गरीव नेवाजू, सरल सवल साहिव रघुराजू ॥

30. लक्ष्मी प्राप्ति के लिए—

जिमि सरिता सागर महुं जाहिं जद्यपि ताहि कामना नाहिं ।
तिमि सुखसंपति विनहि बोलाए धरमसील पहि जाहिं सुभाए ॥ 1/293

31. मनोरथसिद्धि के लिए—

भव भेषज रघुनाथ जसु, सुनहि जे नर अरु नारि ।
तिन्ह कर सकल मनोरथ सिद्धि करहिं त्रिसरारि ॥ 4/30

32. श्रीराम के प्रत्यक्ष दर्शन के लिए—

जो अनाथ हित हम पर नेहु तौ प्रसन्न होइ यह वर देहूं ।
जो सरूप वस सिव मन माहिं, जेहि कारन मुनि जतन कराहि ।
जो भुसंडि मनमानस हंसा सगुन अगुन जेहि निगम प्रसंसा ।
देखहि हम सो रूपभरि लोचन, कृपा करहु प्रनतारति मोचन ॥ 1/145

सुयोग्य वर प्राप्ति के लिए अनुभव सिद्ध मन्त्र प्रयोग

यह मन्त्र पाठ उन कुमारी कन्याओं के लिए हैं, जिनको योग्य वर नहीं मिलते, मिलते भी हैं तो विवाह के वाद उन कन्याओं को अनेक प्रकार की यातनाएं सहन करनी पड़ती हैं । इसलिए इस को समय से पहले सुलझाने के लिए नीचे लिखी चौपाइयों का पाठ करें ।

विधि—सोमवार को शुभ मुहूर्त में पाठ आरम्भ करें। भगवती कात्यायनी-दुर्गा की मूर्ति को आसन पर स्थापित कर शुद्ध वस्त्र ग्रहन कर, शुद्ध पीले आसन पर बैठें। आसन ऊनी हो तो अच्छा है। मुख पूर्व की ओर करें। भगवती दुर्गा का सविधि पूजन करें। पुष्प, धूप, दीप, नैवेद्य आदि चढ़ाएं। गुड़ या मिश्री का भोग लगाएं। प्रतिदिन ग्यारह पाठ करने है, इस प्रकार इक्कीस दिन तक करना होगा। दिन में एक वार शुद्ध-सात्विक आहार करना होगा। झूठ नहीं बोलना, गलत बात नहीं करनी, झगड़ना नहीं, मन को शान्त रखें। रात्रि को प्रभु का स्मरण करते हुए जमीन पर विस्तर विछाकर सो जाएं। इस पाठ के करने से समुचित वर मिलेगा, एवं दाम्पत्य जीवन सुखी रहेगा। जिनका दाम्पत्य जीवन सुखी नहीं वे भी इस पाठ को कर सकते हैं।

जानि कठिन सिव चाप विसूरति, चली राखो उर स्यामलमूरति।
प्रभु जव जात जानकी जानी सुख सनेह सोभा गुण खानी।
परम प्रेममय मृदु मसि कीन्हि, चारु चित्त भीतिं लिखी लीन्ही।
गई भवानी भवन वहोरी। वंदि चरन बोली कर जोरी।
जय जय गिरिवर राज किसोरी। जयमहेस मुखचन्द चकोरी।
जयगज वदन षडाननमाता। जगत जननी दामिनि दुति गाता।
नहिं तव आदि मध्य अवसाना। अमित प्रभाउ वेदु नहिं जाना।
भव भव विभव पराभव कारिनि। विस्व विमोहनि स्ववस विहारिनि॥

पतिदेवता सुतीय महुं मातु प्रथम तवरेख।
महिमा अमित न सकहिं कहि सहस सारदा सेष॥वा० 235॥
सुनहि सत्य असीस हमारी। पूजिहि मन कामना तुम्हारी॥
सेवत तोहि सुलभ फलचारी। वरदायनी पुरारि पिआरी।
देवि पूजिपद कमल तुम्हारे। सुरनरमुनि सब होहिं सुखारे।
मोर मनोरथु जानहु नीकें। वसहु सदा उर पुर सवही कें।
कीन्हेउं प्रगट न कारन तेहीं। अस कहि चरन गहे वैदेहीं।
विंनय प्रेम वस भई भवानी। खसी माल मूरति मुसुकानी।

सादर सियं प्रसादु सिर धरेऊ। बोली गौरि हरषु हियं भरेऊ ।।
सुनुसिय सत्य असीस हमारी पूजिहि मन कामना तुम्हारी।
नारद बचन सदा सुचि साचा। सोवरु मिलिहि जाहिं मनु राचा।
छन्द—मनु जाहिं राचेउ मिलिहि सो वरु सहज सुंदर सांवरो।
करुना निधान सुजान सीलु सनेहू जानत रावरो।
एहि भांति गौरि असीस सुनि सिय सहित हियं हरषी अली।
तुलसी भवानिहि पूजि पुनि पुनि मुदित मन मन्दिर चली ।।
जानि गौरि अनुकूल सिय हिय हरषु न जांइ कहि।
मंजुल मंगल मूल बाम अंग फरकन लगे ।।236।।
सुनि सिय असीस हमारी पूंजिहि मन कामना तुम्हारी ।।

———

इन दो चोपाइयों के साथ—नीचे लिखी अर्धाली का सम्पुट है—
सुनिसिय असीस हमारी पूजिहि मन कामना तुम्हारी ।।

पाठ आरम्भ करते समय भी इसे बोलें। ऐसे ग्यारह पाठ प्रतिदिन करने, और 21 दिन तक निरन्तर करते जाएं। 22वें दिन इस पाठ का भोग डालें। इन्हीं चोपाइयों को पढ़ते हुए 108 बार अग्नि में आहुतियां डाल देवें। हवन विधि स्वयं न कर सकें तो किसी पण्डित का सहारा लें। पाठ स्वयं ही करना है। स्वयं ही इस पाठ को बोलते हुए आहुति डालनी है।

श्री राम चरित मानस के सुन्दर कांड का महत्त्व

श्री राम चरित मानस के सुन्दर काण्ड का पाठ करने से व्यक्ति के सभी प्रकार के कष्ट दूर हो जाते हैं। यह सिद्धविधान है। इसका पाठ किष्किन्धा काण्ड के 29वें दोहे के बाद "कहउं रीछपति सुनु हनुमाना" से आरम्भ कर संपूर्ण सुन्दर काण्ड का पाठ करे। किसी कार्य की पूर्ति के लिए सम्पुट भी लगाया जा सकता है। पाठ करने से पूर्व श्री रामपरिवार का पूजन करें। घी का दीप, धूप आदि जलाएं। भोग भी लगाएं। पाठ के आदि और अन्त में हनुमान चालीसा का पाठ आवश्यक है।


श्री रामचन्द्र पर विश्वास करने वाले के लिए महत्त्वपूर्ण मन्त्र

ॐ आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
(लोका) रामाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ।।


इस मन्त्र का भगवत् पूजन करते हुए 1100 संख्या में प्रतिदिन जाप करें। इकतालीस दिन का यह विधान है। जप के वाद दशांश हवन करें।

सब प्रकार की आपदाएं दूर हों। सर्व संपदाओं की प्राप्ति हो। शुद्ध भाव से, शुद्ध वस्त्र धारण कर. ब्रह्मचर्य व्रत का पालन करते हुए— पूर्ण श्रद्धा-भक्ति से इस के अनुष्ठान को करें।


———



वगला मुखी यन्त्र




गणपतिपूजन यन्त्र



तारापूजनयन्त्र

सद्योऽभीष्टकर मृत्युंजय
यन्त्र



मृत्युजय यन्त्र

तृतीय भाग

महाविद्या प्रकरण


1. कालीतन्त्रम्

कालीध्यानम्

शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम्,
चतुर्भुजां खड्गमुण्डवराभयकरां शिवाम् ।
मुण्डमालां धरां देवीं ललज्जिह्वां दिगम्बराम् ।
एवं संचिन्तयेत् कालीं श्मशानालय वासिनीम् ॥

अथ यन्त्रोद्धारः

आदौ त्रिकोणमालिख्य त्रिकोणन्तद्वहिर्लिखेत् ।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥ १ ॥
ततस्त्रिवृत्तमालिख्य लिखेदष्टदलं ततः ।
वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम् ॥ २ ॥



अथ मन्त्रोद्धारः

कालीबीजत्रयम्प्रोक्त्वा लज्जाबीजद्वयन्ततः ।
हूँकारौ द्वौ ततः पश्चाद्दक्षिणे कालिके ततः ॥ १ ॥
कालीबीजत्रयन्तस्माल्लज्जाबीजद्वयं पठेत् ।
द्वौ च स्वाहान्तहूङ्कारौ कालीमन्त्र उदाहृतः ॥ २ ॥

अथ मन्त्रः

ॐ क्रींक्रींक्रींह्रींह्रीं हूं हूँ दक्षिणे कालिके क्रीं क्रीं क्रीं हूँ हूँ स्वाहा ॥

अथ श्रीदक्षिणकालीसपर्यापद्धतिः

प्रथमम्पञ्चवर्णरजश्चित्रं शुद्धं स्थानं गत्वा पूजावेद्याः बहिः स्थित्वा गुरुम्प्रणम्य इष्टदेवताम्प्रणम्य दिक्पालाँश्च प्रणम्य आचम्य ततः कुशहस्तो मौनी पापशमनार्थं श्लोकद्वयम्पठेत् । तद्यथा--"ॐ देवि त्वत्प्रकृतञ्चित्तम्पापाक्रान्तमभून्मम ॥ तन्निस्सरन्तु चित्तान्मे पापं हूं फट् च ते नमः ॥ १ ॥ सूर्यस्सोमो यमःकालो महाभूतानि पञ्च च ॥ एते शुभाशुभस्येह कर्मणो नव साक्षिणः" इति पठित्वा सम्प्रार्थ्य गृहे प्रविशेत् । मौनी मूलेनाचम्य "ओं वज्रोदके हूं फट्स्वाहा" इतिजलं गृहीत्वा "हुं स्वाहा" इति करे आदाय 'उों ह्रींविशुद्धसर्वपापानिशमयाशेषविकल्पमपनय हुँ फट्स्वाहा" इत्यनेन पादौ प्रक्षाल्य "ॐ ह्रींस्वाहा" इति पुनराचम्य "ऐंकालिकायैनमः, ऐंकपालिन्यैनमः, ऐंकुल्लायै नमः" इति त्रिराचम्य ततो मूलेन हस्तौ



No. 4 KALI MATA

JAIN PICTURE PUBLICATION
5745, Jogiwara, [illegible]
DELHI-110 [illegible]

प्रक्षाल्य "ॐ कालिकायै नमः । ॐ कपालिन्यैनमः" इति-दशहस्ताङ्गुलीभिरोष्टौ द्विरुन्मृज्य "ॐ कुल्लायैनमः" इति करं प्रक्षाल्य मूलेनसङ्कुचिताङ्गुलीभिर्मुखतर्जन्यङ्गुष्ठाभ्यां नासिकां मूलेन अनामिकाङ्गुष्ठाभ्याङ्कर्णमङ्गुष्ठ-कनिष्ठा-भ्यान्नाभिन्तलेनहृदयं सर्वाङ्गुलीभिर्मस्तकं भुजौ च स्पृशेत् । ततस्तिलकङ्कलचन्दनादिना ललाटोदरहृत्कण्ठदक्षपार्श्वांसकण्ठपृष्ठककुदि भुजद्वन्द्वे मूर्द्धनिद्वादशस्वपि स्थानेषु कुर्यात् ॥ ततो "देव्यस्त्रंविलिखेद्भाले कालीवीजन्ततो हृदि शक्तिम्मध्यगताङ्कृत्वाकूर्चवीजन्न्यसेत्सुधिः" ततः सामान्यार्घ्यस्थापनङ्कुर्य्यात् ॥ तद्यथा —स्ववामेत्रिकोणवृत्तभूपुरात्मकम्मण्डलंविलिख्य ततः "ॐ आधारशक्तिभ्यो नमः" इति पुष्पाक्षतादिभिरभ्यर्च्य "ॐ हःद्वाराघ्यंसाधयामि" इत्युक्त्वा "फट्" इतिप्रक्षालितं शङ्खादिपात्रत्रिपादिकोपरि निधाय "नमः" इति जलेनापूर्य "गङ्गेचयमुनेचैव गोदावरि-सरस्वति ॥ नर्मदे सिन्धुकावेरिजलेऽस्मिन्सन्निधिङ्कुरु" इतिमन्त्रेणाङ्कुशमुद्रया सूर्यमण्डलात्तीर्थन्तज्जले आवाह्य, गन्धादिकम्प्रणवेन निक्षिप्य, धेनुमत्स्यमुद्रे दर्शयित्वा, प्रणवेनाष्टादशकृत्वोवाभिमन्त्र्यफडिति मन्त्रेणद्वारमभिषेचयेत् । "ॐ मणिधरिणि वज्रिणि शिखरिणी सर्वलोकवशङ्करि हूँफट्स्वाहा" इति शिखाम्वध्नीयात् ॥ ततो द्वारदेवताः पूजयेत् "गंगणेशायनमः बंवटुकायनमः, क्षंक्षेत्रेशायनमः, यंयोगिनीभ्योनमः" इति ऊर्ध्वे वामेदक्षे

अधइतिचतुर्दिक्षु पूजयेत् "गंगङ्गायैनमः, यंयमुनायै नमः" इति शाखापार्श्वयोः "लंलक्ष्म्यैनमः, संसरस्वत्यैनमः" इति ऊर्ध्वे अधरश्चपूजयेत् ॥ "ॐ ब्रह्माण्याद्यष्टमातृभ्योनमः" इतिदेहल्याम् गन्धपुष्पादिनाभ्यर्च्यततोदक्षिणङ्गं सङ्कोचयन् दक्षचरणमग्रे निधाय वामशाखामस्पृशन् मण्डलाभ्यन्तरे गत्वा "ॐ रक्षरक्षहुँफट्स्वाहा" इति जलेनाभिषिच्य "ॐ पवित्रवज्रभूमेहूँफट्स्वाहा" इत्यभिमंत्र्य "ह्रींआधारशक्तिकमलासनायनमः" इत्यासनमभ्यर्च्यत्रिकोणं विलिख्य "आसुरेखेवज्ररेखेहुंफटस्वाहा" इति मण्डलंविलिख्य तत्र "हसौ" इतिप्रेतवीजंविलिख्य "ह्रीं आधारशक्तिकमलासनायनमः" इत्यासनमभ्यर्च्य ॥ "ॐ अनन्तायनमः, विमलासनायनमः, पद्मासनायनमः" इति कुशानास्तीर्य्य व्याघ्राजिनकृष्णसारमृगाजिनङ्कम्वलासनं वा प्रकल्पयेत् ॥ तदभावेतुपञ्चविंशतिकुशनिर्मितविष्ठरं शवरूपं वा प्रकल्पयेत् ॥ "हसौमहाप्रेतपद्मासनायनमः" इत्यभ्यर्च्य तत्रासने आत्ममन्त्रेण उपविश्यवामोरूपरिदक्षिणपादङ्-कृत्वावद्धवीरासनः वामपादोपरि दक्षिणोरुं धृत्वाविपरीतंवा पूर्वाभिमुख उत्तराभिमुखो वाआसनं धृत्वा मन्त्रम्पठेत् ॥

आसनमन्त्रस्यमेरुपृष्ठऋषिः सुतलंछन्दः कूर्मोदेवता आसनपरिग्रहेविनियोगः "ॐ पृथ्वित्वयाधृतालोका देवित्वंविष्णुनाधृता ॥ त्वञ्च धारयमांनित्यम्पवित्रङ्कुरुचासनम्" इति "ॐ वास्तुपुरुषायनमः, ॐ ब्रह्मणेनमः" इतिनैरृत्ये

सम्पूज्य "ॐ धर्मायनमः, ॐ ज्ञानायनमः, ॐ वैराग्याय नमः ॐ ऐश्वर्यायनमः" इति दिक्षुसम्पूज्य " ॐ अधर्मायनमः, "ॐ अवैराग्यायनमः, ॐ अनैश्वर्यायनमः" इतिविदिक्षुसम्पूजयेत् ॥ "ॐ हुँफट्स्वाहा" इति मन्त्रेण "ॐ ह्लींस्वाहा" इतिमन्त्रेण वा कायवाक्चित्तशोधनंकृत्वा "रक्षरक्षहुँफट्स्वाहा" इत्यात्मानमभिरक्षयेत् " ॐ शताभिषेके शताभिषेकेपदे हुँफट्स्वाहा, ॐ पुष्पकेतुराजार्हत् पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे पुष्पचयावकीर्णेहुँफट्स्वाहा" इतिपुष्पमभिमन्त्रयेत् । अन्यानि पूजावस्तूनिसर्वाणि सामान्यार्घ्योदकेनाभिषिच्यधेनुमुद्रामत्स्यमुद्रे दर्शयित्वा पुष्पाणि शुद्धानि विभावयेत् ॥ वमितिजलधाराम्प्रक्षिप्य वह्निवीजेनवह्निप्राकारं विचिन्त्य "हुँफट" इतिमन्त्रेण चतुर्दिक्षुक्रोधदृष्टयानिरीक्ष्य सर्वान् विघ्नानुत्सारयेत । तद्यथा—"सर्वविघ्नानुत्सारयहुँफट्स्वाहा" इतिमन्त्रेण ऊर्ध्वमवलोक्य दिव्यांश्चतुर्दिक्षुजलक्षेपेणान्तरिक्षगान् वामपार्ष्णिघातत्रयेण भौमान विघ्नानुत्सार्य्य लाजचन्दनसिद्धार्थतिलदधिदूर्वाक्षतानामन्यतममादाय "ॐ अपसर्प्पन्तु ते भूता ये भूता भूमिसंस्थिताः ॥ ये चात्रविघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया" इतिपठँश्चतुर्दिक्षु क्षिपेत । ततो वामे "ॐ गुरुभ्यो नमः, ॐ परमगुरुभ्योनमः, ॐ परात्परगुरुभ्योनमः, ॐ परमेष्ठिगुरुभ्योनमः, दक्षिणे "ॐ गणेशायनमः पुरतः "ॐ दक्षिणकालिकायैनमः" इतिप्रणमेत् ॥ ततः

करशुद्धिङ्कुर्यात् ।। तद्यथा—"हुँ" इतिमन्त्रेणचन्दनाक्तानि कुसुमान्यङ्गुल्यग्रेणादाय"हौ" इतिमन्त्रेण कराभ्यांमर्दयित्वा "क्लीं' इति वीजेन दक्षहस्तेन सम्मृज्य "ॐ तत्सत्' इतिमन्त्रेणवामहस्तेनाघ्राय "हौं" इति मन्त्रेण ऐशान्यां दिशिपुष्पम्परित्यजेत "ॐ ते सर्वेविलयं यान्तु येमांहिंसन्ति- हिंसकाः ।। मृत्युरोगभयक्रोधाः पतन्तुरिपुमस्तके" इतिमन्त्रेण वा परित्यजेत । परित्यागश्चनाराच मुद्रया ।।

अथ भूतशुद्धिः

शिरसि भैरवायऋषयेनमः मुखे । उष्णिक्छन्दसेनमः । हृदये ॐ दक्षिणकालिकायैनमः । गुह्ये क्रींवीजायनमः । पादयोः हुँ शक्तयेनमः सर्वाङ्गे । क्रींकीलकायनमः ।।

अथ षडङ्ग न्यासः

ॐ क्रां हृदयाय नमः । ॐ क्रीं शिरसे स्वाहा । ॐ क्रूं शिखायै वषट् । ॐ क्रैं कवचाय हुम् । ॐ क्रौं नेत्र त्रयाय वौषट् । ॐ क्रः अस्त्राय फट् ।

करन्यास :—ॐ क्रां अंगुष्ठाभ्यां नमः । ॐ क्रीं तर्जनी- भ्यां स्वाहा । ॐ क्रूं मध्यमाभ्यां वषट् । ॐ क्रैं अनामिका- भ्यां हुम् । ॐ क्रौं कनिष्ठिकाभ्यां वौषट् । ॐ क्रः करतलकरपृष्ठाभ्यां फट् ।

ततः प्राणायामं कुर्यात् ।

ॐ संविदे ब्रह्म सम्भूते ब्रह्मपुत्रिसदानघे ।

भैरवानन्दतृप्त्यर्थं पवित्रा भव सर्वदा । ॐ ब्राह्म्यै

नमः स्वाहा । ॐ सिद्धमूल क्रिये देवि हीनवोध प्रवोधिनि । राज़ प्रजावशंकरि शत्रुकण्ठ निषूदिनि । ऐं क्षत्रियायै नमः स्वाहा । ॐ अज्ञानेन्धन दीप्ताग्नि ज्वालाग्नि ज्ञान रूपिणि । आनन्दस्यागम प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे । ॐ ह्रीं वश्यायै नमः स्वाहा । ॐ नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि । त्रैलौक्य-विजये मातः समाधिफलदाभव । क्लींशूद्रायै नमः स्वाहा । इत्येतैः मन्त्रैः संशोध्य—ततः ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय आकर्षय सिद्धिं देहि सर्वं मे वशमानय स्वाहा—इति मन्त्रेणाभिमन्त्रयेत ॥ ॐ ह्रीं ह्लीं लूं अः अं डं एं महाघोरेशाय नमः इत्यघोर-मन्त्रेण चाभिमन्त्र्यमूलमन्त्रं सप्तवारं जप्त्वा श्रेष्ठ देवीं आवाह्य धेनुमुद्रां च प्रदर्श्य छोटिकाभिः दिग्वन्धनं तालत्रयं च कृत्वा तत्र श्रीष्टदेवीं मानसोपचारैः सम्पूज्य-ऐं गुरुपादुकाभ्यो नमः "इतिमन्त्रेण ब्रह्मरन्ध्रे श्रीगुरुं त्रिधा तर्पयेत् । मूलेन हृत्कमले श्रीष्ट देवतां पञ्चधा तर्पयेत् । ततः स्वीकारः—ऐं आत्म तत्त्वेन आत्म तत्त्वं शोधयामि स्वाहा। ऐं विद्यातत्त्वेन विद्या तत्त्वं शोधयामि स्वाहा, ऐं शिव-तत्त्वेन शिव तत्त्वं शोधयामि स्वाहा, मूलमुच्चार्यं सर्वं तत्त्वेन सर्वतत्त्वं शोधयामि स्वाहा । ऐं वदवद वाग्वादिनि ममजिह्वाग्रे स्थिराभव सर्वतत्त्ववशंकरो स्वाहा । इति मुखेन जठराग्नौ जहुयात् मूलमन्त्रेण सर्वं पिवेत ।

इस प्रकार विधि करके काली का षोडशोपचार

पूजन कर-मन्त्र जाप करें। सवालक्ष मन्त्र जाप की समाप्ति पर हवन करें। तदनन्तर वलिविधान करें।

अथ कालीकवचम्

भैरवी उवाच

काली पूजा श्रुता नाथ भावाश्च विविधा प्रभो।
इदानीं श्रोतुमिच्छामि कवचं पूर्वं सूचितम् ॥१।
त्वमेव स्रष्टा पाता च संहर्ता त्वमेव हि।
त्वमेव शरणं त्राहि मां दुःखसंकटात् ॥२॥

भैरव उवाच

रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे ॥ श्रीजगन्मङ्गलन्नाम कवचम्मन्त्रविग्रहम् ॥३॥ पठित्वा धारयित्वा च त्रैलोक्यम्मोहयेत्क्षणात् ॥ नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरम् ॥ ४ ॥ योगिनङ्क्षोभमन-यद्यद्धृत्वा च रघूत्तमः ॥ वरतृप्तो जघानैव रावणादि-निशाचरान् ॥ ५ ॥ यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी विभुः ॥ धनाधिपः कुवेरोऽपि सुरेशोऽभूच्छचीपतिः ॥६॥ एवं हि सकला देवास्सर्वद्धीश्वरा प्रिये ॥ श्रीजगन्मङ्गल-स्यास्य कवचस्य ऋषिः शिवः ॥७॥ छन्दोऽनुष्टप्देवा च कालिका दक्षिणेरिता ॥ जगताम्मोहने दुष्टविजये भुक्तिमुक्तिषु ॥८॥ योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः ॥ शिरो मे कालिका पातु क्रींकारैकाक्षरी परा ॥९॥ क्रींक्रींक्रीं मे ललाटञ्च कालिका खड्गधारिणी

हूं हूं पातु नेत्रयुगं ह्रींह्रींपातु श्रुती मम ।। १० ।। दक्षिणे कालिका पातु घ्राणयुग्मम्महेश्वरी ।। क्रींक्रींक्रीं रसनाम्पातु हूं हूं पातु कपोलकम् ।। ११ ।। वदनं सकलम्पातु ह्रीँ ह्रीँ स्वाहा स्वरूपिणी ।। द्वाविंशत्यक्षरी स्कन्धौ महाविद्या सुखप्रदा ।। १२ ।। खड्गमुण्डधरा काली सर्वाङ्ग-मभितोऽवतु ।। क्रींहूँह्रीँ त्र्यक्षरी पातु चामुण्डा हृदय-म्मम ।। १३ ।। ऐंहूँओंऐं स्तनद्वन्द्वं ह्रींफट्स्वाहा ककु-त्स्थलम् । अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका ।।१४।। क्रींक्रींहूं हूंह्रींह्रींकारीं पातु षडक्षरी मम ।। क्रीं नाभिमध्य-देशञ्च दक्षिणे कालिकाऽवतु ।। १५ ।। क्रींस्वाहा पातु पृष्ठञ्च दक्षिणे कालिका सा दशाक्षरी ।। क्रीं मे गुह्यं सदा पातु कालिकायै नमस्ततः ।।१६।। सप्ताक्षरी महा-विद्या सर्वतन्त्रेषु गोपिता ।। ह्रींह्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयम् ।।१७।। काली दशाक्षरी विद्या स्वाहा मामूरुयुग्मकम् ।। ॐ क्रींक्रीं मे स्वाहा पातु कालिका जानुनी सदा ।।१८।। कालीहृन्नामविद्येयञ्चतुर्वर्गफलप्रदा ।। क्रींह्रींह्रीं पातु सा गुल्फन्दक्षिणे कालिकाऽवतु ।।१९।। क्रींहूंह्रींस्वाहा पदम्पातु चतुर्दशाक्षरी मम ।। खड्गमुण्डधरा काली वरदाभयधारिणी ।।२०।। विद्याभिस्सकलाभिः सा सर्वाङ्गमभितोऽवतु ।। काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ।।२१।। विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्वि-षा ।। नीला घना वलाका च मात्रा मुद्रा मिता च माम्

।।२२।। एतास्सर्वा खड्गधरा मुण्डमालाविभूषणाः । रक्षन्तु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा ।। २३ ।। माहेश्वरी च चामुण्डा कौमारी चापराजिता ।। वाराही नारसिंही च सर्वाश्चामितभूषणाः ।। २४ ।। रक्षन्तु स्वायुधैर्दिक्षु माँ यथा तथा ।। इति ते कथितन्दिव्यङ्कवचम्परमाद्भुतम् ।।२५।। श्रीजगन्मङ्गलन्नाम महाविद्यौघविग्रहम् ।। त्रैलोक्याकर्षणम्ब्रह्मन्कवचम्मन्मुखोदितम् ।। २६ ।। गुरुपूजाँ विधायाथ विधिवत्प्रपठेत्ततः ।। कवचन्त्रिस्सकृद्वापि यावज्जीवाञ्च वा पुनः ।।२७।। एतच्छतार्द्धमावृत्य त्रैलोक्यविजयी भवेत् ।। त्रैलोक्यङ्क्षोभयत्येव कवचस्य प्रसादतः ।।२८।। महाकविर्भवेन्मासं सर्वसिद्धीश्वरो भवेत् ।। पुपाञ्जलीन्कालिकायै मूलेनैवार्पयेत् सकृत् ।।२९।। शतवर्षसहस्राणाम्पूजाया फलमाप्नुयात् ।। भूर्जे विलिखितञ्चैतत्स्वर्णस्थन्धारयेद्यदि ।।३०।। विशाखायान्दक्षवाहौ कण्ठे वा धारयेद्यदि ।। त्रैलोक्यम्मोहयेत्क्रोधात्त्रैलोक्यञ्चूर्णयेत्क्षणात् ।।३१।। पुत्रवान्धनवान् श्रीमान्नानाविद्यानिधिर्भवेत् ।। ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः ।।३२।। नाशमायाति या नारी वन्ध्या वा मृतपुत्रिणी ।; वह्वपत्या जीवतोका भवत्येव न संशयः ।। ३३ ।। न देयम्परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः ।। शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् ।।३४ ।। स्पर्द्धामुद्धूय कमला वाग्देवी मन्दिरे सुखे ।। पौत्रान्तं स्थैर्य्यमास्थाय निवसत्येव निश्चितम् ।।३५।।

इदङ्कवचमज्ञात्वा यो भजेद्घोरदक्षिणाम् ।। शतलक्षम्प्रजप्त्वापि तस्य विद्या न सिद्ध्यति ।। सहस्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ।।३६।। इति कवचम् ।

अथ हृदयम्

श्री महाकाल उवाच ।। महाकौतूहलस्तोत्रं हृदयाख्यम्महोत्तमम् ।। शृणु प्रिये महागोप्यन्दक्षिणायाः सुगोपितम् ।।१।। अवाच्यमपि वक्ष्यामि तव प्रीत्या प्रकाशितम् ।। अन्येभ्यं : कुरु गोप्यञ्च सत्यं सत्यञ्च शैलजे ।।२।। श्रीदेव्युवाच ।। कस्मिन्युगे समुत्पन्नङ्केन स्तोत्रङ्कृतम्पुरा ।। तत्सर्वङ्कथ्यतां शम्भो महेश्वर दयानिधे ।।३।। श्रीमहाकाल उवाच ।। पुरा प्रजापतेः शीर्षश्छेदनङ्कृतवानहम् ।। ब्रह्महत्याकृतैः पापैर्भैरवत्वम्ममागतम् ।।४।। ब्रह्महत्याविनाशाय कृतं स्तोत्रम्मया प्रिये ।। कृत्याविनाशकं स्तोत्रम्ब्रह्महत्यापहारकम् ।।५।।'ॐ अस्य श्रीदक्षिणकाल्या हृदयस्तोत्रमन्त्रस्य श्रीमहाकालऋषिरुष्णिक्छन्दः ।। श्रीदक्षिणकालिकादेवता क्रींवीजं, ह्रींशक्तिः, नमः कीलकम् ।। सर्वत्र सर्वदा जपे विनियोगः ।। ॐ क्रांहृदययानमः । ॐक्रींशिरसेस्वाहा । ॐ क्रूँशिखायैवषट् । ॐक्रैंकवचायहुम् ।। ॐक्रोंनेत्रत्रयायवौषट् । ॐक्रःअस्त्रायफट् ।। अथ ध्यानम् । ध्यायेत्कालीम्महामायान्त्रिनेत्राम्वहुरूपिणीम् ।। चतुर्भुजाँ ललज्जिह्वाम्पूर्णचन्द्रनिभाननाम् ।।१।। नीलोत्पलदलप्रख्यां शत्रुसघंविदारिणीम् ।। नरमुण्डन्तथा खड्गङ्कमलं वरदन्तथा ।।२ ।।

बिभ्राणां रक्तवदनान्दंष्ट्रालींघोररूपिणीम् ॥ अट्टाट्टहासनिरतां सर्वदा च दिगम्बराम् ॥३॥ शवासनस्थितान्देवीम्मुण्डमालाविभूषिताम् ॥ इति ध्यात्वा महादेवीन्ततस्तु हृदयम्पठेत् ॥४ ॥ ॐकालिका घोररूपाद्या सर्वकामफलप्रदा ॥ सर्व्वदेवस्तुता देवी शत्रुनाशङ्करोतु मे ॥५॥ ह्लींह्लींस्वरूपिणी श्रेष्ठा त्रिषु लोकेषु दुर्लभा ॥ तव स्नेहान्मयाख्यातन्न देयं यस्य कस्यचित् ॥६॥ अथ ध्यानम्प्रवक्ष्यामि निशामय परात्मिके ॥ यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यति ॥७॥ नागयज्ञोपवीताञ्च चन्द्रार्द्धकृतशेखराम् ॥ जटाजूटाञ्च सञ्चिन्त्य महाकालसमीपगाम् ॥८॥ एवन्न्यासादयस्सर्व्वे ये प्रकुर्वन्ति मानवाः ॥ प्राप्नुवन्ति च ते मोक्षं सत्यं सत्यं वरानने॥९॥ यन्त्रं शृणु परन्देव्यास्सर्वार्थ सिद्धिदायकम् ॥ गोप्याद्गोप्यतरं गोप्यङ्गोप्याद्गोप्यतरंमहत् ॥१०॥ त्रिकोणम्पञ्चकञ्चाष्टकमलम्भूपुरान्वितम् ॥ मुण्डपङ्क्तञ्च ज्वालाञ्च कालियन्त्रं सुसिद्धिदम् ॥११॥ मन्त्रन्तु पूर्व्वकथितन्धारयस्व सदा प्रिये ॥ देव्या दक्षिणकाल्यास्तु नाममालान्निशामय ॥ १२ ॥ काली दक्षिणकाली च कृष्णरूप परात्मिका ॥ मुण्डमाली विशालाक्षी सृष्टिसंहारकारिका ॥१३ ॥ स्थितिरूपा महामाया योगनिद्रा भगात्मिका ॥ भगसर्पि पानरता भगोद्योता भगाङ्गजा ॥ १४ ॥ आद्या सदा नवा घोरा महातेजा करालिका ॥ प्रेतवाहा सिद्धिलक्ष्मी-

रनिरुद्धा सरस्वती ॥१५॥ एतानि नाममाल्यानि ये पठन्ति दिने दिने ॥ तेषान्दासस्य दासोऽहं सत्यं सत्यम्महेश्वरि ॥१६॥ कालीङ्कालहरान्देवीङ्कङ्कालवीजरूपिणीम् ॥ काकरूपाङ्कलातीताङ्कालिकान्दक्षिणाम्भजे ॥१७॥ कुण्डगोलप्रियान्देवीं स्वयम्भूकुसुमेरताम् ॥ रतिप्रियाम्महारौद्रीङ्कालिकाम्प्रणमाम्यहम् ॥१८॥ दूतीप्रियाम्महादूतीन्दूतीयोगेश्वरीम्पराम् ॥ दूतीयोगोद्भवरतान्दूतीरूपान्नमाम्यहम् ॥१९॥ क्रींमन्त्रेण जलञ्जप्त्वा सप्तधा सेचनेन तु ॥ सर्वे रोगा विनश्यन्ति नात्र कार्य्या विचारणा ॥२०॥ क्रींस्वाहान्तैर्महामन्त्रैश्चन्दनं साधयेत्ततः ॥ तिलकङ्क्रियते प्राज्ञैर्ल्लोको वश्यो भवेत्सदा ॥२१॥ क्रींहूँह्रींमन्त्रजप्तेन चाक्षतं सप्तभिः प्रिये ॥ महाभयविनाशश्च जायते नात्र संशयः ॥ २२ ॥ क्रींह्रींहूँस्वाहामन्त्रेण श्मशानाग्निञ्च मन्त्रयेत् ॥ शत्रोर्गृहे प्रतिक्षिप्त्वा शत्रोर्मृत्युर्भविष्यति ॥ २३ ॥ हूँह्रींक्रीं चैव उच्चाटे पुष्पं संशोध्य सप्तधा ॥ रिपूणाञ्चैव चोच्चाटन्नयत्येव न संशयः ॥२४॥ आकर्षणे च क्रींक्रींक्रीं जप्त्वाऽक्षतम्प्रतिक्षिपेत् ॥ सहस्रयोजनस्था च शीघ्रमागच्छति प्रिये ॥ २५ ॥ क्रींक्रींक्रींहूँहूँह्रींह्रीं च कजलं शोधितन्तथा ॥ तिलकेन जगन्मोहं सप्तधा मन्त्रमाचरेत् २६ ॥ हृदयम्परमेशानि सर्वपापहरम्परम् ॥ अश्वमेधादिदानानाङ्कोटिकोटिगुणोत्तरम् ॥२७॥ कन्यादानादिदानानाङ्कोटिकोटिगुणम्फलम् ॥ दूतीयागादियागानाङ्कोटिकोटिफलं स्मृतम् ॥ २८ ॥ गङ्गादिसर्वतीर्था-

नाम्फलङ्कोटिगुणं स्मृतम् ।। एकधा पाठमात्रेण सत्यं सत्यम्मयोदितम् ।।२९।। कौमारीं स्वेष्टरूपेण पूजाङ् कृत्वा विधानतः ।। पठेत्स्तोत्रम्महेशानि जीवन्मुक्तस्स उच्यते ।।३०।। रजस्वलाभगन्दृष्ट्वा पठेदेकाग्रमानसः । लभते परमं स्थानन्देवीलोके वरानने ।।३१।। महादुःखे महारोगे महासङ्कटके दिने ।। महाभये महाघोरे पठेत्स्तोत्रं महोत्तमम् ।। सत्यं सत्यम्पुनस्सत्यङ्गोपयेन्मातृजारवत् ।। ३२ ।। इति हृदयं समाप्तम् ।।

अथोपनिषद्

अथ हैनाम्ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगाङ्कामरेफेन्दिराँ समष्टिरूपिणीमादौ तदन्वकर्तुर्वीजद्वयकूर्चवीजन्तद्धोमषष्ठस्वरविन्दुमेलनं रूपन्तदनुभुवना द्वयभुवना तु व्यौमज्वलनेन्दिराशून्यमेलनरूपा दक्षिणे कालिके वेत्यभिमुखङ्गता तदनु वीजसप्तकमुच्चार्य्यं बृहद्भानुजामुच्चरेत । अयं सर्वमन्त्रोत्तमोत्तम इमं सकृज्जपन् स तु विश्वेश्वरः स तु नारीश्वरः स तु वेदेश्वरः स सर्वगुरुः सर्वनमस्यः सर्वेषु वेदेष्वधिश्रितो भवति स सर्वेषु तीर्थेषु स्नातो भवति सर्वेषु यज्ञेषु दीक्षितो भवति स स्वयं सदाशिवः त्रिकोणन्त्रिकोणम्पुनश्चैव त्रिकोणन्त्रिकोणन्ततो वसुदलं सार्द्धचन्द्रकेसरं युग्मशो विलिख्य सम्भृतम्भूपुरैकेन युतं सर्वज्ञेनाभ्यर्च्य तस्मिन् देवोदले रेखायां विन्यस्य ध्येया अभिनवजलदवदना घनस्तनी कुटिलदंष्ट्रा शवासना वराभयखङ्गमुण्डमण्डितहस्ता कालिका

ध्येया काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्तेति षट्कोणगा: । उग्रा उग्रप्रभा दीप्ता नीला घना बलाका मात्रा मुद्रा मितेति नवकोणगा: इत्थम्पञ्चदशकोणगा: । ब्राह्मी नारायणी माहेश्वरी चामुण्डा कौमारी अपराजिता वाराही नारसिंहीत्यष्टपत्रगा: । चतुष्कोणगाश्चत्वारो देवा: माधव-रुद्र-विनायक-सौरा: ।। चतुर्दिक्षु इन्द्र-यम-वरुणकुबेरा: । देवीं सर्वाङ्गेनादौ सम्पूज्य भगोदकेन तर्पणम्पञ्चमकारेण पूजनमेतस्या: सपर्य्याया: किमधिकन्नो शक्यम्ब्रह्मादि पदं हेयं हेलया प्राप्नोति एतस्या: एकद्वित्रिक्रमेण मनवो भवन्ति नारिमित्रादिलक्षणमत्र वर्त्तते अमुष्यमन्त्रपाठकस्य गतिरस्ति नान्यस्येह गतिरस्ति एतस्यास्तारा मनोर्दुर्गा मनोर्वा सिद्धि: इदानीन्तु सर्वा: स्वप्नभूता असितैव जागर्ति इमामसिताज्ञामुपनिषदं यो वाऽधीते सोऽपुत्र: पुत्रीभवति निर्धनो धनायति धर्मार्थकाममोक्षाणाम्पात्रीयत्यन्यस्य वरद: दृष्ट्वा जगन्मोहयति क्रोधस्तञ्जहाति गङ्गादितीर्थक्षेत्राणामग्निष्टोमादि यज्ञानां फलभागीयति ।। इत्यथर्वणवेदे सौभाग्यकाण्डे कालिकोपनिषत्समाप्ता ।।

अथ शतनाम

भैरव उवाच

शतनाम प्रवक्ष्यामि कालिकाया वरानने ।। यस्य प्रपठनाद्वाग्मी सर्वत्र विजयी भवेत् ।।१।। काली कपालिनी कान्ता कामदा काकसुन्दरी ।। कालरात्रि: कालिका च

कालभैरवपूजिता ।।२।। कुरुकुल्ला कामिनी च कमनीयस्वभाविनी ।। कुलीना कूलकर्त्री च कुलवर्त्मप्रकाशिनी ,।३।। कस्तूरीरसनीला च काम्या कामस्वरूपिणी ।। ककारवर्णनिलया कामधेनुः करालिका ।। ४ ।। कुलकान्ता करालास्या कामार्त्ता च कलावती ।। कृशोदरी च कामाख्या कौमारी कुलपालिनी ।। ५ ।। कुलजा कुलकन्या च कलहा कुलपूजिता ।। कामेश्वरी कामकान्ता कुञ्जरेश्वरगामिनी ।। ६ ।। कामदात्री कामहर्त्री कृष्णा चैव कपर्द्दिनी ।। कुमुदा कृष्णदेहा च कालिन्दी कुलपूजिता ।। ७ ।। काश्यपी कृष्णमाता च कुलिशाङ्गी कला तथा ।। क्रींरूपा कुलगम्या च कमला कृष्णपूजिता ।। ८ ।। कृशाङ्गी किन्नरी कर्त्री कलकण्ठी च कार्तिकी ।। कम्बुकण्ठी कौलिनी च कुमुदा कामजीविनी ।। ९ ।। कुलस्त्री कीर्त्तिका कृत्या कीर्तिश्च कुलपालिका ।। कामदेवकला कल्पलता कामाङ्गवर्द्धिनी ।। १० ।। कुन्ता च कुमुदप्रीता कदम्बकुसुमोत्सुका ।। कादम्बिनी कमलिनी कृष्णानन्दप्रदायिनी ।।११।। कुमारीपूजनरता कुमारीगणशोभिता ।। कुमारीरञ्जनरता कुमारीव्रतधारिणी ।। १२ ।। कङ्काली कमनीया च कामशास्त्रविशारदा ।। कपालखट्वाङ्गधरा कालभैरवरूपिणी ।।१३। कोटरी कोटराक्षी च काशी कैलासवासिनी ।। कात्यायिनी कार्य्य-करी काव्यशास्त्रप्रमोदिनी ।।१४।। कामाकर्षणरूपा च कामपीठनिवासिनी ।। कङ्गिनी काकिनी क्रीडा कुत्सिता

कलहप्रिया ॥१५॥ कुण्डगोलोद्भावप्राणा कौशिकी कीर्ति-
वर्द्धिनी ॥ कुम्भस्तनी कटाक्षा च काव्या कोकनद-
प्रिया ॥ १६ ॥ कान्तारावासिनी कान्तिः कठिना कृष्ण-
वल्लभा ॥ इति ते कथितन्देवि गुह्याद्गुह्यतरम्परम् ॥१७॥
प्रपठेद्यः इदन्नित्यङ्कालीनाम शताष्टकम् ॥ त्रिषु लोकेषु
देवेशि तस्यासाध्यन्न विद्यते ॥ १८ ॥ प्रातःकाले च
मध्याह्ने सायाह्ने च सदा निशि ॥ यः पठेत्परया भक्त्या
कालीनाम शताष्टकम् ॥ १९ ॥ कालिका तस्य गेहे च
संस्थानंकुरुते सदा ॥ शून्यागारे श्मशाने वा प्रान्तरे जल-
मध्यतः ॥ २० ॥ वह्निमध्ये च सङ्ग्रामे तथा प्राणस्य
संशये ॥ शताष्टकञ्जपन्मन्त्री लभते क्षेममुत्तमम् ॥२१॥
काली संस्थाप्य विधिवत्स्तुत्वा नामशताष्टकैः ॥ साधक-
स्सिद्धिमाप्नोति कालिकायाः प्रसादतः ॥ २२ ॥

इत्यष्टोत्तरशतनाम समाप्तम् ॥

अथ भुवनेश्वरीतन्त्रम्

भुवनेश्वरी ध्यानम्

उद्यद्दिनद्युतिमिन्दु किरीटां तुंग कुचां नयनत्रय-युक्ताम् ।। स्मेरमुखीं वरदांकुशपाशभीतिकरां प्रभजे भुवनेशीम् ,।

अथ यन्त्रोद्धारः

पद्ममष्टदलबाह्ये वृत्तं षोडशभिर्दलैः ।। विलिखेत्कर्णिकामध्ये षट्कोणमतिसुन्दरम् ।। चतुरस्त्रञ्चतुर्द्वारमेवम्मण्डलमालिखेत् ।।

अथ मन्त्रोद्धारः

नकुलीशोऽग्निमारूढो वामनेत्रार्द्धचन्द्रवत् ।। वीजं तस्याः समाख्यातं सेवितं सिद्धिकाङ्क्षिभिः ।।

अथ मन्त्रः । ॐ "ह्रीं"

अथ पूजाप्रयोगः

प्रातःकृत्यादिपीठन्यासान्तङ्कर्म विधाय केसरेषु मध्ये च पीठशक्तिन्न्यसेत् ।। ॐ जयायैनमः एवं विजयायैनमः । अजितायै० अपराजितायै० नित्यायै० विलासिन्यै० दोग्ध्र्यै०

अघोरायै० मङ्गलायै० कर्णिकायां ह्रीँ सर्वशक्तिकमलासानाय नमः । ततः

अस्य भुवनेश्वरीमन्त्रस्य शक्तिः ऋषिर्गायत्री छन्दो भुवनेश्वरी देवता हकारो वीजम् ईकारः शक्ति रेफः कीलकं चतुर्वर्गसिद्धयर्थे विनियोगः । ऋष्यादिन्यासः । शिरसि शक्तये ऋषयेनमः । मुखे गायत्रीछन्दसे नमः । हृदि भुवनेश्वर्यैँ देवतायै नमः । गुह्ये हकराय बीजाय नमः । पादयोः ईकाराय शक्तये नमः । सर्वांगे रकाराय कीलकाय नमः । ततो न्यासः । शिरसि ॐ हृल्लेखायै नमः । वदने ऐँगगनायै नमः । हृदये ऊँ रक्तायै नमः । गुह्ये ईंकरालिकायै नमः । पादयोःअं महोच्छुष्मायै नमः । ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु ताः विन्यसेत् । हृल्लेखाम्मूर्द्ध्निवदने गगनां हृदयाम्बुजे ॥ रक्ताङ्करालिकाङ्गुह्ये महोच्छुष्माम्पदद्वये ॥ सत्यादिपञ्चह्लस्वाढ्या न्यस्तव्या भूत सप्रभाः ।

ततः कराङ्गन्यासौ ॥ ह्रां अगुष्ठाभ्यां नमः । ह्रीं-तर्जनीभ्यां स्वा० ।ह्रूंमध्यमाभ्यां वषट्।हैंअनामिकाभ्यां हुमः। हौंकनिष्ठिकाभ्यां वौषट् । हःकरतलकरपृष्ठाभ्याम्फट् ॥ एवं हृदयादिषु ॥ षड्दीर्घभाजा वीजेन कुर्यादङ्गक्रियाम्मनोः ॥ स्वच्छन्दसङ्ग्रहे ॥ स्वरं विहाय वीजन्तु दीर्घषट्केन योजयेत् । षडङ्गानि विधेयानि सर्वत्रायं विधिः स्मृतः ॥

अङ्गुलीनियमस्तु पूर्व एवोक्तः । कराङ्गन्यासे एवं क्रमः । ततः भाले ॐ गायत्रीसहितब्रह्मणे नमः । दक्षिणकपोले ॐ सावित्रीसहितविष्णवे नमः । वामकपोले ॐवागीश्वरी-सहितमहेश्वराय नमः । वामकर्णे ॐश्रीसहितधनपतये नमः । मुखे ॐरतिसहितस्मराय नमः । दक्षिणकर्णोपरि ॐपुष्टि-सहितगणपतये नमः । इतिन्यसेत् । एवङ्कण्ठमूले दक्षस्तनवामांसहृदयदक्षिणांसदक्षिणपार्श्ववामपार्श्वनाभिदेशेषु ब्राह्-म्यादि न्यसत् ॥ वर्णभिन्नन्यासो विश्वसारे ॥ ॐकारा-दिनमोऽतञ्च विन्यसेत्तु यथास्थितिः ॥ विधिना विन्य-सेत्सर्वं शङ्करस्य मतेन च ॥ एवं सर्वत्र । ततो ललाटे ॐ ब्राह्म्यैनमः । वामांसे ॐमाहेश्वर्यैं नमः । वामपार्श्वे ॐकौमार्यैं नमः । जठरे ॐवैष्णव्यै नमः । दक्षिणपार्श्वे ॐ वाराह्यै नमः । दक्षिणांसे ॐइन्द्राण्यै नमः । ककुदि ॐ-चामुण्डायै नमः । हृदि ॐमहालक्ष्म्यै नमः । इति विन्यस्य मूलेन व्यापकत्रयङ्कुर्यात् ॥

ततो ध्यानम् ॥ "उद्यद्दिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ॥ स्मेरमुखीं वरदाङ्कशपाशभीति-कराम्प्रभजे भुवनेशीम् ॥ १ ॥

एवन्ध्यात्वा मानसैः सम्पूज्य वहिः पूजामारभेत् ॥ पूजा यन्त्रम् ॥ पद्ममष्टदलम्वाह्ये वृत्तं षोडशभिर्दलैः ॥ विलिखेत्कर्णिकामध्ये षट्कोणमतिसुन्दरम् ॥ चतुरस्रञ्च-तुर्द्वारमेवम्मण्डलमालिखेत् ॥ ततो दीक्षापद्धत्युक्तपीठ-

पूजां कृत्वा पीठशक्तीः पूजयेत् । तद्यथा । पूर्वादिकेसरेषु जयायै० विजयायै० अजितायै० अपराजितायै० नित्यायै० विलासिन्यै० दोग्ध्र्यै० अघोरायै० मध्ये मङ्गलायै० प्रणवादितनमोऽन्तेन पूजयेत् ॥ तदुपरि ह्रींसर्वशक्तिकमलासनाय-नमः ॥ जयाख्यां विजयां पश्चादजितां चापराजिताम् ॥ नित्यां विलासिनीन्दोग्ध्रीमघोराम्मङ्गलामपि । बीजाद्य-मासनं दत्त्वा मूर्त्तिं तत्रैव कल्पयेत् ॥ ततः पूर्ववद्ध्यात्वाऽऽवाहनादि पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय । केसरेषु ऐशान्यादिकोणे मध्ये दिक्षु च । ततो ह्रीं हृदयायनमः इत्यादिना षडङ्गेन पूजयित्वा पञ्चपुष्पाञ्जलीन्दद्यात् ॥

ततः आवरणपूजा । कर्णिकामध्ये ॐहृल्लेखायैनमः ॥ पूर्वे ऐंगगनायै० । दक्षिणे ॐ रुक्तायै० । उत्तरे ईंकरालिकायै० । पश्चिमे हूं महोच्छुष्मयै० । षट्कोणे पूर्वे ॐगायत्र्यैनमः ॐब्रह्मणेनमः । नैर्ऋत्ये ॐसावित्र्यैनमः विष्णवे नमः ॥ वायव्ये ॐसरस्वत्यै नमः ॐरुद्राय नमः । वह्निकोणे ॐ श्रियै नमः ॐधनपतये नमः । पश्चिमे ॐरत्यै नमः ॐस्मराय नमः । ऐशान्याम् ॐपुष्ट्यै नमः ॐगणपतये नमः । षट्कोणस्योभयपार्श्वयोः ॐ शङ्खनिधये नमः ॐपद्मनिधये-नमः । केसरेषु अग्निनैर्ऋतिवाय्वीशानाग्रेषु । चतुर्दिक्षु च ह्रांहृदयाय नम इत्यादिना षडङ्गेन पूजयेत् ॥ केसरेष्वग्निकोणादि हृदयादीनि पूजयेत् । नेत्रमग्निदिशाद्यन्तं ध्यातव्याश्चाङ्गदेवता । एवं सर्वत्र ॥ भैरव्यादौ तु विशेषो

वक्तव्यः । अष्टदलेषु पूर्वादिक्रमेण । ॐअनङ्गकुसुमायैनमः एवमनङ्गकुसुमातुरायै नमः अनङ्गमदनातुरायै० भुवनपालायै० गगनवेगायै० शशिरेखायै० । षोडशदलेषु पूर्वादिदिक्षु ॐकरालिन्यै० एवं विकरालिन्यै० उमायै० सरस्वत्यै० श्रियै० दुर्गायै० उषायै० लक्ष्म्यै० श्रुत्यै० स्मृत्यै० धृत्यै० श्रद्धायै० मेधायै० मत्यै० कान्त्यै० आर्य्यायै० । पद्मादवहिः पूर्वादिदिक्षु अनङ्गरूपायै अनङ्गमदनायै० मदनातुरायै० भुवनवेगायै० भुवनपालिकायै० सर्वशिशिरायै० अनङ्गवेदनायै० अनङ्गमेखलायै० प्रणवादिनमोऽन्तेन पूजयेत् । तद्बहिः गृहे पूर्वादि ॐलां इन्द्राय देवाधिपतये सायुधायेत्यादि० । रं अग्नये तेजोधिपतये सायुधायेत्यादि० । यं यमाय प्रेताधिपतये सायुधायेत्यादि० । क्षां निर्ऋतये रक्षोऽधिपतये सायुधायेत्यादि । वं वरुणाय जलाधिपतये सायुधायेत्यादि० । वां वायवे प्राणाधिपतये सायुधायेंत्यादि० । सं सोमाय ताराधिपतये सायुधायेत्यादि० । हां ईशानाय गणाधिपतये सायुधायेत्यादि० । इन्द्रेशानयो र्मध्ये आब्रह्मणे प्रजाधिपतये सायु० । निर्ऋतिवरुणयोर्मध्ये ह्रीं अनन्ताय नागाधिपतये सायु० । तथा च लोकपाला वहिः पूज्याः समस्ताश्चतुरस्रके ॥ पुरुहूतेशयोर्मध्ये रक्षोवरुणयोस्तथा । ब्रह्मविष्णु सदा पूज्यौ दिगीशार्चां विदुर्बुधाः ॥ इन्द्रादिलोकपालानां ये मन्त्रास्ते ध्रुवादिकाः। स्वस्वबीजान्विताः सर्वे चतुर्थ्यन्तनमोऽन्तकाः ॥ इति वच-

नात् । सर्वत्र प्रणवादि । एतेषाम्वीजान्याहुः क्रियासारे । पृथ्व्यग्निपवनाद्यन्तवरुणानिलसेश्वरैः ॥ अनन्तर्बिन्दुसंयुक्तैरच्चर्या पाशेन मायया ॥ तथा च यामले । अन्ते यज्ञे लोकपालान् मूलपारिदधान्वितान् ॥ हेतिजात्याधिपोपेतान् दिक्षु पूर्वादितो यजेत् ॥ सवाहनायेति दीपिका । तद्वहिः पूर्वादि वज्राय शक्तये दण्डाय खड्गाय पाशाय अङ्कुशाय गदायै शूलाय पद्माय वक्राय प्रणवादि नमोऽन्तेन पूजयते । ततो धूपादिविसर्जनान्तंकर्मं समापयेत् । अस्य पुरश्चरणंद्वात्रिंशल्लक्षजपम्प्रजपेत् । मन्त्रद्वात्रिंशल्लक्षमानसः । त्रिस्वादुयुक्तैर्जुहुयादष्टद्रव्यैर्दशांशतः ॥ अष्टद्रव्याणि यथा । अश्वत्थोदुम्बर-प्लक्ष-न्यग्रोध-समिधस्तिलाः । सिद्धार्थ-पायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः ॥ त्रिस्वाद्विति घृत-मधु-शर्करेति ॥ इति भुवनेश्वरी पूजापद्धतिः ॥

अथ स्तोत्रम्

अथानन्दमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीम् ॥ ईडे सकलसम्पत्त्यै जगत्कारणमम्बिकाम् ॥ १ ॥ विद्यामशेषजननीमरविन्दयोनेर्विष्णोः शिवस्य च वपुः प्रतिपादयित्रीम् ॥ सृष्टिस्थितिक्षयकरीञ्जगतांत्रयाणां स्तुत्वा गिरं विमलयाम्यहमम्बिके त्वाम् ॥ २ ॥ पृथ्व्या जलेन शिखिना मरुताम्बरेण होत्रेन्दुना दिनकरेण च मूर्त्तिभाजः ॥ देवस्य मन्मथरिपोरपि शक्तिमत्ताहेतुस्त्वमेव खलु पर्वतराजपुत्रि ॥ ३ ॥ त्रिस्रोतसः सकलदेवसमर्चितायाः वैशिष्ट्यका-

रणमवैमि तदेव मातः ॥ त्वत्पादपङ्कजपरागपवित्रितासु शम्भोर्जटासु सततम्परिवर्तनं यत् ॥ ४ ॥ आनन्दयेत्कुमुदिनीमधिपः कलानान्नान्यामिनः कमलिनीमथनेतरां वा ॥ एकस्य मोदनविधौ परमेकमीष्टे त्वन्तु प्रपञ्चमभिनन्दयसि स्वदृष्टया ॥ ५ ॥ आद्याप्यशेषजगतान्नवयौवनासि शैलाधिराजतनयाप्यतिकोमलासि ॥ त्रय्याः प्रसूरपि तया न समीक्षितासि ध्येयासि गौरि मनसो न पथि स्थितासि ॥ ६ ॥ आसाद्य जन्म मनुजेषु चिराद्दुरापंतत्रापि पाटवमवाप्य निजेन्द्रियाणाम् ॥ नाभ्यर्चयन्ति जगताञ्जनयित्रि ये त्वान्निश्रेणिकाग्रमधिरुह्य पुनः पतन्ति ॥७ ॥ कर्पूरचूर्णहिमवारिविलोडितेन ये चन्दनेन कुसुमैश्च सुजातगन्धैः ॥ आराधयन्ति हि भवानि समुत्सुकास्त्वान्ते खल्वखण्ड-भुवनाधिभुवः प्रथन्ते ॥ ८ ॥ आविश्य मध्यपदवीम्प्रथमे सरोजे सुप्ता हि राजसदृशी विरचय्य विश्वम् ॥ विद्युल्लतावलयविभ्रममुद्वहन्ती पद्मानि पञ्च विदलय्य समश्नुवाना ॥ ९ ॥ तन्निर्गतामृतरसैरभिषिच्य गात्रम्मार्गेण तेन विलयम्पुनरप्यवाप्ता ॥ येषां हृदि स्फुरसि जातु न ते भवेयु र्मातर्महेश्वरकुटुम्बिनिगर्भभाजः ॥१०॥ आलम्बिकुण्डलभरामभिरामवक्त्रामापीवरस्तनतटीतनु-वृत्तमध्याम् ॥ चिन्ताक्षसूत्रकलशालिखिताढ्यहस्तामावर्त्तयामि मनसा तव गौरि मूर्तिम् ॥ ११ ॥ आस्थाय योगमविजित्य च वैरिषट्कमा-

वध्यचेन्द्रियगणम्मनसि प्रसन्ने ।। पाशाङ्कुशाभयवराढ्य-
करांशुवक्त्रामालोकयंति भुवनेश्वरि योगिनस्त्वाम्।। १२ ।।
उत्तप्तहाटकनिभीङ्करिश्चतुर्भिरावर्त्तितामृतघटैरभिषिच्य -
मानाहस्तद्वयेन नलिने रुचिरे वहन्ती पद्मापि साभयकरा भ-
वसित्वमेव ।। १३ ।। अष्टाभिरुग्रविविधायुधवाहिनीभिर्दोर्व-
ल्लरीभिरधिरुह्य मृगाधिवासम् ।। दूर्वादलद्युतिरमर्त्यविप-
क्षयक्षान्न्यक्कुर्वती त्वंमसि देवि भवानि दुर्गे ।। १४ ।।
आविर्निदाघजलशीकरशोभिवक्त्राङ्गुञ्जाफलेन परिकल्पि-
तहारयष्टिम् ।। रत्नांशुकामसितकान्तिमलङ्कृतान्त्वामा-
द्याम्पुलिन्दतरुणीमसकृन्नमामि ।। १५ ।। हंसैर्गति क्वणितनू-
पुरदूरदृष्टे मूर्तेरिवाप्तवचनैरनुगम्यमानौ ।। पद्माविवो
र्ध्वमुखरूढसुजातनालौ श्रीकण्ठपत्नि शिरसैव दधे
तवाङ्घ्री ।। १६ ।। द्वाभ्यां समीक्षितुमतृप्तिमतेव दृग्भ्या-
मुत्पाद्यता त्रिनयनं वृषकेतनेन ।। सान्द्रानुरागभवनेन
निरीक्ष्यमाणे जंघे उभे अपि भवानि तवानतोऽस्मि ।।१७।।
उरू स्मरामि जितहस्तिकरावलेपौ स्थौल्येन मार्दवतया
परिभूतरम्भौ ।। श्रोणीभरस्य सहनौ परिकल्प्य दत्तौ
स्तम्भाविवाङ्गवयसा तव मध्यमेन ।। १८ ।। श्रोण्यौ स्तनौ
च युगपत्प्रथयिष्यतोच्चैर्बाल्यात्परेण वयसा परिकृष्णसारः ।।
रोमावलीविलसितेन विभाव्यमूर्त्तिर्मध्यन्तव स्फुरतु मे
हृदयस्य मध्ये ।। १९ ।। सख्यास्स्मरस्य हरनेत्रहुताशभीरो-
र्लावण्यवारिभरितन्नवयौवनेन ।। आपाद्यदत्तमिव पल्लव-

मप्रविष्टन्नाभिङ्कदापि तव देवि न विस्मरेयम् ॥ २० ॥ ईशोपि गेहपिशुनम्भसितन्दधाने काश्मीरकर्दममनुस्तनपङ्कजे ते ॥ स्नानोत्थितस्य करिणः क्षणलक्षफेनौ सिन्दूरितौ स्मरयतः समदस्य कुम्भौ ॥ २१ ॥ कण्ठातिरिक्तगलदुज्ज्वलकांतिधारा शोभौ भुजौ निजरिपोर्मकरध्वजेन कण्ठग्रहाय रचितौ किलदीर्घपाशौ मातर्मम स्मृतिपथन्न विलज्येताम् ॥ २२ ॥ नात्यायतं रुचिरकम्बुविलासचौर्य्यं भूषाभरेण विविधेन विराजमानम् ॥ कण्ठमनोहरगुणङ्गिरिराजकन्ये सञ्चिन्त्य तृप्तिमुपयामि कदापि नाहम् ॥२३॥ अत्यायताक्षमभिजातललाटपट्टम्मन्दस्मितेन दरफुल्लकपोलरेखम् ॥ विम्बाधरं खलु समुन्नतदीर्घनासं यत्ते स्मरत्यसकृदम्ब स एव जातः ॥२४॥ आविस्त्वयारकरलेखमनल्पगन्धपुष्पोपरिभ्रमदलिव्रजनिर्विशेषम् ॥ यश्चेतसा कलयते तव केशपाशं तस्य स्वयङ्गलति देवि पुराणपाशः ॥२५॥ श्रुतिसुरचितपाकन्धीमतां स्तोत्रमेतत् पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा ॥ स भवति पदमुच्चै-सम्पदाम्पादनम्रक्षितिपमुकुटलक्ष्मीर्लक्षणानाञ्चिराय ॥२६॥

इति भुवनेश्वरीस्तोत्रं समाप्तम् ॥

अथ कवचम्

देव्युवाच ॥ भुवनेश्याश्च देवेश या या विद्याः प्रकाशिताः ॥ श्रुताश्चाधिगताः सर्वाः श्रोतुमिच्छामि साम्प्रतम् ॥१॥ त्रैलोक्यमङ्गलन्नाम कवचं यत्पुरोदितम् ॥

ईश्वर उवाच । श्रृणु पार्वती वक्ष्यामि सावधानाऽव-
धारय ॥२॥ त्रैलोक्यमङ्गलन्नाम कवचम्मन्त्रविग्रहम् ।
सिद्धविद्यामयन्देवि सर्वैश्वर्यप्रदायकम् ॥३॥ पठनाद्धार-
णान्मर्त्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥४॥ त्रैलोक्यमङ्गल-
स्यास्य कवचस्य ऋषिश्शिवः ॥ छन्दोविराड् जगद्धात्री
देवता भुवनेश्वरी ॥ ५ ॥ धर्मार्थकाममोक्षेषु विनियोगः
प्रकीर्तितः ॥ ह्रींबीजम्मेशिरः पातु भुवनेशी ललाट-
कम् ॥६॥ ऐंपातु दक्षनेत्रम्मे ह्रींपातु वामलोचनम् ॥
श्रींपातु दक्षकर्णम्मे त्रिवर्णात्मा महेश्वरी ॥७॥ वामकर्णं
सदा पातु ऐंघ्राणम्पातु मे सदा ॥ ह्रींपातु वदनन्देवी
ऐंपातु रसनाम्मम ॥८॥ वाक्पुटा च त्रिवर्णात्मा कण्ठम्पातु
पराम्बिका ॥ श्रीं स्कन्धौ पातु नियतं ह्रीं भुजौ पातु
सर्वदा ॥ ९ ॥ क्लीं करौ त्रिपुटेशानी त्रिपुटैश्वर्य्यदायिनी ।
ओम्पातु हृदयं ह्रीं मे मध्यदेशं सदाऽवतु ॥ १० ॥ क्रौंपातु
नाभिदेशं सा त्र्यक्षरी भुवनेश्वरी । सर्वबीजप्रदा पृष्टं
पातु सर्ववशङ्करी ॥ ११ ॥ ह्रीं पातु गुददेशम्मे नमो
भगवती कटीम् । माहेश्वरी सदा पातु सक्थिनी जानु-
युग्मकम् ॥ १२ ॥ अन्नपूर्णा सदा पातु स्वाहा पातु
पदद्वयम् । सप्तदशाक्षरी पायादन्नपूर्णात्मिका पुरा ॥ १३ ॥
तारम्माया रमा कामः षोडशार्णा ततः परम् ॥ शिरःस्था
सर्वदा पातु विंशत्यर्णात्मिका परा ॥ १४ ॥ तारदुर्गे युगं
रक्षिणी स्वाहेति दशाक्षरी ॥ जय दुर्गा घनश्यामा पातु

माम्पूर्वती मुदा ।। १५ ।। मायाबीजादिका चैषा दशार्णा परा तथा ।। उत्तप्तकाञ्चना भासा जयदुर्गाननेऽवतु ।।१६।। तारं ह्रीं दुन्दुर्गायै नमोऽष्टार्णात्मिका परा ।। शंड्खचक्रधनुर्बाणवरामांदक्षिणेऽवतु ।। १७ ।। महिषामर्दिनी स्वाहा वसुवर्णात्मिका परा । नैर्ऋत्यां सर्वदा पातु महिषासुरनाशिनी ।। १८ ।। मायापद्मावती स्वाहा सप्तार्णा परिकीर्त्तिता । पद्मावती पद्मसंस्था पश्चिमे मां सदावतु ।। १९ ।। पाशाङ्कुशपुटा माये हि परमेश्वरी स्वाहा ।। त्रयोदशार्णा ताराद्या अश्वारूढाननेऽवतु ।। २० ।। सरस्वतीपञ्चशरे नित्यक्लिन्ने मदद्रवे ।। स्वाहारव्यक्षरीविद्या मामुत्तरे सदावतु ।। २१ ।। तारम्माया तु कवचं खे रक्षेत्सततं वधूः ।। हूँ क्षे ह्रीं फट् महाविद्या द्वादशार्णाखिलप्रदा ।। २२ ।। त्वरिताष्टाहिभिः पायाच्छिवकोणे सदा च माम् ।। ऐंक्लींसौःसा ततो बाला मामूर्ध्वदेशतोऽवतु ।। २३ ।। विन्द्वन्ता भैंरवी बाला भूमौ च मां सदावतु ।। इति ते कथितम्पुण्यं त्रैलोक्यमङ्गलम्परम् ।। २४ ।। सारं सारतरम्पुण्यम्महाविद्यौघ विग्रहम् ।। अस्यापि पठनात्सद्यः कुबेरोपि धनेश्वरः ।। २५ ।। इन्द्राद्याः सकला देवा पठनाद्धारणाद्यतः ।। सर्वसिद्धीश्वराः सन्तः सर्वैश्वर्यमवाप्नुयुः ।। २६ ।। पुष्पाञ्जल्यष्टकंदत्त्वा मूलेनैव पठेत्सकृत ।। सवंत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ।। २७ ।। प्रीतिमन्योन्यतः कृत्वा कमला निश्चला

गृहे ।। वाणी च निवसेद्वक्त्रे सत्यं सत्यन्न संशयः ।। २८ ।। यो धारयति पुण्यात्मा त्रैलोक्यमङ्गलाभिधम् । कवचं-परमम्पुण्यं सोऽपि पुण्यवतां वरः ।। २९ ।। सर्वैश्वर्य्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ।। पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ।। ३० ।। बहुपुत्रवती भूत्वा वन्ध्यापि लभते सुतम् । ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम् ।।३१।। एतत्कवचमज्ञात्वा यो जपेद्भुवनेश्वरीम् ।। दारिद्र यम्परमम्प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ।। ३२ ।। इति रुद्रयामले देवीश्वरसंवादे त्रैलोक्यमङ्गलन्नाम भुवनेश्वरीकवचं समाप्तम् ।।

अथ हृदयम्

देव्युवाच ।। भगवन्ब्रूहि तत्स्तोत्रं सर्वकामप्रसाधनम् ।। तस्यश्रवणमात्रेण नान्यच्छ्रोतव्यमिष्यते ।। १ ।। यदि मेऽनुग्रहः कार्य्यः प्रीतिश्चापि ममोपरि ।। तदिदंकथय ब्रह्मन् विमलं यन्महीतले ।। २ ।। ईश्वर उवाच ।। शृणु देवि प्रवक्ष्यामि सर्वकामप्रसाधनम् ।। हृदयम्भुवनेश्वर्यास्स्तोत्रमस्ति यशोद-यम् ।। ३ ।।

ॐ अस्य श्रीभुवनेश्वरीहृदयस्तोत्रमन्त्रस्य शक्तिऋर्षि-र्गायत्रीच्छन्दो भुवनेश्वरी देवता हकारो बीजं ईकारः शक्तिः रेफः कीलकं सकलमनोवाञ्छितसिद्धयर्थे पाठे विनियोगः ।।

अथाङ्गन्यासः ।। ॐ ह्रीं हृदयाय नमः । ॐ श्रीं शिरसे-

स्वाहा । ॐ ऐं शिखायै वषट् । ॐह्रींकवचाय हुम्। ॐऐं-अस्त्राय फट् ।। एवङ्करन्यासः ।।

अथ ध्यानम् ।। ध्यायेद्ब्रह्मादिकानांकृतजनि जननीं योगिनीं योगयोनिंदेवानाञ्जीवनायोज्ज्वलितजयपरज्योतिरुग्राङ्गधात्रीम् ।। शङ्खञ्चक्रञ्च बाणान्धनुरपि दधतीं-दोश्चतुष्काम्बुजातैर्मायामाद्यां विशिष्टाम्भवभवभुवनाम्भूभवाभारभूमिम् ।। ४ ।। यदाज्ञया यो-जगदाद्यशेषं सृजत्यजरश्रीपतिरौरसं वा ।। बिभर्त्ति संहन्ति भवस्तदन्ते भजामहे श्रीभुवनेश्वरीन्ताम् ।। ५ ।। जगज्जनानन्दकरीञ्जयाख्यां यशस्विनीं यन्त्रसुयज्ञयोनिम् ।। जितामितामित्रकृतप्रपञ्चाम्भजामहे श्रीभुवनेश्वरीन्ताम् ।। ६ ।। हरौ प्रसुप्ते भुवनत्रयान्ते अबातरन्नाभिजपद्मजन्मा ।। विधिस्ततोऽन्धे विदधारयत्पदम्भजामहे श्रीभुवनेश्वरीन्ताम् ।। ७ ।। न विद्यते कापि तु जन्म यस्याः न वा स्थितिस्सान्ततिकीह यस्याः ।। न वा निरोधेऽखिलकर्म यस्याः भजामहे० ।।८।। कटाक्षमोक्षाचरणोग्रवित्ता निवेशितार्णाः करुणार्द्रचित्ता सुभक्तये एति समीप्सितं या भजामहे० ।। ९ ।। यतो जगज्जन्म बभूव योनेस्तदेव मध्ये प्रतिपाति यां वा । तदत्ति यान्तेऽखिलमुग्रकाली भजामहे० १०।। ।। सुषुप्तिकाले जनमध्ययन्त्या यया जनस्वप्नमवैति किञ्चित् ।। प्रबुद्धयते जाग्रति जीव एष भजामहे० ।। ११ ।। दयास्फुरत्कोरकटाक्षलाभान्न के त्रयस्याः प्रलभन्ति सिद्धाः ।। कवि-

त्वमीशित्वमपि स्वतन्त्रा भजामहे० ।। १२ ।। लसन्मुखाम्भोरुहमुत्फुरन्तं हृदि प्रणिध्याय दिशि स्फुरन्तः ।। यस्याः कृपार्द्रम्प्रविकाशयन्ति भजामहे० ।। १३ ।।

यदानुरागानुगतालिचित्राश्चिरन्तनप्रेमपरिप्लुताङ्गाः ।। सुनिर्भयास्सन्ति प्रमुद्य यस्याः भजामहे० ।। १४ ।। हरिविरञ्चिर्हर ईशितारः पुरोऽवतिष्ठन्ति परंनताङ्गाः ।। यस्यास्समिच्छन्ति सदानुकूल्यम्भजामहे० ।। १५ ।। मनुं यदीयं हरमग्निसंस्थंततश्च वामश्रुतिचन्द्रशक्तम् ।। जपन्ति ये स्युस्सुरवन्दितास्ते भजामहे० ।। १६ ।। प्रसीदतु प्रेमरसार्द्रचित्ता सदा हि सा श्रीभुवनेश्वरी मे ।। कृपाकटाक्षेण कुवेरकल्पा भवन्ति यस्या पदभक्तिभाजः ।। १७ ।। मुदा सुपाट्यम्भुवनेश्वरीयं सदा सतां स्तोत्रमिदं सुसेव्यम् ।। सुखप्रदं स्यात्कलिकल्मषघ्नं सुश्रृण्वतां सम्पठताम्प्रशस्यम् ।। १८ ।। एतत्तु हृदयस्तोत्रम्पठेद्यस्तु समाहितः ।। भवेत्तस्येष्टदा देवी प्रसन्ना भुवनेश्वरी ।। १९ ।। ददाति धनमायुष्यम्पुण्यमतिन्तथा ।। नैष्ठिकींदेवभक्तिञ्च गुरुभक्तिं विशेषतः ।। २० ।। पूर्णिमायाञ्चतुर्दश्यांकुजवारे विशेषतः ।। पठनीयमिदं स्तोत्रन्देवसद्मनि यत्नतः ।। २१ ।। यत्र कुत्रापि पाठेन स्तोत्रस्यास्य फलम्भवेत् ।। सर्वस्थानेषु देवेश्याः पूतदेहस्सदा पठेत् ।। २२ ।। इति नीलसरस्वतीतन्त्रे भुवनेश्वरीपटले श्रीदेवीश्वरसंवादे श्रीभुवनेश्वरीहृदयस्तोत्रं समाप्तम् ।।

अथ शतनाम

कैलासशिखरे रम्ये नानारत्नोपशोभिते ॥ नरनारी-हितार्थाय शिवम्पप्रच्छ पार्वती ॥ १ ॥ देव्युवाच ॥ भुवनेश्वरी महाविद्यानाम्नामष्टोत्तरं शतम् । कथयस्व महादेव यद्यहं तव वल्लभा ॥ २ ॥ ईश्वर उवाच ॥ श्रृणु देवि महाभागे स्तवराजमिदं शुभम् ॥ सहस्रनाम्ना-मधिकं सिद्धिदम्मोक्षहेतुकम् ॥ ३ ॥ शुचिभिः प्रातरुत्थाय पठितव्यं समाहितैः ॥ त्रिकालं श्रद्धया युक्तैः सर्वकाम-फलप्रदम् ॥ ४ ॥

ॐ अस्य श्रीभुवनेश्वर्य्यष्टोत्तरशतनामस्तोत्रस्य शक्तिर्ऋषिर्गायत्री छन्दो भुवनेश्वरी देवता चतुर्वर्ग-साधने जपे विनियोगः ॥ महामाया महाविद्या महायोगा महोत्कटा ॥ माहेश्वरी कुमारी च ब्रह्माणी ब्रह्मरूपिणी ॥ ५ ॥ वागीश्वरी योगरूपा योगिनीकोटि-सेविता ॥ जया च विजया चैव कौमारी सर्वमङ्गला ॥ ६ ॥ हिङ्गुला च विलासी च ज्वालिनी ज्वालरूपिणी ॥ ईश्वरी क्रूरसंहारी कुलमार्गप्रदायिनी ॥ ७ ॥ वैष्णवी सुभगाकारी सुकुल्या कुलपूजिता ॥ वामाङ्गा वामचारा च वामदेवप्रिया तथा ॥ ८ ॥ डाकिनीयोगिनीरूपा भूतेशी भूतनायिका ॥ पद्मावती पद्मनेत्रा प्रबुद्धा च सरस्वती ॥ ९ ॥ भूचरी खेचरी माया मातङ्गी भुवने-श्वरी ॥ कांता पतिव्रता साक्षी सुचक्षुः कुंडवासिनी ॥१०॥

उमा कुमारी लोकेशी सुकेशी पद्मरागिणी ।। इन्द्राणी ब्रह्मचाण्डाली चण्डिका वायुवल्लभा ।। ११ ।। सर्वधातृमयीमूर्त्तिर्जलरूपा जलोदरी ।। आकाशी रणगा चैव नृकपालविभूषणा ।। १२ ।। नर्मदा मोक्षदा चैव कामधर्मार्थदायिनी ।। गायत्री चाथ सावित्री त्रिसन्ध्या तीर्थगामिनी ।। १३ ।। अष्टमी नवमी चैव दशम्येकादशी तथा। पौर्णमासी कुहूरूपा तिथिमूर्त्तिस्वरूपिणी ।। १४ ।। सुरारिनाशकारी च उग्ररूपा च वत्सला ।। अनला अर्द्धमात्रा च अरुणा पीतलोचना ।। १५ ।। लज्जा सरस्वती विद्या भवानी पापनाशिनी ।। नागपाशधरा मूर्त्तिरगाधा धृतकुण्डला ।।१६।। क्षत्ररूपी क्षयकरी तेजस्विनी शुचि स्मिता। अव्यक्ताव्यक्तलोका च शम्भुरूपा मनस्विनी ।। १७ ।। मातङ्गी मत्तमातङ्गी महादेवप्रिया सदा।। दैत्यहा चैव वाराही सर्वशास्त्रमयी शुभा ।। १८ ।। य इदम्पठते भक्त्या शृणुयाद्वा समाहित: ।। अपुत्रो लभते पुत्रं निर्धनो धनवान् भवेत् ।। १९ ।। मूर्खोपि लभते शास्त्रञ्चौरोपि लभते गतिम् ।। वेदानाम्पाठको विप्र: क्षत्रियो विजयी भवेत् ।। २० ।। वैश्यस्तु धनवान्भूयाच्छूद्रस्तु सुखमेधते। अष्टम्यांच चतुर्दश्याँ नवम्यां चैव चेतस: ।। २१ ।। ये पठन्ति सदाभक्त्या न ते वै दु:खभागिन: । एककालं द्विकालं वा त्रिकालं वा चतुर्थकम् ।।२२।। ये पठन्ति सदा भक्त्या स्वर्गलोके च पूजित: । रुद्रं दृष्ट्वा यथा देवा: पन्नगा: गरुडं यथा । शत्रव: प्रपलायन्ते तस्य वक्त्रविलोकनात् ।।

इति श्रीरुद्रयामले देवीशंकर संवादे भुवनेश्वरी अष्टोत्तर शत नामस्तोत्रसमाप्तम् ।।


3. अथछिन्नमस्तकातन्त्रम्

ध्यानम्

प्रत्यालीढपदां सदैव दधतीं छिन्नं शिरः कर्तृकाम् । दिग्वस्त्रां स्वकवन्धशोणितसुधाधारांपिवन्तीं मुदा । नागावद्धशिरोमणित्रिनयनां हृद्युत्पलालंकृतां । रत्यासक्त मनो भवोपरिदृढां ध्यायेज्जवासन्निभाम् । दक्षे चातिसिता-वियुक्तचिकुराकर्त्री तथा खप्परं हस्ताभ्यां दधती रजो गुणभवा नाम्नापि सा वर्णिनी । देव्याः छिन्नकबन्धतः पतदसृग्धारां पिवन्ती मुदा । नागाबद्ध शिरोमणिः मनुविदा ध्येया सदा सा सुरैः । प्रत्यालीढपदा कवन्धविगलद्रक्तं पिवन्ती मुदा । सैषा सा प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी । शक्तिः सापि परात्परा भगवती नाम्नापरा डाकिनी । ध्येया ध्यानपरा सदा सविनयं भक्तेष्ट भूति-प्रदा ॥

अथ यन्त्रोद्धारः

त्रिकोणं विन्यसेदादौ तन्मध्ये मण्डलत्रयम् ॥ तन्मध्ये विन्यसेद्योनिंद्वारत्रयसमन्विताम् ॥ बहिरष्टदलंपद्मम्भू-बिम्बत्रियतयम्पुनः ॥ कूर्चंबीजं लिखेन्मध्ये त्रिकोणे फट्समन्वितम् ॥



अथ मन्त्रोद्धारः

लक्ष्मी प्रथमबीजेऽस्ति लज्जाबीजे मनोभवः ।। तृतीये-ऽस्मिन्सदा देवी महापातकनाशिनी ।। चतुर्थे तु गुणातीता मुक्तिविद्याप्रदायिका ।। वकारे वरुणः साक्षाज्जकारे तु सुराधिपः ।। रेफे हुताशनो देवो वकारे वसुधाधिपः ।। ऐकारे त्रिपुरादेवी रेफे त्रिपुरसुन्दरी ।। त्रैलोक्यविजया देवी सदैवौकारसंस्थिता ।। चकारे चन्द्रमा देवो नकारे हि विनायकः ।। ईकारे कमला साक्षाद्यकारे च सरस्वती । मायायुग्मे सदा देवी प्रकृत्या सह सङ्गता ।। वैखरी चैव फट्कारे स्वाकारे कुसुमायुधः ।। हाकारे च रतिस्तिष्ठेदेवं मन्त्रसमुच्चये ।।

अथ मन्त्रः

ओं श्रीं ह्रीं क्लीं ऐं वैरोचनीये हूं हूं फट् स्वाहा ॥

अथ पूजाविधिः

प्रातः कृत्यादिकङ्कृत्वा मन्त्राचमनं कुर्य्यात् ॥ यथा। लक्ष्मीमायाकूर्च्चवीजैस्त्रिभिः पीत्वाम्वुसाधकः ॥ वाग्भवेनोष्ठौ सम्मृज्य मायाभ्यान्तु द्विरुन्मृजेत् ॥ कूर्च्चेन क्षालयेत्पाणी एभिमन्त्रैश्च विन्यसेत् ॥ श्रीमायाकूर्च्चवाक्कामत्रिपुटाभगवर्णकैः ॥ कामकलाकुशाभ्याञ्च वक्त्रनासाक्षिकर्णकान् ॥ नाभिहृन्मस्तकञ्चांसौ स्पृष्टा शम्भुर्भवेत्क्षणात् ॥ आचम्यैवछिन्नस्तं वत्सरानाम्प्रपश्यति ॥ ततः प्राणायामान्तं विधाय षोढान्यासङ्कुर्यात् ॥ मन्त्रषोढान्ततः कुर्यात्त्रैलोक्यवशकारिणीम् ॥ श्रीवालात्रिपुटायोनी प्रसादप्रणवैस्तथा ॥ कालीवध्वङ्कुशैः कामकलाकूर्चास्त्रकैः क्रमात् ॥ षोडशी मनुवर्णैश्च पृथगष्टादशाक्षरी ॥ एभिर्बीजैर्मातृकार्णां स्वेषुं स्थानेषु विन्यसेत्। एषा ब्रह्मस्वरूपा हि वीजषौढा प्रकीर्तिता ॥ अस्याः संन्यसनात्सर्वे वज्रदेहा भवन्ति हि ॥ सर्वैश्वर्ययुतास्ते हि जीवनमुक्ताः दशाब्दतः ॥ ततः विनियोगः ॥

अस्य मन्त्रस्य भैरव ऋषिः सम्राट्छन्दः छिन्नमस्ता देवता हूंकारद्वयं बीजं स्वाहा शक्तिरभीष्टार्थसिद्धये विनियोगः। ऋष्यादिन्यासः यथा ॥ शिरसि भैरवऋषयेनमः। मुखे सम्राट्छन्दसेनमः। हृदि छिन्नमस्तादेवतायै

नमः । गुह्ये हूं हुंबीजायनमः । पादयोः स्वाहाशक्तयेनमः ॥ ततः कराङ्गन्यासौ । ओं आंखड्गायहृदयायस्वाहा इति कनीयस्योः । ओंईंसुखड्गायशिरसे स्वाहा इतिपवित्राङ्गुल्योः । ओंऊँसुवज्रायशिखायैस्वाहा इतिमध्यमयोः । ओंऐंपाशाय कवचाय स्वाहा इतितर्जन्योः । ओंऔंअङ्कुशायनेत्रत्रयाय स्वाहा इत्यङ्गुष्ठयोः । ओंअः सुरक्षारक्षासुरक्षायास्त्रायफट्इतिकरतलकरपृष्ठयोः । एवं हृदयादिषु ॥ तदुक्तम्भैरवतन्त्रे । उच्चरेत्पूर्वमाकारम्बिन्दुलाञ्छितमस्तकम् । खड्गायहृदयायेति स्वाहा युक्तङ्कनीयसि ॥ ईंकारश्च ततो देवि चन्द्रकोटिसमप्रभम् ॥ सुखड्गाय ततो वाच्यं शिरसे तदनन्तरम् ॥ स्वाहायुक्तन्ततो वाच्यम्पवित्राङ्गुलिसँयुतम् ॥ ओंकारञ्च ततो वाच्यम्बिन्दुलाञ्छितमस्तकम् ॥ सुवज्राय ततो वाच्यं शिखायै तदनन्तरम् ॥ स्वाहान्तंमध्यमायाञ्च विन्यसेत्तदनन्तरम् ॥ मात्रांद्वादशिकांदेवीं विन्यसेच्च ततः परम् ॥ पाशायेति समुच्चार्य्य प्रवदेत्कवचाय च । स्वाहान्तं विन्यसेन्मन्त्रन्तर्जन्यान्तदनन्तरम् ॥ ओंकारञ्च ततो देवि चाङ्कुशन्तदनन्तरम् ॥ नेत्रत्रयायस्वाहान्तमङ्गुष्ठे करयोः द्वयोः ॥ अकारश्च विसर्गान्तं सुरक्षारक्षसँयुतम् ॥ अःसुरक्षायसंय्युक्तमस्त्रायेति ततः परम् ॥ षडक्षरसमायुक्तं विन्यसेत्करयोर्द्वयोः ॥ हृदि मूर्घ्नि शिखायाञ्च कवचे नेत्रमण्डले ॥ यावदस्त्रश्चतुर्दिक्षु विदिक्षु च यथाक्रमम् ॥ त्रिशक्तितन्त्रे भैरववाक्यम् ॥

उच्चरेत्प्रणवम्पूर्वमाकारंबिन्दुसँयुतम् । इत्यादिवाक्यात् कराङ्गेषु प्रणवसंवलितो न्यासः ॥ ततो मूलेन मस्तकादिपादपर्यन्तम्पादादिमस्तकपर्य्यन्तं वारत्रयन्न्यसेत् ॥ ततो ध्यानम् ॥ स्वनाभौ नीरजंध्यायेदर्द्धं विकसितं सितम् ॥ तत्पद्मकोशमध्ये तु मण्डलञ्चण्डरोचिषः ॥ जपाकुसुमसङ्काशं रक्तबन्धूकसन्निभम् ॥ रजःसत्त्वतमोरेखा योनिमण्डलमण्डितम् ॥ मध्ये तु ताम्महादेवीं सूर्यकोटिसमप्रभाम् ॥ छिन्नमस्ताङ्करे वामे धारयन्तीं स्वमस्तकम् ॥ प्रसारितमुखीन्देवीं लेलिहानाग्रजिह्विकाम् ॥ पिबन्तीं रौधिरीन्धारान्निजकण्ठविनिर्गताम् ॥ विकीर्णकेशपाशाञ्च नानापुष्पसमन्विताम् ॥ दक्षिणे च करे कर्त्रीम्मुण्डमालाविभूषिताम् ॥ दिगम्वराम्महाघोराम्प्रत्यालीढपदे स्थिताम् ॥ अस्थिमालाधरान्देवीन्नागयज्ञोपवीतिनीम् ॥ रतिकामोपरिष्ठाञ्च सदा ध्यायन्ति मन्त्रिणः ॥ सदा षोडशवर्षीयाम्पीनोन्नतपयोधराम् ॥ विपरीतरतासक्तो ध्यायेद्रतिमनोभवौ ॥ डाकिनीवर्णिनीयुक्तं वामदक्षिणयोगतः ॥ देवीगलोच्छलद्रक्तधारापानम्प्रकुर्वतीम् ॥ वर्णिनीलोहितां सौम्याम्मुक्तकेशीन्दिगम्बराम् ॥ कपालकर्तृकाहस्ताँ वामदक्षिणयोगतः ॥ नागयज्ञोपवीताढ्यांज्वलत्तेजोमयीमिव ॥ प्रत्यालीढपदाँ विद्यान्नानलाङ्कारभूषिताम् ॥ सदा द्वादशवर्षीयामस्थिमालाविभूषिताम् ॥ डाकिनी वामपार्श्वे तु कल्पसूर्य्यानलोपमाम् ॥ विद्युज्ज-

जटान्त्रिनयनान्दन्तपङ्क्तबलाकिनीम् ॥ दंष्ट्राकरालवदना-
म्पीनोन्नतपयोधराम् ॥ महादेवीम्महाघोराम्मुक्तकेशी-
न्दिगम्बराम् ॥ लेलिहानमहाजिह्वाम्मुण्डमालाविभूषिताम् ॥
कपालकर्तृकाहस्ताँ वामदक्षिणयोगतः ॥ देवीङ्गलोच्छ-
लद्रक्तधारापानम्प्रकुर्वतीम् ।: करस्थितकपालेन भीषणे
नातिभीषणाम् ॥ आभ्यान्निषेवमाणान्तान्ध्यायेद्देवीं
विचक्षणः ॥ ध्यानस्यावश्यकत्वमाह तन्त्रे । प्रचण्डचण्डि-
कामेवमध्यात्वा यस्तु पूजयेत् । सद्यस्तस्य शिरश्छित्त्वा
देवी पिबति शोंणितम् ॥ पिबति तेन मुखेनेति शेषः ।
तथा च । स्वमस्तकं सखप्परं रक्तधाराभिपूरितम् ॥
ललज्जिह्वम्महाभीमन्धृतं वामभुजे तथा ॥ इति भैरव-
तन्त्रे । तत्रैव । सितङ्कुर्यादलम्पूर्वमाग्नेयं रक्तर्णकम् ॥
याम्यङ्कृष्णमत पीतं शुक्लं रक्तं सितासितम् ॥ तत
पीताम्प्रकुर्वीत कर्णिकान्तस्य मध्यगाम् ॥ तन्मध्ये तु
प्रकुर्वीत मण्डलञ्चडरोचिषः ॥ रजःसत्त्वतमोरेखा रक्ता
शुक्लाऽसिता क्रमात् ॥ मायायुग्मन्ततो न्यस्य षडक्षरसम-
न्वितम् ॥ बाह्यन्तस्य च चक्रस्य कुर्यात्प्राकारवेष्टितम् ॥
पूर्वरक्तन्ततः कृष्णं सितम्पीतं यथाक्रमम् ॥ चतुर्द्वार-
समायुक्तङ्क्षेत्रपालैरधिष्ठितम् ॥ इत्यस्या पूजायन्त्रम् ॥
यथा वा ॥ त्रिकोणं विन्यसेदादौ तन्मध्ये मण्डलत्रयम् ॥
तन्मध्ये विन्यसेद्योनिन्द्वारत्रयसमन्विताम् ॥ बहिरष्ट-
दलम्पद्मम्भूबिम्बत्रितयम्पुनः ॥ कूर्चबीजं लिखेन्मध्ये

त्रिकोणे फट्समन्वितम् ॥ यद्वा एतद्ध्यानोक्तँ यन्त्रम् ॥ तथाच । अपरञ्च प्रवक्ष्यामि शृणु देवि यथा-क्रमम् ॥ स्वनाभौ नीरजं ध्यायेद्भानुमण्डलसन्निभम् ॥ योनिचक्र-समायुक्तङ्गुणत्रितयसंज्ञितम् ॥ तत्र मध्ये महादेवीञ्छिन्नमस्तां स्मरेद्यतिः ॥ प्रदीपकलिकाकारामद्वितीयव्यवस्थिताम् ॥ योनि-मुद्रासमायुक्तां हृदयस्थितलोचनाम् ॥ ध्येयमेतद्यतीनाञ्च गृहस्थानान्निशामय ॥ यथा । अन्तरे स्वशरीरस्य नाभिनीरजसङ्गताम् ॥ निर्लेपान्निर्गुणां सूक्ष्माम्बालचन्द्रसमप्रभाम् ॥ समाधिमात्रगम्यां तु गुणत्रितयवेष्टिताम् ॥ कलातीताङ्गुणातीताम्मुक्तिमात्रप्रदायिनीम् ॥ एवन्ध्यात्वा मानसैः सम्पूज्य तारिणीवच्छङ्खस्थापनङ्कुर्य्यात् ॥ ततः पीठपूजा ॥ आधारशक्तयेनमः प्रकृतयेनमः कूर्म्माय० अनन्ताय० पृथिव्यै० क्षीरसमुद्राय० रत्नद्वीपाय० कल्पवृक्षाय० । तदधः स्वर्णसिंहासनाय० आनन्दकन्दाय० सम्बिल्वलाय० सर्व्व- तत्त्वात्मकपद्माय० संसत्त्वाय० रंरजसे० तंतमसे० आँआत्मने० अंअन्तरात्मने० पंपरात्मने० ह्रींज्ञानात्मने नमः । पद्ममध्ये रति-कामार्त्ता । भैरवमते तु । आधारशक्तिङ्कूर्म्मन्तु नागराजमतः परम् ॥ पद्मनालञ्च पद्मञ्च पूजयेन्मन्त्रविन्नरः ॥ मण्डलञ्चतुरस्रन्तु रजस्सत्त्वन्तमस्तथा ॥ रतिकामौ च सम्पूज्य शक्तिपूजां समाचरेत् ॥ रतिकामोपरि वज्रवैरोचनीये देहि २, एहि २,

गृह्ण २, मम सिद्धिन्देहि २, मम शत्रून् मारय २, करालिके हूँ फट्स्वाहा इति पीठमन्त्रस्सर्वत्र प्रणवादिनमोन्तेन पूजयेत् ॥ पुनर्ध्यात्वा-ऽऽवाहयेत् सर्वसिद्धिडाकिनीये वज्रवैरोचनीये-इहावह आवह ॥ पुनस्तन्मन्त्रमुच्चार्य्य इहतिष्ठ २, इह सन्निधेहि, इह सन्निरुध्यस्व इत्यनेनावाह्य ॐआँह्रींक्रोंहंस:इत्यनेन प्राणप्रतिष्ठां कृत्वा । ॐआंषडङ्गाय हृदयायस्वाहा ॥ इत्यादिना षडङ्गँ विन्यस्य यथाशक्ति पूजांकृत्वा वलिन्ददद्यात् । तथा । वज्रवैरोचनीये देहि २, एहि २, गृह्ण २, वलिम्मम सिद्धिन्देहि २, मम शत्रून्मारय मारय, करालिके हूँफट्स्वाहा ॥ २ इतिमन्त्रेण ततो देव्या दक्षिणे ॐडाकिन्यै० ॥ ततो देव्यङ्गे षडङ्गं सम्पूज्य दक्षिणे ॐशङ्खनिधयेनम:, वामे ॐपद्मनिधये-नम:, पूर्वादिदिक्षु लक्ष्मीं लज्जाम्मायाँ वाणीञ्च पूजयेत् । विदिक्षु ब्रह्मविष्णुरुद्रेश्वरान्, मध्ये सदाशिवं, सर्वत्र प्रणवादिनमोन्तेन पूजयेत् । तत: पञ्चपुष्पाञ्जलीन्दत्वा आवरणान्पूजयेत् ॥ अग्नीशासुरवायुषु मध्ये दिक्षु च ॐ आँखड्गायहृदयायस्वाहा इत्यादिना षडङ्गानि सम्पूज्य अष्टपत्रेषु पूर्वादिक्रमेण ॐह्लींकाल्यैनम: एवं वर्णिन्यै० डाकिन्यै० भैरव्यै० महाभैरव्यै० इन्द्राक्ष्यै० पिङ्गाक्ष्यै० । सर्वत्र प्रणवादिनमोन्तेन पूजयेत् । यथा एकान्नामाभिधाङ्कालीँ वर्णिनींडाकिनींतथा ॥ भैरवीञ्च महापूर्वां भैरवीन्तदनन्तरम् ॥ इन्द्राक्षीञ्च सपिङ्गाक्षीन्तत: संहार-

कारिणीम् ॥ पूर्वादिके दले पूज्याः शक्तयश्च यथाक्रमम् ॥ प्रणवादिनमोन्तेन लज्जावीजं समुच्चरन् ॥ पद्ममध्ये हूँ हूँ-फट नमः स्वाहा नमः देव्या दक्षिणे सम्राट्छन्दसे नमः, देव्या उत्तरे सर्ववर्णेभ्यो नमः, पुनर्दक्षिणे ॐवीजशक्तिभ्यान्नमः। पद्माग्रेषु पूर्वादिक्रमेण ब्राह्म्यै० माहेश्वर्य्यै० वैष्णव्यै० वाराह्यै० इन्द्राण्यै० चामुण्डायै० महालक्ष्म्यै० सर्वत्र प्रणवादिनमोन्तेन पूजयेत् : ततश्चतुर्दिक्षु द्वारेषु ॐकरालाय नमः विकरालाय नमः। एवम् अतिकरालाय० महाकरालाय० ॥ यथा भैरवीये। पूर्वद्वारे करालश्च विकरालश्च दक्षिणे ॥ पश्चिमेऽतिकरालश्च महाकरालमुत्तरे ॥ ततो धूपादिविसर्जनान्तङ्कर्म समापयेत्। विसर्जने त्वयं विशेषः। संहारमुद्राम्प्रदर्श्य अञ्जलावारोप्य वामनासापुटेन। योनिमुद्रा समारूढाम्प्रदीपकलिकोज्ज्वलाम्। कृष्णपक्षे विधुमिव क्रमेण क्षीणताङ्गताम् ॥ इमम्मन्त्रं समुच्चार्य्य चण्डरश्मिंनिवेशयेत् ॥ उत्तरे शिखरेइत्यादि। अस्य पुरश्चरणं लक्षजपः सिद्धविद्यात्वात्। वलिदाने तु भैरवीये। रात्रौ बलिः प्रदातव्यो मत्स्यमांससुरादिभिः ॥ अथवा मधुपानाद्यैर्मधुरैर्विभवक्रमैः। मन्त्रस्तु उच्चरेत्प्रणवम्पूर्वं सर्वसिद्धिप्रदेऽन्वितम् ॥ वर्णिनीये ततो वाच्यं सर्वसिद्धिप्रदे ततः ॥ डाकिनीये ततो वाच्यंदेवीनाम् ततः परम् ॥ एह्येहीति ततो वाच्यमिमम्बलिमनन्तरम् ॥ गृह्ण गृह्ण ततः प्रोक्त्वा मम सिद्धिमनन्तरम्। देहि देहीति

माया च ततः फट्स्वाहया युतः ।। बलिमन्त्रः समाख्यातः पूजितोऽयं सुरेश्वरि ।। इति पूजा ।।

अथ स्तोत्रम्

ईश्वर उवाच ।। स्तवराजमहं वन्दे वैरोचन्याः शुभप्रदम् । नाभौ शुभ्रारविन्दन्तदुपरि विलसन्मण्डलञ्चण्डरश्मेः संसारस्यैकसारान्त्रिभुवनजननीन्धर्मकामार्थदात्रीम् । तस्मिन् मध्ये त्रिभागे त्रितयतनुधराञ्छिन्नमस्ताम्प्रशस्तान्तां वन्दे छिन्नमस्तां शमनभयहरां योगिनीं योगमुद्राम् ।।१।। नाभौ शुद्धसरोजवक्त्रविलसद्वन्धूकपुष्पारुणम्भा स्वद्भास्करमण्डलंतदुदरे तद्योनिचक्रम्महत् ।। तन्मध्ये विपरीतमैथुनरतप्रद्युम्नसत्कामिनीपृष्ठस्थान्तरुणार्ककोटि-विलसत्तेजः स्वरूपांभजे ।।२।। वामे छिन्नशिरोधरान्तदितरे पाणौ महत्कर्त्तृकाम्प्रत्यालीढपदान्दिगन्तवसनामुन्मुक्तकेशव्रजाम् ।। छिन्नात्मीयशिरस्समुच्छलदसृग्धाराम्पिबन्तीम्पराम्बादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीम् ।। ३ ।। वामादन्यत्र नालम्वहु गहनगलद्रक्तधाराभिरुच्चैर्गायन्तीमस्थिभूषाङ्करकमललसत्कर्त्तृकामुग्ररूपाम् ।। रक्तामारक्तकेशीमपगतवसनां वर्णिनीमात्मशक्तिम्प्रत्यालीढोरुपादामरुणितनयनां योगिनीं योगनिद्राम् ।।४।। दिग्वस्त्राम्मुक्तकेशीम्प्रलयघनघटाघोररूपाम्प्रचण्डाँदंष्ट्रादुः प्रेक्ष्य वक्त्रोदरविवरलसल्लोलजिह्वाग्रभासाम् ।। विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीम्भीममूर्तिं सद्यश्छिन्नात्मकण्ठप्रगलितरुधिरैर्डाकिनी

वर्द्धयन्तीम् ।। ५ ।। ब्रह्मेशानाच्युताद्यैः शिरसि विनिहिता मन्दपादारविन्दैराप्तर्योगीन्द्रमुख्यैः प्रतिपदमनिशञ्चिन्तितञ्चिन्त्यरूपाम् ।। संसारे सारभूतान्त्रिभुवनजननीञ्छिन्नमस्ताम्प्रशस्तामिष्टान्तामिष्टदात्रीङ्कलिकलुषहराञ्चेतसाचिन्तयामि ।। ६ ।। उत्पत्तिस्थितिसंहृतीर्घटयितुन्धत्ते त्रिरूपान्तनुन्त्रैगुण्याञ्जगती यदीयविकृतिर्ब्रह्माच्युतः शूलभृत ।। तामाद्याम्प्रकृतिं स्मरामि मनसा सर्वार्थसंसिद्धये यस्याः स्मेरपदारविन्दयुगले लाभम्भजन्ते नराः ।।७ ।। अभिलषितपरस्त्रीयोगपूजापरोऽहम्बहुविधिजनभावारम्भसम्भावितोऽहम् ।। पशुजनविरतोऽहम्भैरवीसंस्तिोऽहंगुरुचरणपरोऽहंभैरवोऽहं शिवोऽहम् ।। ८ ।। इदं स्तोत्रम्महापुण्यम्ब्रह्मणा भाषितम्पुरा ।। सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम् ।।९।। यः पठेत्प्रातरुत्थाय देव्यास्सन्निहितोऽपि वा ।। तस्य सिद्धिर्भवेद्देवि वाञ्छितार्थप्रदायिनी ।।१०।। धनन्धान्यं सुतञ्जायां हयं हस्तिनमेव च ।। वसुन्धरांमहाविद्यामष्टसिद्धिलभेद्ध्रुवम् ।। ११ ।। वैयाघ्राजिनरञ्जितस्वजघनेऽरण्ये प्रलम्बोदरे खर्वेऽनिर्वचनीयपर्वसुभगे मुण्डावलीमण्डिते । कर्त्रीङ्कुन्दरुचिं विचित्रवनिताञ्ज्ञाने दधाने पदे मातर्भक्तजनानुकम्पिनि महामायेऽस्तु तुभ्यन्नमः ।। १२ ।।

इति छिन्नमस्तास्तोत्रं समाप्तम् ।।

अथ कवचम्

श्रीदेव्युवाच ।। कथिताश्छिन्नमस्तायाः या या विद्याः

सुगोपिता: ।। त्वया नाथेन जीवेश श्रुताश्चाधिगता मया ।।१।। इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम् ।। त्रैलोक्यविजयन्नाम कवचङ्कथ्यताम्प्रभो ।। २ ।। भैरव उवाच ।। शृणु देवीशि सर्वदेवनमस्कृते ।। त्रैलोक्यविजयन्नाम कवचं सर्वमोहनम्।।३ ।। सर्वविद्यामयं साक्षात्सुरासुरजयप्रदम् ।। धारणात्पठनादीशस्त्रैलोक्यविजयी विभु: ।। ४ ।। ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यत: ।। कर्त्ता पाता च संहर्त्ता भुवनानां सुरेश्वरि ।।५।। न देयं परशिष्येभ्य: अभक्तेभ्यो विशेषत: ।। देयं शिष्याय भक्ताय प्राणेभ्योऽप्यधिकाय च ।।३।। देव्याश्च छिन्नमस्ताया: कवचस्य च भैरव: ।। ऋषिर्विराट च छन्दश्च देवता छिन्नमस्तका ।। ७ ।। त्रैलोक्यविजये मुक्तौ विनियोग: प्रकीर्त्तित: ।। ओंहूँकारो मे शिर: पातु छिन्नमस्ता बलप्रदा ।। ८ ।। ह्रींह्रींऐंत्र्यक्षरी पातु भालवक्त्रं दिगम्बरी ।। श्रींह्रींहूँऐं दृशौ पातु मुण्डकर्तृधरापि सा ।। ९ ।। सा विद्या प्रणवाद्यन्ता श्रुतियुग्मं सदाऽवतु ।। वज्रवैरोचनीयेहूँ फट्स्वाहा च भ्रुवादिकम् ।। १०।। घ्राणम्पातु छिन्नमस्ता मुण्डकर्तृविधारिणी ।। श्रीमायाकूर्च्चवाग्बीजैर्वज्रवैरोचनीये हूं ।। ११ ।। हूं फट्स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी ।। स्वपार्श्वे वालिका चासृग्धाराम्पाययती मुदा ।। १२ ।। वदनं सर्वदा पातु छिन्नमस्तका स्वशक्तिका ।। मुण्डकर्तृधरारक्ता साधकाभीष्टदायिनी ।।१३ ।। वर्णिनी डाकिनीयुक्ता सापि मामभितोऽ-

वतु ।। रामाद्या पातु जिह्वाञ्च लज्जाद्या पातु कण्ठकम् ।।१४।। कूर्च्चाद्या हृदयम्पातु वागाद्या स्तनयुग्मकम् ।। रमया पुटिता विद्या पार्श्वे पातु सुरेश्वरी ।। १५ ।। मायया पुटिता विद्या नाभिदेशन्दिगम्बरी ।। कूर्च्चेन पुटिता देवी पृष्ठदेशं सदावतु ।। १६ ।। वाग्वीजपुटिता तेषाम्मध्यम्पातु सशक्तिका ।। ईश्वरीकूर्च्चवाग्वीजैः वज्रवैरोचनीये हूं ।।१७।। हूं फट्स्वाहा महाविद्या सूर्यकोटिसमप्रभा ।। छिन्नमस्ता सदा पायादूरुयुग्मं सशक्तिका ।। १८ ।। ह्रींहूं वर्णिनी जानू श्रींह्लंह्लींह्लू च डाकिनीपदम् ।। सर्वविद्यास्थिता नित्या सर्वाङ्गम्मे सदावतु ।। १९ ।। प्राच्याम्पायादेकलिङ्गा योगिनी पावकेऽवतु ।। डाकिनी दक्षिणे पातु श्रीमहाभैरवी च माम्।।२०।। नैर्ऋत्यां सततम्पातु भैरवी पश्चिमेऽवतु ।। इन्द्राणी पातु वायव्येऽसिताङ्गी पातु चोत्तरे ।।२१।। संहारिणी सदा पातु शिवकोणे सकर्तृका ।। इत्यष्टशक्तयः पान्तु दिग्विदिक्षु सकर्तृका ।।२२।। क्रींक्रींक्रीं सा पातु पूर्वे हूं हूं माम्पातु पावके ।। ह्रीं ह्रीं मान्दक्षिणे पातु दक्षिण कालिकाऽवतु ।। २३ ।। क्रींक्रींक्रीं चैव नैर्ऋत्यां ह्रीं ह्रीं माम्पश्चिमेऽवतु ।। ह्रीं ह्रीं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे ।। २४ ।। महाकाली खड्गहस्ता शिवकोणे सदाऽवतु ।। तारामायावधूः कूर्च्चं फट्कारो मां महामनुः ।। २५ ।। खड्गकर्तृधरा तारा चोर्ध्वदेशं सदाऽवतु ।। ह्रीं श्रीं हूंफट् च पाताले मां पातु चैकजटा सती ।। २६ ।। तारा तु सहिता खेऽव्यान्महानी-

लसरस्वती ॥ इति ते कथितन्देव्या कवचम्मन्त्रविग्रहम् ॥२७॥ यद्धृत्वापठनाद्भीमः क्रोधाख्यो भैरवः प्रभु ॥ सुरासुरमुनीन्द्राणाङ्कर्त्ता हर्त्ता भवेत्स्वयम् ॥ २८ ॥ यस्याज्ञया मधुमती याति सा साधकालयम् ॥ भूतिन्याद्याश्च योगिन्यो यक्षिण्याद्याश्च खेचराः ॥ २९ ॥ आज्ञां गृह्णन्ति तास्तस्य कवचस्य प्रसादतः ॥ एतदेव परम्ब्रह्म कवचम्मन्मुखोदितम् ॥ ३० ॥ देवीमभ्यर्च्य गन्धाद्यैर्मूलेनैव पठेत्सकृत ॥ सँवत्सरकृतायाश्च पूजाया फलमाप्नुयात् ॥ ३१ ॥ भूर्जे विलिखितंचैव गुटिकाङ्काञ्चनीस्थिताम् ॥ धारयेद्-दक्षिणे बाहौ कण्ठे वा यदि वान्यतः ॥ ३२ ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत् ॥ तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनाश्रमे ॥३२॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यान्ति सौम्यताम् ॥ इदङ्कवचमज्ञात्वा यो भजेच्छिन्नमस्तकाम् ॥ सोऽपि शस्त्रप्रहारेण मृत्युमाप्नोति सत्वरम् ॥ ३४ ॥

इति श्रीभैरवतन्त्रे भैरवीभैरव संवादे त्रैलोक्य विजयं नाम छिन्नमस्तका कवचं समाप्तम् ॥

अथाष्टोत्तरशतनाम

श्रीपार्वत्युवाच । नाम्नां सहस्रं परमं छिन्नमस्ताप्रियं शुभम् ॥ कथितम्भवता शम्भो सद्यश्शत्रुनिकृन्तनम् ॥ १ ॥ पुनः पृच्छाम्यहन्देव कृपाङ्कुरु ममोपरि ॥ सहस्रनामपाठे च अशक्तो यः पुमान् भवेत् ॥ १ ॥ तेन किम्पठ्यते नाथ

तम्मे ब्रूहि कृपामय ।। श्रीसदाशिव उवाच । अष्टोत्तरशतन्नाम्नाम्पठ्यते तेन सर्वदा ।। ३ ।। सहस्रनामपाठस्य फलम्प्राप्नोति निश्चितम् ।

ॐ अस्य श्रीछिन्नमस्ताष्टोत्तरशतनामस्तोत्रस्य सदाशिवऋषिरनुष्टुप्छन्दः श्रीछिन्नमस्ता देवता मम सकलसिद्धिप्राप्तये जपे विनियोगः ।।

ॐछिन्नमस्ता महाविद्या महाभीमा महोदरी । चण्डेश्वरी चण्डमाता चण्डमुण्डप्रभञ्जिनी ।। ४ ।। महाचण्डा चण्डरूपा चण्डिका चण्डखण्डिनी । क्रोधिनी क्रोधजननी क्रोधरूपा कुहू कला ।। ५ ।। कोपातुरा कोपयुता कोपसंहारकारिणी ।। वज्रवैरोचनी वज्रा वज्रकल्पा च डाकिनी ।। ६ ।। डाकिनीकर्मनिरता डाकिनीकर्मपूजिता । डाकिनीसंगनिरता डाकिनीप्रेमपूरिता ।। ७ ।। खट्वाङ्गधारिणी खर्वा खड्गखर्परधारिणी । प्रेताशना प्रेतयुता प्रेतसङ्गविहारिणी ।। ८ ।। छिन्नमुण्डधरा छिन्नचण्डविद्या च चित्रिणि । घोररूपा घोरदृष्टिर्घोररावा घनोदरी ।। ९ ।। योगिनी योगनिरता जपयज्ञपरायणा ।। योनिचक्रमयीयोनिर्योनिचक्रप्रवर्त्तिनी ।। १० ।। योनिमुद्रा योनिगम्या योनियन्त्रनिवासिनी । यन्त्ररूपा यन्त्रमयी यन्त्रेशी यन्त्रपूजिता ।। ११ ।। कीर्त्या कपर्दिनी काली कङ्काली कलविकारिणी । आरक्ता रक्तनयना रक्तपानपरायणा ।। १२ ।। भवानी भूतिदा भूतिर्भूतिदात्री च

भैरवी। भैरवाचारनिरता भूतभैरवसेविता ॥ १३ ॥ भीमा भीमेश्वरीदेवी भीमनादपरायणा ॥ भवाराध्या भवनुता भवसागरतारिणी ॥ १४ ॥ भद्रकाली भद्रतनुर्भद्ररूपा च भद्रिका। भद्ररूपा महाभद्रा सुभद्रा भद्रपालिनी ॥ १५ ॥ सुभव्या भव्यवदना सुमुखी सिद्धसेविता ॥ सिद्धिदा सिद्धिनिवहा सिद्धा सिद्धनिषेविता ॥ १६ ॥ शुभदा शुभगा शुद्धा शुद्धसत्त्वा शुभावहा । श्रेष्ठादृष्टिमयीदेवी दृष्टि-संहारकारिणी ॥ १७ ॥ शर्वाणी सर्वगा सर्वा सर्वमङ्गल-कारिणी ॥ शिवा शान्ता शान्तिरूपा मृडानी मदनातुरा ॥ १८ ॥ इति ते कथितन्देवि स्तोत्रम्परमदु-र्लभम् ॥ गुह्याद् गुह्यतरङ्गोप्यङ्गोपनीयम्प्रयत्नतः ॥ १९ ॥ किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे ॥ मारणम्मोहनं-देवि ह्युच्चाटनमतः परम् ॥ २० ॥ स्तम्भनादिककर्माणि ऋद्धयस्सिद्धयोऽपि च ॥ त्रिकालपठनादस्य सर्वे सिद्धयन्त्य-संशयः ॥ २१ ॥ महोत्तमं स्तोत्रमिदं वरानने मयेरितन्नि-त्यमनन्यबुद्धयः ॥ पठन्ति ये भक्तियुता नरोत्तमा भवेन्न तेषां रिपुभिः पराजयः ॥ २२ ॥

इति श्रीछिन्नमस्ताष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥

---

4. अथ वगलामुखीतन्त्रम्


अथ वगुलामुखीध्यानम्



मध्ये सुधाब्धिमणिमण्डपरत्नवेदीसिंहासनोपरि गतां परिपीत वर्णाम् । पीताम्वराभरणमाल्य विभूषितांगीं देवीं नमामि धृतमुद्गरवरैः जिह्वाम् ॥ १ ॥ जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम् गदाभिघातेन च दक्षिणेन पीताम्वराढ्यां द्विभुजां नमामि ।

अथ यन्त्रोद्धारः

न्यस्रं षडस्रं वृत्तमष्टदलम्पद्मम्भूपुरान्वितम् ॥



अथ मन्त्रोद्धारः

प्रणवं स्थिरमायाञ्च ततश्च वगलामुखि ॥ तदन्ते सर्वदुष्टानान्ततो वाचम्मुखम्पदम् ॥ स्तम्भयेति ततो जिह्वाङ्कीलयेति पदद्वयम् ॥ बुद्धिन्नाशय पश्चात्तु स्थिर-मायां समालिखेत् ॥ लिखेच्च पुनरोङ्कारं स्वाहेति पद्मन्ततः ॥ षट्त्रिंशदक्षरी विद्या सर्वसम्पत्करी मता ॥

अथ मन्त्रः

ॐ ह्लीं वगलामुखि सर्वदुष्टानां वाचम्मुखं स्तम्भय जिह्वाङ्कीलय कीलय बुद्धिन्नाशय ह्रीं ॐ स्वाहा ॥

अथ पूजाविधिः

प्रातः कृत्यादि प्राणायामान्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । यथा शिरसि नारदऋषयेनमः, मुखे त्रिष्टुप्छ-

न्दसे नमः, हृदि बगलामुख्यै देवतायै नमः, गुह्ये ह्लींबीजाय-नमः, पादयोः स्वाहा शक्तये नमः ।। नारदोऽस्य ऋषिर्मूर्ध्नि त्रिष्टुब्छन्दश्च तन्मुखे ।। श्रीबगलामुखीन्देवीं हृदये विन्यसेत्ततः ।। ह्लींबीजं गुह्यदेशे तु स्वाहाशक्तिस्तु पादयोः ।। ततः कराङ्गन्यासौ ।। ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, बगलामुखीतर्जनीभ्यां स्वाहा, सर्वदुष्टानाम्मध्यमाभ्यां वषट्, वाचं मुखं स्तम्भय अनामिकाभ्यां हुम्, जिह्वाङ्कीलय कीलय कनिष्ठाभ्यां वौषट, ह्लीं ॐस्वाहा करतलकरपृष्ठाभ्यां फट् ।। एवं हृदयादिषु ।। तथा च दिव्यतन्त्रे ।। युग्मबाणेषु सप्ताहिशेषार्णैश्च मनूद्भवैः ।। करशाखासुतलयोः करांगन्यासमाचरेत् ।। ततो मूलान्ते आत्मतत्त्वव्यापिनी-बगलामुखीश्रीपादुकाम्पूजयामि इतिमूलाधारे, मूलान्ते विद्यातत्त्वव्यापिनीबगलामुखीं श्रीपादुकाम्पूजयामि शिरसि, मूलान्ते शिवतत्त्वव्यापिनीबगलामुखी श्रीपादुकाम्पूजयामि सर्वाङ्गे । ततश्च । मूर्ध्नि भाले दृशोः श्रोत्रे गण्डयोर्नासयोः पुनः ।। ओष्ठयोर्मुखवृत्ते च दक्षिणांसे च कूर्परे ।। मणिवन्धेऽङ्गुलेर्मूले गले च कुचयो र्हृदि ।। नाभौ कट्यङ्गदेशे वामांसे कूर्परे तथा ।। मणिबन्धेऽङ्गुले मूले ततश्च विन्यसेत्पुनः ।। दक्षवामे चोरुजान्वोर्गुल्फयोरङ्गुलिमूलयोः ।। क्रमेण मन्त्रवर्णांस्तु न्यस्य ध्यायेद्यथाविधिः ।। ततो ध्यानम् ।। मध्ये सुराब्धिमणिमण्डपरत्नवेदींसिंहासनोपरिगताम्परिपीतवर्णाम् ।। पीताम्बराभरणमाल्यविभूषि-

ताङ्गोन्देवीं स्मरामि धृतमुद्गरवैरि जिह्वाम् ॥ जिह्वा-ग्रमादाय करेण देवीं वामेन शत्रून्परिपीडयन्तीम् ॥ गदाभिघातेन च दक्षिणेन पीताम्बराढ्यान्द्विभुजान्नमामि ॥ एवन्ध्यात्वा मानसैः सम्पूज्य बहिः पूजामारभेत् ॥ तत्र प्रथमोऽर्घ्यस्थापनम् ॥ यथा ॥ अष्टाङ्गुलश्चतुरस्रं विधाय ऐशानादिकोणेषु पूर्वादिदिक्षु च कुसुमाक्षतरक्त चन्दनैः-ग्लौंगणपतये नम इत्यनेन गजवदनं सम्पूज्य तेन मधुना वा अर्घ्यपात्रमापूरयेत् । ततो वारत्रयं विद्यया सम्पूज्य अङ्गानि विन्यसेत् । ततो धेनुयोनिमुद्रे प्रदर्श्य तेनोदकेन आत्मानम्पूजोपकरणञ्चाभ्युक्षयेत् । ततो मूलमुच्चार्य ॐ आधारशक्तिकमलासनाय नमः । एवं शक्ति-पद्मासनाय नमः पूर्ववद्ध्यात्वा पींठे आवाह्य षडङ्गानि न्यसेत् । ततो मुद्रां प्रदर्श्य पुरतः षडङ्गत मण्डलं यजेत् । ततो मूलेन मन्त्रयित्वा धेनुयोनिमुद्रे प्रदर्श्य आत्मविद्याशिवैस्त-त्त्वैर्बिन्दुत्रयम्मुखे क्षिप्त्वा तर्जन्यङ्गुष्टयोगेन साङ्गावरणां-बगलामुखीन्तर्पयेत् । ततो यथासम्भवोपचारैः सम्पूज्य आवरणपूजामारभेत् । षट्कोणेषु पूर्वे ॐसुभगायैनमः, एवमग्निकोणे भगसर्पिण्यै० ईशाने भगवाहायै० पश्चिमे भगसिद्धायै० नैर्ऋत्ये भगपातिन्यै० वायौ भगमालिन्यै० । ततोऽष्टदलपत्रेषु ब्राह्म्याद्या पूज्या । पत्राग्रेषु ॐजयायै-नमः, एवं विजयायै० अजितायै० अपराजितायै० स्तम्भिन्यै० जम्भिन्यै० मोहिन्यै० आकर्षिण्यै । ततो

द्वारेषु ॐभैरवायनमः, तद्बाह्ये इन्द्रादीन्वज्रादीन्पूजयेत् ॥ ततो मूलेन धूपादिकं दत्वा यथाशक्ति जपं विधाय त्रिशूलमुद्राम्प्रदर्श्य पुष्पाञ्जलित्रयं दत्वा देव्यै योनिमुद्रांप्रदर्शयेत् । ततो भैरवाय वलिन्दद्यात् । ततो विसर्जनान्तङ्कर्म समापयेत् । अस्य पुरश्चरणं लक्षजपः । तथा च । पीताम्वरधरो भूत्वा पूर्वाशाभिमुखस्थितः ॥ लक्षमेकञ्जपेन्मन्त्रं हरिद्राग्रन्थिमालया ॥ ब्रह्मचर्यरतो नित्यम्प्रयतो ध्यानतत्परः प्रियङ्गु कुसुमेनापि पीतपुष्पैश्च होमयेत् ॥

अथ स्तोत्रम्

ॐ अस्य श्रीवगलामुखीस्तोत्रस्य नारदऋषिः श्रीवगलामुखी देवता मम सन्निहितानां विरोधिनां वाङ्मुखपदबुद्धीनां स्तम्भनार्थे विनियोगः ॥

मध्ये सुधाब्धिमणिमण्डपरत्नवेदीसिंहासनोपरिगतां परिपीतवर्णाम् ॥ पीताम्वराभरणमाल्यविभूषिताङ्गीं देवीम्भजामि धृतमुद्गरवैरिजिह्वाम् ॥ १ ॥ जिह्वाग्रमादाय करेण देवीं वामेन शत्रून्परिपीडयन्तीम् ॥ गदाभिघातेन च दक्षिणेन पीताम्वराढ्यान्द्विभुजाम्भजामि ॥ २ ॥ चलत्कनककुण्डलोल्लसित-चारुगण्डस्थलाँ लसत्कनकचम्पकद्युतिमदिन्दुविम्बाननाम् ॥ गदा-हतविपक्षकाङ्कलितलोलजिह्वाञ्चलां स्मरामि वगलामुखीं विमुख-वाङ्मनस्स्तम्भिनीम् ॥ ३ ॥ पीयूषोदधिमध्यचारुविलसद्रक्तोत्पले मण्डपे सत्सिंहासनमौलिपातितरिपुम्प्रेतासनाध्यासिनीम् ॥ स्वर्णा-

भाङ्करपीडितारिरसनाम्भ्राम्यद्गदाँ विभ्रमामित्थन्ध्यायति यान्ति तस्य विलयं सद्योऽथ सर्वापदः ॥ ४ ॥ देवि त्वच्चरणाम्बुजार्चन-कृते यः पीतपुष्पाञ्जलीन्भक्त्या वामकरे निधाय च मनुम्मन्त्री मनोज्ञाक्षरम् ॥ पीठन्ध्यानपरोऽथ कुम्भकवशाद्बीजं स्मरेत्पार्थिवस्तस्यामित्रमुखस्य वाचि हृदये जाड्यम्भवेत्तत्क्षणात् ॥ ५ ॥ वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति ॥ गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रणा यन्त्रितः श्रीनित्ये वगलामुखि प्रतिदिनङ्कल्याणि तुभ्यन्नमः ॥ ६ ॥ मन्त्रस्तावदलं विपक्षदलनं स्तोत्रम्पवित्रञ्च ते यन्त्रं वादिनियन्त्रणन्त्रिजगताजैत्रं च चित्रं च ते ॥ मातः श्रीवगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे त्वन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्वादिनाम् ॥ ७ ॥ दुष्टस्तम्भनमुग्रविघ्नशमनन्दारिद्रयविद्रावणं भूभृदीशमनञ्चलामृगादृशाञ्चेतस्समाकर्षणम् ॥ सौभाग्यैकनिकेतनं समदृशः कारुण्यपूर्णामृतम्मृत्योर्मारणमाविरस्तु पुरतो मात-स्त्वदीयं वपुः ॥ ८ ॥ मातर्भञ्जय मे विपक्षवदनञ्जिह्वाञ्च सङ्कीलय ब्राह्मीम्मुद्रय नाशयाशु धिषणामुग्राङ्गतिं स्तम्भय ॥ शत्रूञ्चूर्णय देवी तीक्ष्णगदया गौराङ्गि पीताम्बरे विघ्नौघम्बगले हर प्रणमता-ङ्कारुण्यपूर्णेक्षणे ॥ ९ ॥ मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये ॥ श्रीविद्ये समये महेशि बगले कामेशि रामे

रमे ।। मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे दासोऽहं शरणागत : करुणया विश्वेश्वरि त्राहि माम् ।।१०।। संरम्भे चौरसंघे प्रहरण- समये बन्धने वारिमध्ये विद्यावादे विवादे प्रकुपितनृपतौ दिव्य-काले निशायाम् ।। वश्ये वा स्तम्भने वा रिपुवधसमये निर्जने वा वने वा गच्छंस्तिष्ठं-स्त्रिकालं यदि पठति शिवम्प्राप्नुयादाशु धीरः ।।११।। नित्यं स्तोत्रमिदम्पवित्रमिह यो देव्या : पठत्यादराद्धृत्वा यन्त्रमिदन्तथैव समरे बाहौ करे वा गले ।। राजानो-ऽप्यरयो मदान्धकरिणस्सर्पा मृगेन्द्रादिकास्ते वै यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरास्सिद्धयः ।। १२ ।। त्वं विद्या परमा त्रिलोकजननी विघ्नौघसञ्छेदिनी योषा-कर्षणकारिणी त्रिजगता-मानन्दसंवर्द्धिनी ।। दुष्टोच्चाटन-कारिणी जनमनस्सम्मोहन्दायिनी ।। जिह्वाकीलनभैरवी विजयते ब्रह्मादिमन्त्रो यथा ।।१३।। विद्या लक्ष्मीस्सर्वसौ-भाग्यमायु : पुत्रै : पौत्रै : सर्वसाम्राज्य-सिद्धिः ।। मान-म्भोगो वश्यमारोग्यसौख्यम्प्राप्तन्तत्तद्भूतले-ऽस्मिन्नरेण ।। १४।। यत्कृतञ्जपसन्नाहङ्गदितम्परमेश्वरि ।। दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते ।। १५ ।। ब्रह्मास्त्रमिति विख्यातन्त्रिषु लोकेषु विश्रुतम् ।। गुरुभक्ताय दातव्यन्न देयं यस्य कस्यचित् ।। १६ ।। पीताम्वरान्द्विभुजाञ्च त्रिनेत्रा-ङ्गात्र- कोज्ज्वलाम् ।। शिलामुद्गरहस्ताञ्च स्मरेत्ताम्व-गलामुखीम् ।। १७ ।। इति रुद्रयामले बगलामुखीस्तोत्रं समाप्तम् ।।

अथ कवचम्

कैलासाचलमध्यगम्पुरवहं शान्तन्त्रिनेत्रं शिवं वामस्थः कवचम्प्रणम्य गिरिजा भूतिप्रदम्पृच्छति ।। देवी श्रीबगलामुखी रिपुकुलारण्याग्निरूपा च या तस्याश्चापविमुक्तमन्त्रसहितम्प्रीत्याऽधुना ब्रूहि माम् ।। १ ।। श्री शङ्कर उवाच ।। देवी श्रीभववल्लभे श्रृणु महामन्त्रं विभूतिप्रदन्देव्या वर्मयुतं समस्तसुखदं साम्राज्यदम्मुक्तिदम् ।। तारं रुद्रवधूं विरञ्चिमहिलाविष्णुप्रियाकामयुक्कान्ते श्रीवगलानने मम रिपून्नाशय युग्मन्त्विति ।। २ ।। ऐश्वर्याणि पदञ्च देहि युगलं शीघ्रम्मनोवाञ्छितङ्कार्यं साधय युग्मयुक्छिववधूवह्निप्रियान्तो मनुः ।। कंसारेस्तनयञ्च बीजमपरा शक्तिश्च वाणी तथा कीलं श्रीमति भैरवर्षिसहितञ्छन्दो विराट्संयुतम् ।। ३ ।। स्वेष्टार्थस्य परस्य वेत्ति नितराङ्कार्यस्य सम्प्राप्तये नानासाध्यमहागदस्य नियतन्नाशाय वीर्याप्तये ।। ध्यात्वा श्रीवगलाननाम्मनुवरञ्जप्त्वा सहस्राख्यकन्दीर्घैः षट्कयुतैश्च रुद्रमहिताबीजैर्विन्यस्याङ्गके ।।

ध्यानम् ।। सौवर्णासनसंस्थितान्त्रिनयनाम्पीतांशुकोल्लासिनीं हेमाभाङ्गरुचिं शशाङ्कमुकुटां स्रक्चम्पकस्रग्युताम् ।। हस्तैर्मुद्गरपाशबद्धरसनां सम्बिभ्रतीम्भूषणंव्याप्ताङ्गीम्बगलामुखीन्त्रिजगतां संस्तम्भिनीञ्चिन्तये ।।

ॐ अस्य श्रीबगलामुखीब्रह्मास्त्रमन्त्रकवचस्य भैरव ऋषिर्विराट्छन्दः श्रीबगलामुखी देवता क्लींबीजम् ऐं शक्तिः श्रीं कीलकं मम परस्य च मनोभिलाषितेष्टकार्यसिद्धये विनियोगः ।।

शिरसि भैरवऋषये नमः, मुखे विराट्छन्दसे नमः, हृदि बगलामुखीदेवतायै नमः, गुह्ये क्लींबीजाय नमः, पादयोः ऐं शक्तये नमः, सर्वाङ्गे श्रींकीलकाय नमः, ॐ ह्लांअङ्गुष्ठाभ्यां नमः, ॐह्लींतर्जनीभ्यां नमः ॐह्लंमध्यमाभ्यां नमः, ॐह्लैंअनामिकाभ्यां नमः, ॐह्लौंकनिष्ठिकाभ्यां नमः, ॐकरतलकरपृष्ठाभ्यां नमः, ॐ ह्लांहृदयायनमः, ॐह्लींशिरसे स्वाहा, ॐह्लूंशिखायै वषट्ः ॐह्लैंकवचाय हुम्, ॐह्लौंनेत्रत्रयाय वोषट्, ॐह्लः अस्त्रायफट् ।।

मन्त्रोद्धारः— ॐह्रां ऐं श्रींक्लीं श्रीबगलानने मम रिपून्नाशय २, ममैश्वर्याणि देहि २, शीघ्रम्मनोवाञ्छितकार्यं साधय २, ह्लींस्वाहा ।।

शिरो मे पातु ॐह्लींऐंश्रीक्लींपातु ललाटकम् ।। सम्वोधनपदम्पातु नेत्रे श्रीबगलानने ।। १ ।। श्रुतौ मम रिपुम्पातु नासिकान्नाशय द्वयम् ।। पातु गण्डौ सदा मामैश्वर्याण्यन्तन्तु मस्तकम् ।। २ ।। देहि द्वन्द्वं सदा जिह्वाम्पातु-शीघ्रं वचो मम ।। कण्ठदेशं स न पातु वाञ्छितम्बाहुमूलकम् ।। ३ ।। कार्यं साधय द्वन्द्वन्तु करौ पातु सदा मम ।। मायायुक्ता तथा स्वाहा हृदयम्पातु सर्वदा ।। ४ ।।

अष्टाधिकचत्त्वारिंशदण्डाढ्या बगलामुखी ॥ रक्षाङ्करोतु सर्वत्र गृहेऽरण्ये सदा मम ॥ ५ ॥ ब्रह्मास्त्राख्यो मनु पातु सर्वाङ्गे सर्वसन्धिषु ॥ मन्त्रराजः सदा रक्षाङ्ककोतु मम सर्वदा ॥ ६ ॥ ॐ ह्लीं पातु नाभिदेशम्मे कटिम्मे बगलावतु ॥ मुखी वर्णद्वयम्पातु लिङ्गम्मे मुष्कयुग्मकम् ॥ ७ ॥ जानुनी सर्वदुष्टानाम्पातु मे वर्णपञ्चकम् ॥ वाचम्मुखन्तथा पादं षड्वर्णा परमेश्वरी ॥ ८ ॥ जङ्घायुग्मे सदा पातु बगला रिपुमोहिनी ॥ स्तम्भयेति पदम्पृष्ठम्पातुवर्णत्रयम्मम ॥ ९ ॥ जिह्वां वर्णद्वयम्पातु गुल्फौ मे कीलयेति च ॥ पादोदूर्ध्वं सर्वदा पातु बुद्धि पादतले मम ॥ १० ॥ विनाशय पदम्पातु पादाङ्गुल्योर्नखानि मे ॥ ह्लीं बीजं सर्वदा पातु बुद्धीन्द्रियवचांसि मे ॥११॥ सर्वाङ्गम्प्रणवः पातु स्वाहा रोमाणि मेऽवतु ॥ ब्राह्मी पूर्वदले पातु चाग्नेय्यां विष्णुवल्लभा ॥ १२ ॥ माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽवतु ॥ कौमारी पश्चिमे पातु वायव्ये चापराजिता ॥ १३ ॥ वाराही चोत्तरे पातु नारसिंही शिवेऽवतु ॥ ऊद्ध्वम्पातु महालक्ष्मी पाताले शारदाऽवतु ॥ १४ ॥ इत्यष्टौ शक्तयः पान्तु सायुधाश्च सवाहनाः ॥ राजद्वारे महादुर्गे पातु मां गणनायकः ॥ १५ ॥ श्मशाने जलमध्ये च भैरवश्च सदाऽवतु ॥ द्विभुजा रक्तवसना सर्वाभरणभूषिताः ॥ १६ ॥ योगिन्यः सर्वदा पान्तु महारण्ये सदा

मम ॥ इति ते कथितंदेवि कवचम्परमाद्भुतम् ॥ १७ ॥ श्रीविश्वविजयंनाम कीर्तिश्रीविजयप्रदम् ॥ अपुत्रो लभते पुत्रं धीरं शूरं शतायुषम् ॥ १८ ॥ निर्धनो धनमाप्नोति कवचस्यास्य पाठतः ॥ जपित्वा मन्त्रराजं तु ध्यात्वा श्रीबगलामुखीम् ॥ १९ ॥ पठेदिदं हि कवचं निशायां नियमात्तु यः ॥ यद्यत्कामयते कामं साध्यासाध्ये महीतले ॥ २० ॥ तत्तत्काममवाप्नोति सप्तरात्रेण शङ्करी ॥ गुरुं ध्यात्वा सुराम्पीत्वा रात्रौ शक्तिसमन्वितः ॥ २१ ॥ कवचं य पठेद्देवि तस्याऽसाध्यन्न किञ्चन ॥ यं ध्यात्वा प्रजपेन्मन्त्रं सहस्रङ्कवचम्पठेत् ॥ २२ ॥ त्रिरात्रेण वशं याति मृत्युं तन्नात्र संशयः ॥ लिखित्वा प्रतिमां शत्रो सतालेन हरिद्रया ॥ २३ ॥ लिखित्वा हृदि तन्नाम तं ध्यात्वा प्रजपेन्मनुम् ॥ एकविंशद्दिनं यावत्प्रत्यहञ्च सहस्रकम् ॥ २४ ॥ जप्त्वा पठेत्तु कवचञ्चतुर्विंशतिवारकम् ॥ संस्तम्भञ्जायते शत्रोर्नात्र कार्या विचारणा ॥ २५ ॥ विवादे विजयन्तस्य सङ्ग्रामे जयमाप्नुयात् ॥ श्मशाने च भयंनास्ति कवचस्य प्रभावतः ॥ २६ ॥ नवनीतञ्चाभिमन्त्र्य स्त्रीणांदद्यान्महेश्वरि ॥ वन्ध्यायांजायते पुत्रो विद्यावलसमन्वितः ॥ २७ ॥ श्मशानाङ्गारमादाय भौमे रात्रौ शनावथ ॥ पादोदकेन स्पृष्ट्वा च लिखेल्लौहशलाकया ॥ २८ ॥ भूमौ शत्रोः स्वरूपञ्च हृदि नाम समालिखेत् ॥ हस्तन्तद्धृदये दत्वा कवचन्तिथिवारकम् ॥२९॥

ध्यात्वा जपेन्मन्त्रराजन्नवरात्रम्प्रयत्नत: ।। म्रियते ज्वर-दाहेन दशमेऽह्नि न संशय: ।। ३० ।। भूर्जपत्रेष्विदं स्तोत्र-मष्टगन्धेन संल्लिखेत् ।। धारयेद्दक्षिणे बाहौ नारी वाम-भुजे तथा ।। ३१ ।। सङ्ग्रामे जयमाप्नोति नारी पुत्रवती भवेत् ।। ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम् ।। ३२ ।। सम्पूज्य कवचंनित्यम्पूजायाः फल मालभेत् ।। बृहस्पतिसमो वापि विभवे धनदोपम: ।।३३।। कामतुल्यश्च नारीणां शत्रूणाञ्च यमोपम: ।। कविताल-हरी तस्य भवेद्गङ्गाप्रवाहवत् ।। ३४ ।। गद्यपद्यमयी वाणी भवेद्देवीप्रसादत: ।। एकादशशतं यावत्पुरश्चरण-मुच्यते ।। ३५ ।। पुरश्चर्य्याविहीनन्तु न चेदम्फलदायकम् । न देयम्परं शिष्येभ्यो दुष्टेभ्यश्च विशेषत: ।। ३६ ।। देयं शिष्याया भक्ताय पञ्चत्वञ्चान्यथाप्नुयात् ।। इदं कवचमज्ञात्वा भजेद्यो वगलामुखीम् ।। शतकोटि जपित्वा तु तस्य सिद्धिर्न जायते ।। ३७ ।। दाराढ्यो मनुजोऽस्य लक्षजापत: प्राप्नोतिसिद्धिं पराम् । विद्या श्री विजयं तथा सुनियतं धारं च वीरं वरम् । ब्रह्मास्त्राख्यमनुविलिख्य नितराम्भूर्जेष्टगन्धेन वै धृत्वा राजपुरं ब्रजन्तिखलु ये दासोऽस्ति तेषां नृप: ।

इति विश्वसारोद्धारतन्त्रे पार्वतीश्वरसंवादे वगला-मुखी कवचं सम्पूर्णम् ।।

अथशतनामस्तोत्रम

नारद उवाच

भगवन् देव देव सृष्टिस्थिति लयात्मक ।
शतमष्टोत्तरं नाम्नां वगलाया : वदाधुना ॥ १ ॥

भगवान् उवाच

शृणु वत्स प्रवक्ष्यामि नाम्नाष्टोत्तर शतम् ।
पीताम्वर्या: महादेव्या: स्तोत्रं पाप प्रणाशकम्॥ २ ॥
प्रपठनात् सद्यो वादी मूको भवेत् क्षणात् ।
रिपूणां स्तम्भनं याति सत्यं सत्यं वदाम्यहम् ॥ ३ ॥

उों अस्य श्री पीताम्वर्यष्टोत्तरशतनाम स्तोत्रस्य सदाशिवऋषिरनुष्टुप् छन्द: श्री पीताम्बरी देवता श्री पीताम्बरी प्रीतये जपे विनियोग: ।

ॐ वगलामुखी विष्णु वनिता विष्णु शंकरभामिनी ।
बहुला वेदमाता च महाविष्णु प्रसूरपि ॥१॥
महामत्स्या महाकूर्मा महावाराह रूपिणी ।
नरसिंहप्रियारम्या वामना बहुरूपिणी ॥२ ॥
जामदग्न्यस्वरूपा च रामा राम प्रपूजिता ।
कृष्णा कपर्दिनी कृत्या कलहा कलविकारिणी ॥३ ॥
बुद्धिरूपा बुद्धभार्या बौद्धपाखण्ड खण्डिनी ।
कल्किरूपा कलिहरा कलिदुर्गति नाशिनी ॥ ४ ॥

कोटिसूर्यं प्रतीकाशा कोटिकन्दर्प मोहिनी ।
केवला कठिन काली कला कैवल्यदायिनी ॥ ५ ॥
केशवी केशवाराध्या किशोरी केशवस्तुता ।
रुद्ररूपा रुद्रमूर्त्ती रुद्राणी रुद्रदेवता ॥ ६ ॥
नक्षत्ररूपा नक्षत्रा नक्षत्रेश प्रपूजिता ।
नक्षत्रेशप्रिया नित्या नक्षत्रपति वन्दिता ॥ ७ ॥
नागिनी नागजननी नागराजप्रवन्दिता ॥
नागेश्वरी नागकन्या नागरी च नागात्मजा ॥ ८ ॥
नगाधिराजतनया नागराज प्रपूरिता ।
नवीना नीरदा पीता श्यामा सौन्दर्य कारिणी ॥ ९ ॥
रक्ता नीला घना शुभ्रा श्वेता सौभाग्यदायिनी ।
सुन्दरी सौभगा सौम्या स्वर्णभास्वर्गतिप्रदा ॥ १० ॥
रिपुत्रसकरी रेखा शत्रुसंहारकारिणी ।
भामिनी च तथा माया स्तम्भिनी मोहिनी प्रभा ॥११॥
रागद्वेषकरी रात्रि रौरवध्वंसकारिणी ॥
यक्षिणी सिद्धनिवहा सिद्धेशा सिद्धिरूपिणी ॥१२ ॥
लंकापति ध्वंसकरी लंकेश रिपुवन्दिता ।
लंका नाथ कुलहरा महारावण हारिणी ॥ १३ ॥
देवदानव सिद्धौघ-पूजिता परमेश्वरी ।
परमाणुरूपा परमा पर तन्त्रविनाशिनी ॥ १४ ॥
वरदा वरदाराध्या वरदान परायणा ।
वरदेशप्रिया वीरा वींरभूषणभूषिता ॥ १५ ॥

वसुदा बहुदा वाणी ब्रह्मरूपा वरानना ।
बलदा पीतवसना पीतभूषण भूषिता ॥ १६ ॥
पीत पुष्पप्रिया पीतहारा पीतस्वरूपिणी ।
इति ते कथितं विप्र नाम्नामष्टोत्तरशतम् ॥ १७ ॥
यः पठेत् पाठयेद्वापि शृणुयाद्वा समाहित : ।
तस्य शत्रुक्षयं सद्यो याति नैवात्र संशय : ॥ १८ ॥

प्रभात काले प्रयतो मनुष्यः पठेत् सुभक्त्या परिचिन्त्यपीताम् ।

द्रुतं भवेत्तस्य समस्त वृद्धिर्विनाशमायाति च तस्य शत्रु : ॥ १९ ॥


इति विष्णुयामले नारद विष्णुसंवादे श्रीवगलाष्टोत्तर शतनाम स्तोत्रम् ।

नोट—वगलामुखी (पीताम्वरा) की साधना विशेष ध्यान देते हुए ही करनी चाहिए । इसमें पीला आसन, हल्दी की पीली माला, पीले वस्त्र, पीले पुष्प का प्रयोग होना चाहिए । तिलक भी पीला (हल्दी) होना चाहिए । इसमें तले हुए उड़द की दाल के बड़े की वलि देना आवश्यक है । बलि चौराहे में देनी चाहिए । नंगे पैर जाना चाहिए । वलि देकर वापिसी में पीछे की ओर नहीं देखना चाहिए । आकर हाथ-पैर मुख धो कर वस्त्र वदलने चाहिए । ब्रह्मचर्य की साधना आवश्यक है ।

5. अथ मातङ्गीतन्त्रम्

अथ मातङ्गीतन्त्रम्

श्यामाङ्गीं शशिशेखरां त्रिनयनां रत्नसिंहासन स्थिताम्
वेदै र्बाहुदण्डैरसिखेटक पाशङ्कुशधराम् ।



अथ यन्त्रोद्धारः

षट्कोणाष्टदलम्पद्मंल्लिखेद्यन्त्रम्मनोरमम् ॥
तत्र पूजा प्रकर्त्तव्या जवापुष्पेण मन्त्रवित् ॥

अथ मन्त्रोद्धारः

प्रणवञ्च ततो मायाङ्कामबीजञ्च कूर्च्चकम् ॥
मातङ्गी ङेयुता चास्त्रं वह्निजायावधिर्मनुः ॥

अथ मन्त्रः

ॐ ह्रीं क्लीं हूँ मातङ्ग्यै फट्स्वाहा ॥

अथ पूजाविधिः

अथ वक्ष्ये महादेवीम्मातङ्गीं सर्वसिद्धिदाम् ॥ अस्याः पूजनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥ प्रणवञ्च ततो मायाङ्कामबीजञ्च कूर्चकम् ॥ मातङ्गी ङेयुता चास्त्रं वह्निजायावधिर्मनुः ॥ ऋषिरस्य दक्षिणामूर्त्ति विराट् छन्दः प्रकीर्त्तितम् ॥ मातङ्गीदेवता देवी सर्वसिद्धिप्रदायिनी ॥ अङ्गन्यास-करन्यासौ कुर्यान्मन्त्री समाहितः । षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ॥ षट्कोणाष्टदलम्पद्मं लिखेद्यन्त्रम्मनोरमम् ॥ तत्र पूजा प्रकर्त्तव्या जवापुष्पेण मन्त्रवित् ॥ अष्टशक्तीश्चाष्टदले पूजयेत्सुसमाहितः ॥ रति प्रीतिर्मनोभवा क्रिया शुद्धा च शक्तयः ॥ अनङ्गकुसुमानङ्गमदना मदनालसा ॥ इत्यष्टशक्तीः सम्पूज्य उपहारसमन्वितः ॥ ततो देवीम्परां ध्यायेत्साधकः स्थिरमानसः ॥ श्यामाङ्गीं शशिशेखरान्त्रिनयनां रत्नसिंहासन स्थिताम् ॥ वेदैर्बाहुदण्डैरसिखेटकपाशाङ्कुशवराम् ॥ एवं ध्यात्वा महादेवीं-गन्धपुष्पैर्मनोरमैः ॥ नैवेद्यन्तु महादेव्यै पायसं शर्करान्वितम् ॥ पुरश्चरण-काले तु षट्सहस्रं मनुञ्जपेत् ॥ तद्दशांशं हुनेदाज्यैः शर्करामधुभिः सह ॥ ब्रह्मवृक्षोद्भवैः काष्ठैः साधकः शक्तिभिः सह ॥ एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥ चतुष्पथे श्मशाने वा कलामध्ये च मान्त्रिकः ॥ मत्स्यम्मांसम्पायसञ्च दद्याद्धूपञ्च गुग्गुलम् ॥ रात्रियोगेन कर्त्तव्यं सदा पूर्णश्च साधकः ॥ एवम्प्रयोगमात्रेण कविता जायते ध्रुवम् ॥ अग्निस्तम्भ-ञ्जलस्तम्भं वाक्स्तम्भङ्कारयेद्ध्रुवम् ॥ मन्त्री जयति शत्रूंश्च तार्क्ष्यो भोगिकुलं यथा ॥ शास्त्रे वादे कवित्वे च बृहस्पतिरिवापरः ॥ अनेनैव विधानेन मातङ्गी सिद्धिदायिनी ॥ नूनन्तद्गृहमागत्य कुबेरैर्दीयते वसु ॥ विना मत्स्यैर्विना मांसैनर्चियेत्परदेवताम् ॥ इति तन्त्रसारः ॥

अथ मातङ्गीस्तोत्रम्

ईश्वर उवाच ॥

आराध्य मातश्चरणाम्बुजे ते ब्रह्मादयो विस्तृतकीर्त्तिमापुः अन्ये परं वा विभवम्मुनीन्द्राः परां श्रियं भक्तिपरेण चान्ये ॥1॥ नमामि देवीन्नव-चन्द्रमौलेर्मातङ्गिनीञ्चन्द्रकलावतंसाम् ॥ आम्नायप्राप्तिप्रतिपादितार्थ-म्प्रबोधयन्तीम्प्रियमादरेण ॥2॥ विनम्रदेवस्थिरमौलिरत्नैर्विराजितन्ते

चरणारविन्दम् ।। अकृत्रिमाणां वचसां विशुल्कम्पदाम्पदं शिक्षितनूपुराभ्याम् ।।3।। कृतार्थयन्तीम्पदवीं पदाभ्यामास्फालयन्तीङ्कलवल्लकीन्ताम् ।। मातङ्गिनीं सद्धृदयान्धिनोमि लीलांशुकां शुद्धनितम्वबिम्वाम् ।।4।। तालीदलेनार्पितकर्णभूषांमाध्वीमदोद्घूर्णितनेत्रपद्माम् ।। घनस्तनीं शम्भुवधून्नमामि तडिल्लताकान्तिमनर्घ्यभूषाम् ।। 5 ।। चिरेण लक्ष्यान्नवलोमराज्यां स्मरामि भक्त्या जगतामधीशे ।। वलित्रयाढ्यन्तव मध्यमम्ब नीलोत्पलांशुश्रियमावहन्तीम् ।।6।। कान्त्या कटाक्षैः कमलाकराणाङ्कदम्वमालाञ्चितकेशपाशाम् ।। मातङ्गकन्यां हृदि भावयामि ध्यायेयमारक्तकपोलविम्वम् ।।7।। विम्वाधरन्यस्तललामवश्यमालोललीलालकमायताक्षम् ।। मन्दस्मितन्ते वदनम्महेशि स्तुत्यानया शङ्करधर्मपत्नीम् ।।8।। मातङ्गिनीं वागधिदेवतान्तां स्तुवन्ति ये भक्तियुता मनुष्याः ।। परां श्रियन्नित्यमुपाश्रयन्ति परत्र कैलासतले वसन्ति ।।9।।

इति रुद्रयामले मातङ्गीस्तोत्रं समाप्तम् ।।

अथ मातङ्गीकवचम्

श्रीदेव्युवाच ।।

साधु साधु महादेव कथयस्व सुरेश्वर । मातङ्गीकवचन्दिव्यं सर्वसिद्धिकरन्नृणाम् ।।1।। श्रीईश्वर उवाच ।। शृणु देवि प्रवक्ष्यामि मातङ्गीकवचं शुभम् । गोपनीयम्महादेवि मौनी जापं समाचरेत् ।।2।। अस्य श्रीमातङ्गीकवचस्य दक्षिणामूर्तिर्ऋषिर्विराट् छन्दो मातङ्गी देवता चतुर्वर्गसिद्धये विनियोगः ।। ॐ शिरो मातङ्गिनी पातु भुवनेशी तु चक्षुषी ।। तोडला कर्णयुगलन्त्रिपुरा वदनम्मम ।।3।। पातु कण्ठे महामाया हृदि माहेश्वरी तथा त्रिपुष्पा पार्श्वयोः पातु गुदे कामेश्वरी मम ।।4।। ऊरुद्वये तथा चण्डी जङ्घयोश्च हरप्रिया ।। महामाया पादयुग्मे सर्वाङ्गेषु कुलेश्वरी ।।5।। अङ्गम्प्रत्यङ्गकञ्चैव सदा रक्षतु वैष्णवी ।। ब्रह्मरन्ध्रे सदा रक्षेन्मातङ्गी नाम संस्थिता ।।6।। ललाटे रक्षयेन्नित्यम्महापिशाचिनीति च ।। नेत्राभ्यां सुमुखी रक्षेद्देवी रक्षतु नासिकाम् ।।7।। महापिशाचिनी पायान्मुखे रक्षतु सर्वदा ।। लज्जा रक्षतु मान्दन्ते चोष्ठौ सम्मार्ज्जनीकरी ।।8।। चिवुके कण्ठदेशे तु चकारत्रितयम्पुनः ।। सुविसर्गम्महादेवी

हृदयम्पातु सर्वदा ॥1॥ नाभिं रक्षतु मां लोला कालिकावतु लोचने ॥ उदरे पातु चामुण्डा लिङ्गे कात्यायनी तथा ॥10॥ उग्रतारा गुदे पातु पादौ रक्षतु चाम्बिका ॥ भुजौ रक्षतु शर्वाणी हृदयञ्चण्डभूषणा ॥11॥ जिह्वायाम्मातृका रक्षेत्पूर्वे रक्षतु पुष्टिका ॥ विजया दक्षिणे पातु मेधा रक्षतु वारुणे ॥12॥ नैर्ऋत्यां सुदया रक्षेद्वायव्याम्पातु लक्ष्मणा ॥ ऐशान्यां रक्षयेद्देवी मातङ्गी शुभकारिणी ॥13॥ रक्षेत्सुरेशा चाग्नेये बगला पातु चोत्तरे ॥ ऊर्द्ध्वम्पातु महादेवी देवानां हितकारिणी ॥14॥ पाताले पातु मां नित्यं वशिनी विश्वरूपिणी ॥ प्रणवञ्च ततो माया कामबीजञ्च कूर्चकम् ॥15॥ मातङ्गिनी ङेयुतास्त्रं वह्निजायावधिर्मनु: ॥ सार्द्धैकादशवर्णा सा सर्वत्र पातु मां सदा ॥16॥ इति ते कथितन्देवि गुह्याद्गुह्यतरम्परम् ॥ त्रैलोक्यमङ्गलन्नाम कवचन्देवदुर्लभम् ॥17॥ य इदम्प्रपठेन्नित्यञ्जायते सम्पदालयम् ॥ परमैश्वर्यमतुलम्प्राप्नुयान्नात्र संशय: ॥18॥ गुरुमभ्यर्च्य विधिवत्कवचम्प्रपठेद्यदि ॥ ऐश्वर्यं सुकवित्वञ्च वाक्सिद्धिं लभते ध्रुवम् ॥19॥ नित्यन्तस्य तु मातङ्गी महिला मङ्गलञ्चरेत् ॥ ब्रह्मा विष्णुश्च रुद्रश्च ये देवा सुरसत्तमा: ॥20॥ ब्रह्मराक्षसवेताला ग्रहाद्या भूतजातय: ॥ तन्दृष्ट्वा साधकन्देवि लज्जायुक्ता भवन्ति ते ॥21॥ कवचन्धारयेद्यस्तु सर्वसिद्धिंलभेद् ध्रुवम् ॥ राजानोऽपि च दासत्वं षट्कर्म्माणि च साधयेत् ॥22॥ सिद्धो भवति सर्वत्र किमन्यैर्बहु भाषितै: ॥ इदं कवचमज्ञात्वा मातङ्गीं यो भजेन्नर: ॥23॥ अल्पायुर्निर्धनो मूर्खो भवत्येव न संशय: ॥ गुरौ भक्ति: सदा कार्या कवचे च दृढा मति: ॥24॥ तस्मै मातङ्गिनी देवी सर्वसिद्धिं प्रयच्छति ॥ इतिनन्द्यावर्ते उत्तरखण्डेत्वरितफलदायिनी मातंगिनी कवचं समाप्तम् ॥

अथ हृदयम्

एकदा कौतुकाविष्टा भैरवं भूतसेवितम् ॥ भैरवी परिपप्रच्छ सर्वभूतहिते रता ॥1॥ श्रीभैरव्युवाच ॥ भगवन्सर्वधर्मज्ञ भूतवात्सल्यभावन ॥ अहं वेदितुमिच्छामि सर्वभूतोपकारकम् ॥2॥ केन मन्त्रेण जप्तेन स्तोत्रेण पठितेन च ॥ सर्वथा श्रेयसाम्प्राप्तिर्भूतानाम्भूतिमिच्छताम् ॥3॥ श्रीभैरव

उवाच ।। शृणु देवि तव स्नेहात्प्रायो गोप्यमपि प्रिये ।। कथयिष्यामि तत्सर्वं सुखसम्पत्करं शुभम् ।।4।। पठतां शृण्वतान्नित्यं सर्वसम्पत्ति-दायकम् ।। विद्यैश्वर्यसुखावाप्ति-मङ्गलप्रदमुत्तमम् ।।5।। मातंगया हृदय-स्तोत्रं दुःखदारिद्र्यभञ्जनम् ।। मङ्गलम्मङ्गलानाञ्च अस्ति सर्वसुख-प्रदम् ।।6।।

ॐ अस्य श्रीमातङ्गीहृदयस्तोत्रमन्त्रस्य दक्षिणामूर्तिर्ऋषिर्विराट् छन्दो मातङ्गी देवता ह्रींबीजं हूं शक्तिः क्लींकीलकं सर्ववाञ्छितार्थसिद्धये पाठे विनियोगः ।।

अथाङ्गन्यासः ।। ॐ ह्रीं हृदयाय नमः, ॐ क्लीं शिरसेस्वाहा, ॐ हूंशिखायैवषट्, ॐ ह्रीं नेत्रत्रयायवौषट्, ॐ क्लींकवचायहुम्, ॐ हूंअस्त्राय-फट् ।। एवं करन्यासः ।।

अथ, ध्यानम् ।। श्यामां शुभ्रांशुभालान्त्रिकमलनयनां रत्नसिंहासन-स्थाम्भक्ताभीष्टप्रदात्रीं सुरनिकरकरासेव्यकञ्जाङ्घ्रियुग्माम् ।। नीला-म्भोजांशुकान्ति निशिचरनिकरारण्यदावाग्निरूपाम्पाशंखड्गञ्चतुर्भिर्वर-कमलकरैः खेटकञ्चांकुशञ्च ।। मातङ्गीमावहन्तीमभिमतफलदाम्मोदि-नीञ्चिन्तयामि ।।7।। नमस्ते मातङ्गयै मृदुमुदिततन्वै तनुमतांपरश्रेयोदायै कमलचरणध्यानमनसाम् ।। सदा संसेव्यायै सदसि विबुधैर्दिव्यधिषणैर्दयार्द्रायै देव्यै दुरितदलनोद्दण्डमनसे ।।8।। परम्मातस्ते यो जपति मनुमेवोग्रहृदयः कवित्वङ्कल्पानाङ्कलयति सुकल्पः प्रतिपदम् ।। अपि प्रायोरम्यामृतमयपदा तस्य ललिता नटीम्मन्या वाणी नटति रसनायाञ्चपलिता ।।9।। तव ध्यायन्तो ये वपुरनुजपन्ति प्रवलितं सदा मन्त्रम्मातर्नहि भवति तेषा-म्परिभवः ।। कदम्बानाम्माल्यैश्शिर अपि च युञ्जन्ति यदि ये भवन्ति प्रायस्ते युवतिजनयूथस्ववशगाः ।।10।। सरोजैस्साहस्रैस्सरसिजपदद्वन्द्वमपि ये सहस्रन्नामोक्त्वा तदपि तव ङेऽन्तम्मनुमितम् ।। पृथङ्नाम्ना तेनायुत-कलितमर्चन्ति प्रसृते सदा देवव्रातप्रणमितपदाम्भोजयुगला ।।11।। तव प्रीत्यै मातर्ददति बलिमाधाय बलिना समत्स्यम्मांसं वा सुरुचिरसितं राजरुचितम् ।। सुपुण्या ये स्वान्तस्तव चरणप्रेमैकरसिका अहोभाग्यन्ते-षान्त्रिभुवनमलं वश्यमखिलम् ।।12।। लसल्लोलश्रोत्राभरणकिरणक्रांति-


कलित म्मितस्मित्यापन्नप्रतिभितममन्नं विकरितम् ॥ मुखाम्भोजम्मातस्तव परिलुठद्भ्रूमधुकरं रमा ये ध्यायन्ति त्यजति नहि तेषां सुभवनम् ॥13॥ परः श्रीमातंग्या जपति हृदयाख्यस्सुमनसामयं सेव्यस्सद्योभिमतफलदश्चातिललितः ॥ नरा ये शृण्वन्ति स्तवमपि पठन्तीममनिशन्न तेषान्दुः प्राप्यञ्जगति यदलभ्यन्दिविषदाम् ॥14॥ धनार्थी धनमाप्नोति दारार्थी सुन्दरीम्प्रियाम् ॥ सुतार्थी लभते पुत्रं स्तवस्यास्य प्रकीर्त्तनात् ॥15॥ विद्यार्थी लभते विद्यां विविधां विभवप्रदाम् ॥ जयार्थी पठनादस्य जयम्प्राप्नोति निश्चितम् ॥16॥ नष्टराज्यो लभेद्राज्यं सर्वसम्पत्समाश्रितम् ॥ कुवेरसमसम्पत्तिः स भवेद्धृदयम्पठन् ॥17॥ किमत्र बहुनोक्तेन यद्यदिच्छति मानवः ॥ मातङ्गीहृदयस्तोत्र-पाठात्तत्सर्वमाप्नुयात् ॥18॥

इति श्रीदक्षिणामूर्त्तिसंहितायां श्रीमातङ्गीहृदयस्तोत्रं समाप्तम् ॥

6 अथ कमलात्मिकातन्त्रम्

ध्यानम्

कान्त्या काञ्चनसन्निभां हिमगिरि प्रख्यैश्चतुर्मिर्गजैः
हस्तोक्षिप्तहिरण्मयाभृतघटैरासिच्यमानां श्रियम् ।
विभ्राणां वरमब्जयुग्ममभयंः हस्तै किरीटोज्ज्वलाम्,,
क्षौमां वद्धनितम्बविम्ब ललितां वन्देऽरविन्दस्थिताम् ॥



अथ यन्त्रोद्धारः

अनुक्तकल्पे यन्त्रन्तु लिखेत्पद्मन्दलाष्टकम् ॥
षट्कोणकर्णिकन्तत्र देवद्वारोपशोभितम् ॥

अथ मन्त्रोद्धारः

तारम्पूर्वं लिखित्वा परमलममलं वाग्भवम्वीजमन्यल्लज्जा
श्रीबीजपूर्वं वशकरणतमङ्कामबीजम्परस्तात् । हसौ पश्चाद्योजनीयं सुयुतमथ
जगत्पूर्विकायाः प्रसूत्या ङेऽन्तं रूपनमोन्तन्निखिलमनुविदैर्मन्त्रमुक्तं रमायाः ॥

अथ मन्त्रः

ओं ऐं ह्रीं श्रींक्लींह्सौः जगत्प्रसूत्यै नमः ॥

अथ पूजाप्रयोगः

प्रातः कृत्यादि पीठन्यासान्तंकर्म्म विधाय हृत्पद्मस्थपूर्वकेसरेषु मध्ये च पीठशक्तीः पीठमनुञ्च न्यसेत् ॥ ॐ विभूत्यैनमः एवम् उन्नत्यै० कान्त्यै० सृष्टयै० कीर्त्यै० सन्नत्यै० व्युष्टटै० उत्कृष्ट्यै० ऋद्धयै० । ततः श्रीकमलासनायनमः इत्यासनं विन्यस्य ऋष्यादिन्यासङ्कुर्य्यात् ॥

शिरसि भृगुऋषयेनमः, मुखे निचृच्छन्दसेनमः हृदि श्रियै देवतायै नमः ।

ततः कराङ्गन्यासौ कुर्य्यात् ॥ श्रां अङ्गुष्ठाभ्यांनमः, श्रीं तर्जनीभ्यां-स्वाहा, श्रूं मध्यमाभ्यां वषट् इत्यादि ॥ एवं श्रांहृदयायनमः इत्यादिना च न्यसेत् ॥ तथा च निबन्धे ॥ अङ्गानि दीर्घयुक्तेन रमाबीजेन कल्पयेत् ॥ ततो ध्यानम् ॥

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् । बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलाङ्क्षौमाबद्धनितम्बललितां वन्देऽरविन्दस्थिताम् ॥ एवं-ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनङ्कुर्यात् ॥ ततः पीठपूजां विधाय केसरेषु मध्ये विभूत्यादि पीठमन्वन्तपूजां विधाय पुनर्ध्यात्वा आवाहनादि पञ्चपुष्पाञ्जलिदानपर्यन्तं विधाय ॥ आवरणपूजामारभेत् ॥ अग्न्यादि केसरेषु मध्ये दिक्षु च श्रांहृदयायनमः ॥ इत्यादिना सम्पूज्य दिग्दलेषु पूर्वादिषु ॥ ॐवासुदेवायनमः, एवं सङ्कर्षणाय० प्रद्युम्नाय० अनिरुद्धाय० विदिग्दलेषु ॐदमकाय० ॐसलिलाय० ॐगुग्गुलाय० ॐकुरण्टकाय० ॥ ततो देव्या दक्षिणे ॐशङ्खनिधये नमः, एवं वसुधायैनमः वामे ॐपद्मनिधये० ॐवसुमत्यै० पत्राग्रेषु पूर्वादितः ॐबलाकायैनमः एवं विमलायै० वन-मालिकायै० विभीषिकायै० तद्वहिरिन्द्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनान्तंकर्म समापयेत् ॥ अस्य पुरश्चरणंद्वादशलक्षजपः ॥ तथा च भानुलक्षञ्जपेन्मन्त्रन्दीक्षितो विजितेन्द्रियः ॥ तत्सहस्रञ्च जुहुयात् कमलैर्मधुराप्लुतैः ॥ जपान्ते जुहुयान्मन्त्री तिलैर्वा मधुराप्लुतैः ॥ बिल्वैः फलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः ॥ इति पूजाप्रयोगः ॥

अथ स्तोत्रम्

त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे ॥ यथा त्वमचला कृष्णे तथा भव मयि स्थिरा ॥1॥ ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया ॥ पद्मा पद्मालया सम्यगुच्चैः श्रीपद्मधारिणी ॥2॥ द्वादशैतानि नामानि लक्ष्मीं सम्पूज्य यः पठेत् ॥ स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिः सह ॥3॥ इति श्रीकमलात्मिकास्तोत्रं समाप्तम् ॥

अथ कवचम्

अथ वक्ष्ये महेशानि कवचं सर्वकामदम् ॥ यस्य विज्ञानमात्रेण भवेत्साक्षात्सदाशिवः ॥1॥ नार्चनन्तस्य देवेशि मन्त्रमात्रञ्जपेन्नरः ॥ स भवेत्पार्वतीपुत्रः सर्वशास्त्रविशारदः ॥2॥ विद्यार्थिनां सदा विद्या धनदातृ विशेषतः ॥ धर्मार्थिभिस्सदा सेव्या कमला विष्णुवल्लभा ॥3॥ अस्याश्चतुरक्षरीविष्णुवल्लभाया कवचस्य भगवान् ऋषिरनुष्टुपछन्दो वाग्भवी शक्तिर्देवता वाग्भवं वीजं लज्जारमाकीलकं कामवीजात्मकङ्कवचं मम सुपाण्डित्यकवित्व-सर्वसिद्धिसमृद्धये विनियोगः ॥

ऐंकारो मस्तके पातु वाग्भवी सर्वसिद्धिदा ॥ ह्रीं पातु चक्षुषोर्मध्ये चक्षुयुग्मे च शाङ्करी ॥4॥ जिह्वायाम्मुखवृत्ते च कर्णयोर्दन्तयोर्नसि ॥ ओष्ठाधरे दन्तपङ्क्तौ तालुमूले हनौ पुनः ॥5॥ पातु मां विष्णुवनिता लक्ष्मीः श्रीविष्णुरूपिणी ॥6॥ कर्णयुग्मे भुजद्वन्द्वे स्तनद्वन्द्वे च पार्वती ॥ हृदये मणिवन्धे च ग्रीवायाम्पार्श्वयोः पुनः ॥7॥ पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा ॥ उपस्थे च नितम्वे च नाभौ जङ्घाद्वये पुनः ॥8॥ जानुचक्रे पदद्वन्द्वे घुटिकेऽङ्गुलिमूलके ॥ स्वधातुप्राणशक्त्यात्मसीमन्ते मस्तके पुनः ॥9॥ विजया पातु भवने जया पातु सदा मम ॥ सर्वाङ्गे पातु कामेशी महादेवी सरस्वती ॥10॥ तुष्टिः पातु महामाया उत्कृष्टिः सर्वदावतु ॥ ऋद्धिः पातु महादेवी सर्वत्र शम्भुवल्लभा ॥11॥ वाग्भवी सर्वदा पातु पातु मां हरगेहिनी ॥ रमा पातु सदा देवी पातु रम्या स्वराट्स्वयम् ॥12॥ सर्वाङ्गे पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी ॥ शिवदूती सदा पातु सुन्दरी पातु सर्वदा ॥13॥ भैरवी पातु सर्वत्र भेरुण्डा सर्वदावतु ॥ त्वरिता पातु मान्नित्यमुग्रतारा सदावतु ॥14॥ पातु माङ्कालिका नित्यङ्कालरात्रिः

सदावतु ॥ नवदुर्गा सदा पातु कामाक्षी सर्वदावतु ॥15॥ योगिन्यः सर्वदा पान्तु मुद्राः पान्तु सदा मम ॥ मात्राः पान्तु सदा देव्यश्चक्रस्था योगिनीगणाः ॥16॥ सर्वत्र सर्वकार्येषु सर्वकर्म्मसु सर्वदा ॥ पातु मान्देवदेवी च लक्ष्मीः सर्वसमृद्धिदा ॥17॥ इति ते कथितं दिव्यङ्कवचं सर्वसिद्धये ॥ यत्र तत्र न वक्तव्यं यदीच्छेदात्मनो हितम् ॥18॥ शठाय भक्तिहीनाय निन्दकाय महेश्वरी ॥ न्यूनाङ्गे चातिरिक्ताङ्गे दर्शयेन्न कदचन ॥19॥ न स्तवन्दर्शयेद्दिव्यं सन्दर्श्य शिवहा भवेत् ॥ कुलीनाय महेच्छाय दुर्गाभक्तिपराय च ॥20॥ वैष्णवाय विशुद्धाय दद्यात्कवच-मुत्तमम् ॥ निजशिष्याय शान्ताय धनिने ज्ञानिने तथा ॥21॥ दद्यात्कवच-मित्युक्तं सर्वतन्त्रसमन्वितम् ॥ शनी मङ्गलवारे च रक्तचन्दनकैः-तथा ॥22॥यावकेन लिखेन्मन्त्रं सर्वतन्त्रसमन्वितम् ॥ विलिख्य कवचन्दिव्यं स्वयम्भुकुसुमैः शुभैः ॥23॥ स्वशुक्रैः परशुक्रैर्वा नानागन्धसमन्वितैः ॥ गोरोचनाकुङ्कुमेन रक्तचन्दनकेन वा ॥24॥ सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने ॥ अश्विन्याङ्कृत्तिकायां वा फल्गुन्यां वा मघासु च ॥25॥ पूर्वभाद्रपदायोगे स्वात्याम्मङ्गलवासरे ॥ विलिखेत्प्रपठेत्स्तोत्रं शुभयोगे सुरालये ॥26॥ आयुष्मत्प्रीतियोगे च ब्रह्मयोगे विशेषतः ॥ इन्द्रयोगे शुभे योगे शुक्रयोगे तथैव च ॥27॥ कौलवे बालवे चैव वणिजे चैव सत्तमः ॥ शून्यागारे श्मशाने च विजने च विशेषतः ॥28॥ कुमारीम्पूजयित्वाऽऽदौ यजेद्देवीं सनातनीम् ॥ मत्स्यैर्मांसैः शाकसूपैः पूजयेत्पर देवताम् ॥29॥ घृताद्यैः सोपकरणैः पूपसूपैर्वित्तपतः । ब्राह्मणान् भोजयित्वा च पूजयेत परमेश्वरीम् ॥30॥ आखेटक मुपाख्यानं तत्र कुर्याद् दिनत्रयम् । तदाधारेन् महाविद्या शंकरेण प्रभाषिताम् ॥31॥ मरणद्वेषणादीनि लभते नात्र संशयः । स भवेत्पार्वतीपुत्रः सर्वशास्त्र पुरस्कृतः ॥32॥ गुरुर्देवो हरः साक्षात् पत्नी हर प्रिया । अभेदेनभजेद्यस्तु तस्य सिद्धि-रदूरतः ॥35॥ पठति य इह मर्त्यो नित्यमार्द्रन्तिरात्मा जप फल मनुमेयं लप्स्यते यद्विधेयम् । स भवति पदमुच्चैः सम्पदांपाद नम्र क्षितिपमुकुट लक्ष्मी लक्षणानां चिरायुः ॥34॥

इतिश्रीविश्वसार तन्त्रे कमलात्मिका कवचम् ॥

अथ श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।। चन्द्रां हिरण्मयीं लक्ष्मीञ्जातवेदो ममावह ।।1।। ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।। यस्यां हिरण्यं विन्देयङ्गामश्वम्पुरुषानहम् ।।2।। अश्वपूर्णां रथमध्यां हस्तिनादप्रमोदिनीम् ।। श्रियन्देवीमुपह्वये श्रीर्म्मा देवी जुषताम् ।।3।। कां सोस्मि तां हिरण्यप्राकारामाद्रांञ्ज्वलन्तीन्तृप्तान्तर्पयन्तीम् ।। पद्मे स्थिताम्पद्मवर्णान्तामिहोपह्वये श्रियम् ।।4।। चन्द्राम्प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।। ताम्पद्मनेमि शरणमहम्प्रपद्ये अलक्ष्मीर्मे नश्यतान्त्वां वृणोमि ।।5।। आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।। तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च वाह्या अलक्ष्मीः ।।6।। उपैतु मान्देवसखः कीर्त्तिश्च मणिना सह ।। प्रादुर्भूतोसि राष्ट्रेऽस्मिन्कीर्तिं वृद्धिन्ददातु मे ।।7।। क्षुत्पिपासामलां ज्येष्ठां अलक्ष्मीर्नाशयाम्यहम् ।। अभूतिमसमृद्धिञ्च सर्वान्निर्णुद मे गृहात् ।।8।। गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम् ।। ईश्वरीं सर्वभूतानान्तामिहोपह्वये श्रियम् ।।9।। मनसः काममाकूतिं वाचः सत्यमशीमहि पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।।10।। कर्द्दमेन प्रजाभूता मयि सम्भ्रमकर्द्दम ।। श्रियं वासय मे कुले मातरम्पद्ममालिनीम् ।।11।। आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।। निचदेवीम्मातरं श्रियं वासय मे कुले ।।12।। आर्द्राम्पुष्पकरिणीम्पुष्टिं सुवर्णां हेममालिनीम् ।। सूर्य्यां हिरण्मयीं लक्ष्मीञ्जातवेदो ममावह ।।13।। आर्द्रां यः करणीं यष्टीम्पिङ्गलाम्पद्ममालिनीम् ।। चन्द्रां हिरण्मयीं लक्ष्मीञ्जातवेदो ममावह ।।14।। ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।। यस्यां हिरण्यम्प्रभूतङ्गावो दास्योश्वान्विन्देयम्पुरुषानहम् ।।15।। यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।। श्रियः पञ्चदशर्चञ्च श्रीकामः सततञ्जपेत् ।।16।। इति श्रीसूक्तम् ।।

अथाष्टोत्तरशतनामस्तोत्रम्

श्रीशिव उवाच ।। शतमष्टोत्तरन्नाम्नाङ्कमलाया वरानने ।। प्रवक्ष्याम्यतिगुह्यं हि न कदापि प्रकाशयेत् ।।1।। महामाया महालक्ष्मी-

महावाणी महेश्वरी ।। महादेवी महारात्रिर्महिषासुरमर्दिनी ।।2।। कालरात्रि: कुहू: पूर्णा नन्दाद्या भद्रिका निशा ।। जया रिक्ता महाशक्तिर्देवमाता कृशोदरी ।।3।। शचीन्द्राणी शक्रनुता शङ्करप्रियवल्लभा ।। महावराहजननी मदनोन्मथिनी मही ।।4।। वैकुण्ठनाथरमणी विष्णुवक्षस्थलस्थिता ।। विश्वेश्वरी विश्वमाता वरदा भयदा शिवा ।।5।। शूलिनी चक्रिणी मा च पाशिनी शङ्खधारिणी । गदिनी मुण्डमाला च कमला करुणालया ।।6।। पद्माक्षधारिणी ह्यम्बा महाविष्णुप्रियङ्करी ।। गोलोकनाथरमणी गोलोकेश्वरपूजिता ।।7।। गया गङ्गा च यमुना गोमती गरुडासना ।। गण्डकी सरयू तापी रेवा चैव पयस्विनी ।।8।। नर्मदा चैव कावेरी केदारस्थलवासिनी ।। किशोरी केशवनुता महेन्द्रपरिवन्दिता ।।9।। ब्रह्मादिदेवनिर्माणकारिणी वेदपूजिता ।। कोटिब्रह्माण्डमध्यस्था कोटिब्रह्माण्डकारिणी ।।10।। श्रुतिरूपा श्रुतिकरी श्रुतिस्मृतिपरायणा ।। इन्दिरा सिन्धुतनया मातङ्गी लोकमातृका ।।11।। त्रिलोकजननी तन्त्रा तन्त्रमन्त्रस्वरूपिणी ।। तरुणी च तमोहन्त्री मङ्गला मङ्गलायना ।।12।। मधुकैटभमथनी शुम्भासुरविनाशिनी ।। निशुम्भादिहरा माता हरिशङ्करपूजिता ।।13।। सर्वदेवमयी सर्वा शरणागतपालिनी ।। शरण्या शम्भुवनिता सिन्धुतीरनिवासिनी ।।14।। गन्धर्वगानरसिका गीता गोविन्दवल्लभा । त्रैलोक्यपातिनी तत्त्वरूपतारूण्यपूरिता ।।15।। चन्द्रावली चन्द्रमुखी चन्द्रिका चन्द्रपूजिता। चन्द्राशशाङ्कभगिनी गीतवाद्यपरायणा ।।16।। सृष्टिरूपा सृष्टिकरी सृष्टिसंहारकारिणी । इति ते कथितं देवि रमानाम शताष्टकम् ।।17।। त्रिसन्ध्यं प्रयतो भूत्वा पठेतैतत्समाहित: । यं यं कामयते कामं तं तं प्राप्नोति असंशय: 18।। इमं स्तवं य: पठतीह मर्त्यो वैकुण्ठपत्न्या: परमादरेण धनाधिपाद्यै: परिवंदित: स्यात् प्रयास्यति श्रीपदमन्तकाले ।।19।।

इतिकमलाया: अष्टोतर नामस्तोत्रम् ।



Ambaji

Subhash Calendar Co.
Nai Sarak, DELHI-6 Ph. [illegible]




7 अथ दुर्गातन्त्रम्

दुर्गाध्यानम्

सिंहस्कन्धसमारूढां नानालंकार भूषिताम् ।।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशीं तनुम् ।
नारदाद्यै: मुनिगणै: सेवितां भवगेहिनीम् ।
त्रिवली वलयोपेतां नाभिनाल सुवेशिनीम् ।
रत्न द्वीपे महाद्वीपे सिंहासनसमन्विते ।
प्रफुल्ल कमला रूढां ध्यायेत्तां भवगेहनीम् ।।

अथ यन्त्रोद्धार:

दुर्गायन्त्रम्प्रवक्ष्यामि शृणुष्व हरवल्लभे ।। त्रिकोणं विन्यसेत्पूर्वंन्नवकोणसमन्वितम् ।। त्रैविम्वसहितं सर्वमष्टपत्रसमन्वितम् ।। त्रिरेखासहितं वज्रम्भूपुरद्वयसंय्युतम् ।। समीकृत्य यथोक्तेन विलिखेद्विधिनामुना ।। नानास्त्रसंय्युतं लेख्यञ्चक्रम्मन्त्रविभूषितम् ।। तत्र ताम्पूजयेद्देवीम्मूलप्रकृतिरूपिणीम् ।।



अथ मन्त्रोद्धार:

अथ दुर्गामनु वक्ष्ये दृष्टादृष्टफलप्रदम् ।। मायादि: कर्णविद्धाढ्यो

भूयोऽसौ सर्गवान्भवेत् ॥ चान्तकश्च प्रतिष्ठावान्मारुतो भौतिकासनः ॥ तारादिहृदयान्तोयम्मन्त्रो वस्वक्षरात्मकः ॥

अथ मन्त्र

उों ह्लींदुन्दुर्गायै नमः ।

अथ पूजाविधिः

प्रातः कृत्यादि पीठन्यासान्तं विधाय केसरेपु मध्ये च पीठशक्तीर्विन्यसेत् ॥ तद्यथा ॥ आं प्रभायैनमः ईं मायायै नमः । ऊं जयायैनमः, ॠं सूक्ष्मायै नमः, ॡं विशुद्धायैनमः, ऐं नन्दिन्यै नमः ॥ औं सुप्रभायै नमः, अं विजयायै नमः, अःसर्वसिद्धिदायैनमः ॥ तदुपरि ॥ उों वज्रनखदंष्ट्रायुधाय महासिंहासनाय हूंफट्नम इतिपूजयेत ॥

ततः ऋष्यादिन्यासः ॥ शिरसि नारदऋषये नमः ॥ मुखे गायत्रीछन्दसे नमः ॥ हृदि दुर्गादेवतायै नमः ॥

ततः कराङ्गन्यासौ—ह्लांउोंह्लींदुन्दुर्गायै अङ्गुष्ठाभ्यांनमः, ह्लींउोंह्लींदुन्दुर्गायै तर्जनीभ्यां स्वाहा, ह्लूंउोंह्लींदुन्दुर्गायै मध्यमाभ्यांवषट् ह्लैंउोंह्लींदुन्दुर्गायै अनामिकाभ्यां हुम्, ह्लौंउोंह्लींदुन्दुर्गायै कनिष्ठिकाभ्यांवौषट्, ह्लःउोंह्लींदुन्दुर्गायै करतलकरपृष्ठाभ्यांफट् ॥ एवं हृदयादि ॥ ह्लांउोंह्लींदुन्दुर्गायै हृदयायनमः, ह्लींउोंह्लींदुन्दुर्गायै शिरसेस्वाहा, ह्लउोंह्लींदुन्दुर्गायै शिखायैवषट् ह्लैंउोंह्लींदुन्दुर्गायै नेत्रत्रयायवौषट्, ह्लौंउोंह्लींदुन्दुर्गायै कवचायहुम्, ह्लः उोंह्लींदुन्दुर्गायै अस्त्रायफडिति षडङ्गादिन्यासः ॥ तथा च निबन्धे । नमस्कारनियुक्तेन मूलमन्त्रेण देशिकः ॥ ह्लीमाद्यैः सह कुर्वीत षडङ्गानि यथाविधिः ॥

अथ ध्यानम् ॥ सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः, षड्गञ्चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिर्शोभिता ॥ आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीक्वणन्नूपुरा, दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला ॥ एवंध्यात्वा मानसैः शङ्खस्थापनङ्कुर्यात् ॥ ततः पीठपूजां कुर्यात् ॥ केसरेषु मध्ये च आं प्रभायैनमः, ईं मायायैनमः, ऊं जयायैनमः, ॠं सूक्ष्मायैनमः, ॡं विशुद्धायैनमः, ऊं ऐंनन्दिन्यैनमः ॥ औं सुप्रभायैनमः ॥

अं विजयायैनमः ।। अःसर्वसिद्धिदायैनमः ।। तदुपरि वज्रनखदंष्ट्रायुधाय महासिंहासनाय हुम्फट्नमः । दद्यादासनमेतेन मूर्तिमूलेन कल्पयेत् ।। ततः पुनर्ध्यात्वाऽऽवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तंविधायावरणपूजामारभेत् ।। अग्निनैर्ऋतिवाय्वीशानकोणमध्ये दिक्षु च ।। ह्रांउोंह्रींदुन्दुर्गायै हृदयायनमः ।। इत्यादिना पूजयेत् ।। ततः पत्रेषु पूर्वादि ।। जं जयायै०, विं विजयायै०, किं कीर्त्यै०, पं प्रीत्यैनमः, पं प्रभायै०, शं शुद्धायै०, मं मेधायै०, शं श्रुत्यै० ।। पत्राग्रेषु लं खड्गायनमः, वं खेटकायनमः, शं बाणायनमः, षं धनुषेनमः, संशूलाय०, हंतर्जन्यै० तद्बहिरिन्द्रादिवज्रादींश्च पूजयेत् ।। ततो धूपादि-विसर्जनान्तङ्कर्म समापयेत् ।। अस्या बलिमन्त्रस्तु ।। एहि एहि पदद्वन्द्वम्म-दीयञ्च बलिन्देवि लुलायकपदद्वयं साधय द्वितीयम्ब्रूयात्खादय द्वितीयम्पुनः । सर्वसिद्धिपदंदेवी ततः स्वाहा पदं भवेत् ।। बलिदानस्य मन्त्रोऽयं मन्त्रिण्या परिकीर्त्तितः ।। अस्य पुरश्चरणमष्टलक्षः ।। अष्टसहस्रतिलैर्होमः ।। तथा च ।। वसुलक्षं जपेन्मन्त्रं तत्सहस्रतिलैः सह इत्यादिवचनात् ।।

अथ स्तोत्रम्

न मन्त्रन्नो यन्त्रन्तदपि च न जाने स्तुतिमहो न चाह्वानंध्यानन्तदपि च न जाने स्तुतिकथाः ।। न जाने मुद्रास्ते तदपि च न जाने विलपनम्परञ्जाने मातस्त्वदनुशरणं क्लेशहरणम् ।।1।। विधेरज्ञानेन द्रविणविरहेणाऽलसतया विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।। तदेतत्क्षन्तव्यञ्जननि सकलोद्धारिणि शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।2।। पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः परंतेपाम्मध्ये विरलतरलोऽहं तव सुतः ।। मदीयोऽयंत्यागः समुचितमिदंनो तव शिवे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।3।। जगन्मातर्मातस्तव चरणसेवा न रचिता न वा दत्तंदेवि द्रविणमपि भूयस्तव मया ।। तथाऽपि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।4।। परित्यक्त्वा देवान्विविधविधि सेवाकुलतया मया पञ्चाशीतेरधिकमुपनीते तु वयसि ।। इदानीञ्चेन्मातस्तव यदि कृपा नाऽपि भविता निरालम्बो लम्बोदरजननि कं यामि शरणम् ।।5।। श्वपाको जल्पाको भवति मधुपाकोपमगिरा निरातङ्को रङ्को विहरति चिरङ्कोटिकनकैः ।। तवापर्णे कर्णे विशति

मनुवर्णे फलमिदंजन: को जानीते जननि जपनीयञ्जपविधौ ।।6।। चिता-भस्मालेपो गरलमशनं दिक्पटधरो जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।। कपाली भूतेशो भजति जगदीशैकपदवींभवानि त्वत्पाणिग्रहणपरिपाटी फलमिदम् ।।7।। न मोक्षस्याकाङ्क्षा न च विभववाञ्छापि च न मे न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुन: ।। अतस्त्वां संयाचे जननि जननं यातु मम वै, मृडानी रुद्राणी शिवशिव भवानीति जपत: ।।8।। नाराधितासि विधिना विविधोपचारैः किं रूक्षचिन्तनपरैर्न कृतं वचोभिः ।। श्यामे त्वमेव यदि किञ्चन मय्यनाथे धत्से कृपामुचितमम्ब परंतवैव ।।9।। आपत्सु मग्न: स्मरणंत्वदीयङ्करोमि दुर्गे करुणार्णवेशि ।। नैतच्छठत्वंमम भावयेथा: क्षुधातृषार्त्ता जननीं स्मरन्ति ।।10।। जगदम्ब विचित्रमत्र किम्परिपूर्णा करुणास्ति चेन्मयि ।। अपराधपरम्परापरन्न हि माता समुपेक्षते सुतम् ।।11।। मत्सम: पातकी नास्ति पापघ्नी त्वत्समा न हि ।। एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ।।12।। इति स्तोत्रम् ।।

अथ कवचम्

शृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम् ।। पठित्वा पाठयित्वा च नरो मुच्येत सङ्कटात् ।। अज्ञात्वा कवचन्देवि दुर्गामन्त्रञ्च यो जपेत् ।। स नाप्नोति फलन्तस्य परञ्च नरकं व्रजेत् ।। उमादेवी शिर: पातु ललाटे शूलधारिणी ।। चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी ।। सुगन्धा नासिके पातु वदनं सर्वधारिणी ।। जिह्वाञ्च चण्डिका देवी ग्रीवां सौभद्रिका तथा ।। अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी ।। हृदयं ललिता देवी उदरं सिंहवाहिनी ।। कटिम्भगवती देवी द्वावूरू विन्ध्यवासिनी ।। महाबला च जङ्घे द्वे पादौ भूतलवासिनी ।। एवं स्थितासि देवि त्वं त्रैलोक्ये रक्षात्मिका ।। रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोऽस्तु ते ।। इति कवचम् ।।

अथोपनिषत्

सर्वे देवा देवीमुपतस्थुः । कासि त्वम्महादेवि । साब्रवीदहम्ब्रह्मस्वरूपिणी । मत्त: प्रकृतिपुरुषात्मकञ्जगत । शून्यञ्चाशून्यञ्च । अहमानन्दावानन्दौ ।। अहं विज्ञानाविज्ञाने । अहम्ब्रह्माणी वेदब्रह्माणि वेदितव्ये इति चाथर्वणी श्रुतिः ।। अहम्पञ्चभूतानि अहं पञ्चतन्मात्राणि ।। अहम-

खिलञ्जगत्, वेदोऽहमवेदोऽहम्, विद्याहमविद्याहम्, अजाहमनजाहम्, अधश्चोद्र्ध्वञ्च तिर्य्यक् चाहम् । अहं रुद्रेभिर्वसुभिश्चरामि अहमादित्यैरुत विश्वेदेवैः ।। अहम्मित्रावरुणावुभौ विभर्मि अहमिन्द्राग्नी अहमश्विनावुभौ ।। अहं सोमं त्वष्टारम्पूषणम्भगं सन्दधामि ।। अहं विष्णुमुरुक्रमम्ब्रह्माणमुत्प्रजापतिंदधामि ।। द्रविणं हविष्मते सुप्रजाय यजमानाय सुन्वते ।। अहं राष्ट्री सङ्गमनी वसूनाञ्चिकितुषी प्रथमा यज्ञियानाम् ।। अहं सुवेर्यः पितरमस्य मूर्द्धन्मम योनिरप्स्वन्तः समुद्रे ।। य एवं वेद स देवीपदमाप्नोति । ते देवा अब्रुवन् ।। नमो देव्यै महादेव्यै शिवायै सततंनमः ।। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।। तामग्निवर्णातपसा ज्वलन्तीं वैरोचनीं-कर्मफलेषुजुष्टाम् ।। दुर्गान्देवी शरणमहम्प्रपद्ये सुतरां नाशयते तमः ।। देवीमम्वामजनयन्त देवास्तां विश्वरूपा पशवो वदन्ति । सा नो मन्द्रेषमूर्जन्दुहाना धेनुर्वागस्मानुप सुष्ठुतैतु ।। कालरात्रीं ब्रह्मस्तुतामनन्तां वैष्णवीं स्कन्दमातरं सरस्वतीमदितिन्दक्षदुहितरन्नमाम्यहं पावनां शिवाम् ।। महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि ।। तन्नो देवी प्रचोदयात् ।। अदितिह्यजनिष्ट दक्षया दुहिता तव ।। तान्देवा अन्वजायन्त भद्रा अमृतवन्धवः ।। कामोयोनिः कमलावेत्रपाणिगुहाहस्ता मातरिश्वाशमिन्द्रः पुनर्गुहा सफला मायया चापृथुकेन विश्वमातादि विद्या एषात्म शक्तिः । एषा विश्वमोहिनी । पाशाङ्कुशधनुर्बाणधरा एषा श्रीमहाविद्या य एवं वेद स शोकन्तरति । नमस्ते भगवति मातरस्मान्पाहि सर्वतः । सैषाष्टौ वसवः सैषा एकादश रुद्राः सैषा द्वादशादित्याः सैषा विश्वेदेवाः, सोमपा असोमपाश्च सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः, सैषा सत्त्वरजस्तमांसि, सैषा ब्रह्मविष्णुरुद्ररूपिणी, सैषा प्रजापतीन्द्रमनवः, सैषा ग्रहनक्षत्रज्योतींषि कलाकाष्ठादीनि भस्मरूपिणी तामहम्प्रणतोस्मि ।। नित्यपापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीं ।। अनन्तां विजयां शुद्धां शरण्यां शिवदां शुभाम् ।। वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम् ।। अर्द्धेन्दुलसितंदेव्या वीजं सर्वार्थसाधकम् ।। एवमेकाक्षरम्मन्त्रंक्रतवः शुद्धचेतसः ।। ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः ।। वामा या ब्रह्मभूतस्मात्यष्टवक्त्र-समन्वितम् ।। सूर्यो वामश्रोत्रविन्दुः संय्युक्ताष्टातृतीयकः । नारायणेन सम्मित्रो सावाद्य-

श्चाधरयुक्तयः ।। विधे नवार्णकोऽर्णः स्यान्महानन्दप्रदायकः ।। हृत्पुण्डरीकमध्यस्थाम्प्रातः सूर्यसमप्रभाम् ।। पाशाङ्कुशधरां सौम्यांवरदाभयहस्तकाम् ।। त्रिनेत्रां रक्तवसनाम्भक्तकामदुहाम्भजे ।। भजामि त्वाम्महादेवीम्महाभयविनाशिनीम् ।। महादारिद्र्यशमनी महारूपास्वरूपिणी ।। यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अनन्ता । यस्या गृहन्नोपलक्ष्यते तस्मादुच्यते अलक्ष्यम् । यस्या जननन्नोपलक्ष्यते तस्मादुच्यते अजा । एकैव सर्वत्र वर्त्तते तस्मादुच्यते एका । एकैकविश्व रूपिणी तस्मादुच्यतेऽनेका । अनन्ततपोवाच्यज्ञेयानन्तालक्ष्याजैकानेकानमन्त्राणाम्मातृका देवी शब्दानां ज्ञानरूपिणी ।। ज्ञानानाञ्चिन्मयातीता शून्यानां शून्यसाक्षिणी ।। यस्या परतरन्नास्ति सैषा दुर्गा प्रकीर्त्तिता । तांदुर्गांदुर्गमान्देवीन्दुराचारविधायिनीम् ।। नमामि भवभीतोऽहं संसारार्णवतारिणीम् ।। इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षफलमाप्नोति इदमथर्वशीर्षमज्ञात्वा यो अर्चां स्थापयति शतलक्षञ्जप्त्वा नार्चाशुद्धिञ्च विन्दति । शतमष्टोत्तरञ्चास्य पुरश्चर्य्यास्मृतः । दशवारम्पठेद्यस्तु सद्यः पापैः प्रमुच्यते ।। महादुर्गाणि तरति महादेव्या प्रसादतः ।। सायमधीयानो दिवसकृतम्पापन्नाशयति । सायम्प्रातः प्रयुञ्जानो अपापो भवति । निशीथे तुरीयसन्ध्यायां वा जप्त्वा वाक्सिद्धिर्भवति । नूतनायाम्प्रतिमायांसन्निधौ जप्त्वा देवतासान्निध्यम्भवति । प्राणप्रतिष्ठायाञ्जप्त्वा देवता भवति ।। भौमाश्विन्याम्महादेवीसन्निधौ जप्त्वा महामृत्युं तरति य एवं वेद ।। इति देव्या अथर्वशीर्षोपनिषत्समाप्ता ।।

अथ शतनामाष्टकम्

ईश्वर उवाच ।। शतनाम प्रवक्ष्यामि शृणुष्व कमलानने ।। यस्य प्रसादमात्रेण दुर्गा प्रीता सदा भवेत ।।1।। सती साध्वी भवप्रीता भवानी भवमोचनी ।। आर्या दुर्गा जया आद्या त्रिनेत्रा शूलधारिणी ।।2।। पिनाकधारिणी चित्रा चन्द्रघण्टा महातपा ।। मनोबुद्धिरहङ्कारा चित्तरूपा चिता चितिः ।।3।। सर्वमन्त्रमयी सत्या सत्यानन्दस्वरूपिणी ।। अनन्ता भाविनी भाव्या भवा भव्या सदागतिः ।।4।। शम्भुपत्नी देवमाता चिन्ता रत्नप्रिया सदा ।। सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी ।।5।। अपर्णा चैव पर्णा च

पाटला पाटलावती ।। पट्टाम्वरपरीधाना कलमञ्जीररञ्जिनी ।।6।।
अमेया विक्रमा क्रूरा सुन्दरी कुलसुन्दरी ।। नवदुर्गां च मातङ्गी मतङ्ग-
मुनिपूजिता ।।7।। ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा ।।
चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृति ।।8।। विमलोत्कर्षिणी ज्ञाना-
क्रिया सत्या च वाक् प्रदा ।। वहुला बहुलप्रेमा सर्ववाहनवाहना ।।9।।
निशुम्भ-शुम्भहननी महिषासुरमर्दिनी ।। मधुकैटभहन्त्री च चण्डमुण्ड-
विनाशिनी ।।10।। सर्वाऽसुरविनाशा च सर्वदानवघातिनी ।। सर्वंशास्त्रमयी
विद्या सर्वास्त्रधारिणी तथा ।।11।। अनेकशस्त्रहस्ता च अनेकास्त्रविधारिणी ।।
कुमारी चैव कन्या च कौमारी युवती यतिः ।।12।। अप्रौढा चैव प्रौढ़ा च
वृद्धमाता वलप्रदा ।। य इदञ्च पठेत्स्तोत्रंदुर्गानाम शताष्टकम् ।।13।। नासाध्यं
विद्यते देवि त्रिपु लोकेषु पार्वति ।। धनंधान्यं सुतञ्जायां हयं हस्तिनमेव
च ।।14।। चतुर्वर्गन्तथा चान्ते लभेन्मुक्तिञ्च शाश्वतीम् ।। कुमारीं
पूजयित्वा च ध्यात्वा देवीं सुरेश्वरीम् ।।15।। पूजयेत्परया भक्त्या पठेन्नाम
शताष्टकम् ।। तस्य सिद्धिर्भवेद्देवि सर्वैः सुरवरैरपि ।। राजानो दासतां
यांति राज्यश्रियमवाप्नुयात् ।।16।। गोरोचनलक्तककुङ्कमेन सिन्दूर-
कर्पूरमधूत्रयेन ।। विलिख्य यन्त्रं विधिना विधिज्ञो भवेत्सदा धारयते
पुरारिः ।।17।। भौमावास्यानिशाभागे चन्द्रे शतभिषाङ्कते ।। विलिख्य
प्रपठेत्स्तोत्रं स भवेत्सम्पदाम्पदम् ।।18।। इति शतनामाष्टोत्तरशतम् ।।

———


8. अथशिवतन्त्रम्

शिवध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु चन्द्रावतंसं रत्ना कल्पोज्ज्वलांगं परशुमृगवरा भीतिहस्तं प्रसन्नम्। पद्मासीनं समन्तात् स्तुतममरगणैः व्याघ्रकृत्ति वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

अथ यन्त्रोद्धारः

अनुक्तकल्पे यन्त्रन्तु लिखेत्पद्मदलाष्टकम् ॥
षट्कोणकर्णिकन्तत्र वेदद्वारोपशोभितम् ॥



अथ मन्त्रोद्धारः

नमस्कारं समुद्धृत्य वान्तं नेत्रसमन्वितम् ॥ वारुणम्मुखवृत्तञ्च वायु लालाटसंय्युतम् ॥ अमुम्पञ्चाक्षरम्मन्त्रम्पञ्चकामफलप्रदम् ॥ प्रणवादिर्यदा देवि तदा मन्त्रः षडक्षरः ॥



SUBHASH CALENDAR CO.,
4416, NAI SARAK, DELHI-6.

अथ मन्त्रः

उों नमश्शिवाय ।

अथ पूजाप्रयोगः

प्रातः कृत्यादिकङ्कृत्वा पूजागृहङ्गत्वा आसने उपविश्य दीपम्प्रज्वाल्य उों दींदीपनाथायनमः इति दीपं सम्पूज्य भूतापसर्पणङ्कृत्वा पूजामारभेत् ।। तद्यथा ।।

अथ ध्यानम् ।। वन्धूकसन्निभन्देवन्त्रिनेत्रञ्चन्द्रशेखरम् ।। त्रिशूलधारिणन्देवञ्चारुहासं सुनिर्म्मलम् ।।1।। कपालधारिणन्देवं वरदाभयहस्तकम् ।। उमया सहितं शम्भुन्ध्यायेत्सोमेश्वरं सदा ।।2।। इति ध्यानम् ।।

नोट—शिवपूजन के लिए हमारी लिखी शिवार्चनपद्धति का प्रयोग करें ।

अथशिवकवचम्

अस्य श्री शिवकवचस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः श्रीसदाशिवरुद्रोदेवता ह्रीं शक्तिः, रं कीलकम्, श्रीं ह्रीं क्लीं बीजम् श्रीसदाशिव प्रीत्यर्थे शिवकवचस्तोत्र जपे विनियोगः ।

अथ करन्यासः—उों नमो भगवते ज्वलज्वालामालिने उों रां सर्वशक्ति धाम्ने ईशानात्मने अङ्गुष्ठाभ्यांनमः, उों नमो भगवते ज्वलज्ज्वालामालिने उों नरींनित्यतृप्तिधाम्ने तत्पुरुषात्मने तर्जनीभ्यांनमः, उों नमो भगवते ज्वलज्ज्वालामालिने उों मंरूं अनादिशक्तिधाम्ने अघोरात्मने मध्यमाभ्यांनमः, उों नमो भगवते ज्वलज्ज्वालामालिने उों शिं रैं स्वतन्त्रशक्तिधाम्ने वामदेवात्मने अनामिकाभ्यां नमः, उों नमो भगवते ज्वलज्ज्वालामालिने उों वां रों अतुल्यशक्तिधाम्ने सद्योजातात्मने कनिष्ठाभ्यांनमः, उों नमो भगवते ज्वलज्ज्वालामालिने उों यं रः अनादिशक्तिधाम्ने सर्वात्मने करतलकरपृष्ठाभ्यां नमः, एवं हृदयादि ।।

अथ ध्यानम् ।। वज्रदंष्ट्रन्त्रिनयनङ्कालकण्ठमरिन्दमम् ।। सहस्रकरमत्युग्रं वन्दे शम्भुमुमापतिम् ।।1।। अथापरं सर्वपुराणगुह्यन्निः शेषपापौघहरम्पवित्रम् ।। जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवङ्कवचं हितांय ते

॥2॥ ऋषभ उवाच ॥ नमस्कृत्वा महादेव विश्वव्यापिनमीश्वरम् ॥ वक्ष्ये शिवमयं वर्म्म सर्वरक्षाकरन्नृणाम् ॥3॥ शुचौ देशे समासीनो यथावत्कल्पितासनः ॥ जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥4॥ हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम् ॥ अतीन्द्रियं सूक्ष्ममनन्तमाद्यंन्ध्यायेत्परानन्दमयम्महेशम् ॥5॥ ध्यानावधूताखिलकर्मबन्धश्चिरञ्चिदानन्दनिमग्नचेताः ॥ षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥6॥ माम्पातु देवोऽखिलदेवतात्मासंसारकूपे पतितङ्गभीरे ॥ तन्नाम दिव्यं वरमन्त्रमूलन्धुनोतु मे सर्वमघं हृदिस्थम् ॥7॥ सर्वत्र मां रक्षतु विश्वमूर्त्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा ॥ अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥8॥ यो भूस्वरूपेण विभर्त्तिविश्वम्पायात् स भूमेर्गिरिशोऽष्टमूर्त्तिः ॥ योऽपांस्वरूपेण नृणाङ्करोति सञ्जीवनं सोऽवतु माञ्जलेभ्यः ॥9॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ॥ स कालरुद्रोऽवतु मान्दवाग्नेर्वात्यादिभीतेरखिलाञ्च तापात् ॥10॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥11॥ कुठारखेटाङ्कुशपाशशूलकपालढक्काक्षगुणान्दधानः ॥ चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥12॥ कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः ॥ त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु माम्प्रतीच्याम् ॥13॥ वराक्षमालाभयटङ्कहस्तः सरोजकिञ्जल्कसमानवर्णः ॥ त्रिलोचनश्चारुचतुर्मुखो माम्पायादुदीच्यान्दिशि वामदेवः ॥14॥ वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्काक्षकशूलपाणि ॥ सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्द्ध्वम्परमप्रकाशः ॥15॥ मूर्द्धानमव्यान्मम चन्द्रमौलिः भालम्ममाव्यादथ भालनेत्रः ॥ नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥16॥ पायाच्छ्रुती मे श्रुतिगीतकीर्त्तिः कपोलमव्यात्सततङ्कपाली ॥ वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥17॥ कण्ठङ्गिरीशोऽवतु नीलकण्ठः पाणिद्वयम्पातु पिनाकपाणिः ॥ दोर्म्मूलमव्यान्मम धर्मबाहुर्वक्षस्थलन्दक्षमखान्तकोऽव्यात् ॥18॥ ममोदरम्पातु गिरीन्द्रधन्वा मध्यम्ममाव्यान्मदनान्तकारी ॥ हेरम्बतातो मम पातु

नाभिम्पायात्कटिन्धूर्जटिरीश्वरो मे ॥19॥ ऊरुद्वयम्पातु कुबेरमित्रो जानुद्वयम्मे जगदीश्वरोऽव्यात् ॥ जङ्घायुगम्पुङ्गवकेतुरव्यात्पादौ ममाव्यात्सुरवन्द्यपाद: ॥20॥ महेश्वर: पातु दिनादियामे माम्मध्ययामेऽवतु वामदेव: ॥ त्रियम्बक: पातु तृतीययामे वृषध्वज: पातु दिनान्त्ययामे ॥ 21 ॥ पायान्निशादौ शशिशेखरो माङ्गङ्गाधरो रक्षतु मान्निशीथे ॥ गौरीपति: पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ 22 ॥ अन्त:स्थितं रक्षतु शङ्करो मां स्थाणु: सदा पातु बहि: स्थितम्माम् ॥ तदन्तरे पातु पति: पशूनां सदाशिवो रक्षतु मां समन्तात् ॥ 23॥ तिष्ठन्तमव्याद्भुवनैकनाथ: पायाद्व्रजन्तम्प्रमथाधिनाथ: ॥ वेदान्तवेद्योऽवतु मा-न्निषण्णम्मामव्यय: पातु शिव: शयानम् ॥ 24 ॥ मार्गेषु मां रक्षतु नीलकण्ठ: शैलादिदुर्गेषु पुरत्रयारि: ॥ अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्ति: ॥ 25 ॥ कल्पान्तकाटोप-पटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोश: ॥ घोररिसेनार्णवदुर्निवार महाभयाद्रक्षतु वीरभद्र: ॥ 26 ॥ पत्त्यश्वमातङ्गरथावरूथसहस्र- लक्षायुतकोटिभीषणम् ॥ अक्षौहिणीनां शतमाततायिनांच्छिन्द्याम्मृडो घोरकुठारधारया ॥ 27 ॥ निहन्तुदस्यून्प्रलयानलाच्चिज्वलन्त्रिशूलन्त्रिपुरान्तकस्य ॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान् सन्त्रासयत्वीश धनु: पिनाक: ॥ 28 ॥ दु:स्वप्नदु:शकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदु:सहदुर्यशांसि ॥ उत्पाततापविषभीतिमसद्ग्रहार्त्तिव्याधींश्च नाशयतु मे जगतामधीश: ॥ 29 ॥ ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वमन्त्ररूपाय सर्वयन्त्राधिष्ठिताय सर्वतन्त्ररूपाय सर्वतत्त्वविदूराय ब्रह्मारुद्रावतारिणे नीलकण्ठाय पार्वतीमनोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामणिमुकुटधारणाय माणिक्यभूषणाय सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलधारैकनिलयाय तत्त्वातीताय गङ्गाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदान्तसाराय ॥ त्रिवर्गसाधनायान-न्तकोटिब्रह्माण्डनायकायाऽनन्त-वासुकि-तक्षक- कर्कोटकशङ्खकुलिकपद्म-महापद्मेत्यष्टमहानागकुलभूषणाय प्रणवस्वरूपाय चिदाकाशाया-काशदिक्स्वरूपाय ग्रहनक्षत्रमालिने सकलाय कलङ्करहिताय सकललोकैककर्त्रे सकललोकैकसंहर्त्रे

सकललोकैकगुरवे सकललोकैक-साक्षिणे सकलनिगमगुह्याय सकललोकैकवर-प्रदाय सकललोकैकशङ्कराय शशाङ्कशेखराय शाश्वतनिजावासाय निराभासाय निरामयाय निर्म्मलाय निर्लोभाय निर्मदाय निश्चिन्ताय निरहङ्काराय निरङ्कुशाय निष्कलङ्काय निर्गुणाय निष्कामाय निरुपप्लवाय निरवद्याय निरन्तराय निष्कारणाय निरातङ्काय निष्प्रपञ्चाय निस्सङ्गाय निर्द्वन्द्वाय निराधाराय नीरागाय निष्क्रोधाय निर्मलाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भेदाय निष्क्रियाय तिस्तुलाय निः संशयाय निरञ्जनाय निरुपमविभवाय नित्यशुद्ध-बुद्धिपरिपूर्णसच्चिदानन्दाद्वयाय परमशान्तस्वरूपाय तेजोरूपाय तेजोमयाय जय जय रुद्र महारौद्र महावतार महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वाङ्गखड्गचर्मपाशाङ्कुशडमरु-शूलचाप-बाणगदाशक्तिभिन्दिपालतोमरमुसलमुद्गरपाशपरिघभुशुण्डीशतघ्नीचक्राद्यायु-धभीषणकरसहस्रमुखदंष्ट्राकरालवदन विकटाट्टहासविस्फारितब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहार नागेन्द्रवलय नागेन्द्रचर्मधर मृत्युञ्जय त्र्यम्बक त्रिपुरान्तक विश्वरूप विरूपाक्ष विश्वेश्वर वृषभवाहन विश्वतोमुख सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्युमपमृत्युभयन्नाशय नाशय, चोरभयमुत्साद-योत्सादय, विषसर्पभयं शमय शमय, चोरान्मारय मारय, मम शत्रूनुच्चाटयोच्चाटय, त्रिशूलेन विदारय विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि, खट्वाङ्गेन विपोथय विपोथय, मुसलेन निष्पेषय निष्पेषय, बाणैः सन्ताडय सन्ताडय, रक्षांसि भीषय भीषय, अशेषभूतानि विद्रावय विद्रावय, कूष्माण्ड-वेतालमारीगणब्रह्मराक्षसगणान् सन्त्रासय सन्त्रासय, ममाभयङ्कुरु कुरु, वित्रस्तम्मामाश्वासयाश्वासय, नरकमहा भयान्मामुद्धरोद्धर सञ्जीवय सञ्जीवय, क्षुत्तृड्भ्याम्मामाप्याययाप्यायय, दुःखातुरम्मामानन्दयानन्दय, शिवकवचेन मामाच्छादयाच्छादय, मृत्यु ञ्जय त्र्यम्बक सदाशिव नमस्ते ॥ ऋषभ उवाच ॥ इत्येतत्कवचं शैवं वरदं व्याहृतम्मया ॥ सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥ 30 ॥ यः सदा धारयेन्मर्त्यः शैवङ्कवचमुत्तमम् ॥ न तस्य जायते कापि भयं शम्भोरनुग्रहात् ॥ 31 ॥ क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा ॥ सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति ॥ 32 ॥ सर्वदारिद्र्यशमनं

सौमङ्गल्यविवर्द्धनम् ।। यो धत्ते कवचं शैवं स देवैरपि पूज्यते ।। 33 ।। महापातकसङ्घातैर्मुच्यते चोपपातकैः ।। देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ।। 38 ।। त्वमपि श्रद्धया वत्स शैवङ्कवचमुत्तमम् ।। धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ।। 35 ।। सूत उवाच ।। इत्युक्त्वा ऋषभो योगी तस्मै पार्थिवसूनवे ।। ददौ शङ्खम्महारावखड्गञ्चारिनिषूदनम् ।। 36 ।। पुनश्च भस्म सम्मन्त्र्य तदङ्गम्परितोऽस्पृशत् ।। गजानां षट्सहस्रस्य द्विगुणस्य बलन्ददौ ।। 37 ।। भस्मप्रभावात्सम्प्राप्त-बलैश्वर्यधृतिस्मृतिः ।। स राजपुत्रः शुशुभे शरद इव श्रिया ।। 38 ।। तमाह प्राञ्जलिम्भूयः स योगी नृपनन्दनम् ।। एष खड्गं मया दत्तस्तपो मन्त्रानुभावितः ।। 39 ।। शितधारमिमं खड्गं यस्मै दर्शयसे स्फुटम् ।। स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ।। 40 ।। अस्य शङ्खस्य निर्ह्लादं ये श्रृण्वन्ति तवाहिताः ।। ते मूर्च्छिताः पतिष्यन्ति न्यस्तशस्त्रा विचेतनाः ।। 41 ।। खड्गशङ्खाविमौ दिव्यौ परसैन्यविनाशिनौ ।। आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्द्धनौ ।। 42 ।। एतयोश्च प्रभावेण शैवेन कवचेन च ।। द्विषट्सहस्रनागानाम्बलेन महतापि च ।। 43 ।। भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि ।। प्राप्य सिंहासनम्पित्र्यङ्गोप्ताऽसि पृथिवीमिमाम् ।। 44 ।। इति भद्रायुषं सम्यगनुशास्य समातृकम् ।। ताभ्यां सम्पूजितः सोऽथ योगी स्वैरगतिर्ययौ ।। 45 ।। इति शिवकवचं सम्पूर्णम् ।।

अथोपनिषत्

ओं नमश्शिवाय ओं नमोऽस्तु शर्व शम्भो त्रिनेत्र चारुगात्र त्रैलोक्यनाथ उमापते दक्षयज्ञविध्वंसकारक सकामाङ्गनाशन घोरपापप्रणाशन महापुरुष महोग्रमूर्त्ते सर्वसत्त्वक्षयङ्कर शुभङ्कर महेश्वर त्रिशूलधर स्मरारे गुहाधामन् दिग्वासः महाशङ्खशेखर-जटाधर कपालमालविभूषितशरीर वामचक्षुक्षुभितदेवप्रजाध्यक्ष भगाक्ष्णोःक्षयङ्कर भीससेननाथ पशुपते कामाङ्गदहन चत्वरवासिन् शिव महादेव ईशान शङ्कर भीमभव वृषध्वज कैटभ प्रौढ महानाथेश्वर भूतिरत अविमुक्तक रुद्ररुद्रेश्वर स्थाणो एकलिङ्ग कालिन्दीप्रिय श्रीकण्ठ अपराजित रिपुभयङ्कर सन्तोषपते वामदेव अघोर तत्पुरुष महावीर अघोरमूर्त्ते शान्त सरस्वतीकान्त सहस्रमूर्त्ते महोद्भव विभो कालाग्ने

रुद्र रौद्र हर महीधरप्रिय सर्वतीर्थाधिवास हंस कामेश्वर केदार अधिपते परिपूर्ण मुचुकुन्द मधुनिवास कृपाणपाणे भयङ्कर विद्याराज सोमराज कामराज महीधरराजकन्याहृदब्जवसते समुद्रशायिन् गयामुखगोकर्णब्रह्मयोने सहस्रवक्त्राक्षिचरणहाटकेश्वर नमस्ते नमस्ते ।। इत्युपनिषत् ,।

अथ शतनाम

शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः ।।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ।।1।।
शङ्करः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्त-वत्सलः ।।2।।
भवः सर्वः त्रिलोकेशः शितिकण्ठः शिव प्रियः ।
उग्रः कपालिः कामारिरन्धकासुरसूदनः ।।3।।
गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिः जटाधरः ।।4।।
कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद्वलितविग्रहः ।।5।।
सामप्रियः स्वरमयस्त्रयी मूर्त्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ।।6।।
हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ।।7।।
हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघः ।
भुजंगभूषणो भर्गो गिरिधन्वा गिरि प्रियः ।।8।।
कृत्तिवासाः पुरारातिर्भगवान् प्रमथाधिपः ।
मृत्युंजयः सूक्ष्मतनुः जगद्व्यापी जगद् गुरुः ।।9।।
व्योमकेशो महासेनः जनकश्चारु विक्रमः ।
रुद्रोभूतपतिः स्थाणुः अहिर्बुध्न्यो दिगम्बरः ।।10।।
अष्टमूर्त्तिरनेकात्मा सात्त्विकः शुद्ध विग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ।।11।।
मृडः पशुपतिर्देवो महादेवोऽव्ययः प्रभुः ।

पूषदन्त मिदव्यग्रो दक्षाध्वरहरो हर: ॥12॥
भगनेत्र भिदव्यक्त: सहस्राक्ष: सहस्रपात् ।
अपवर्गप्रदोऽनन्त: तारक: परमेश्वर: ॥13॥
इमानि दिव्यनामानि जप्यन्ते सर्वदा मया ।
नामकल्पलतेयम्मे सर्वाभीष्टदायिनी ॥14॥
नामान्येतानिसुभगे शिवदानि न संशय: ।
वेद: सर्वस्वभूतानि नामान्येतानि वस्तुत: ॥15॥
एतानि यानि नामानि तानि सर्वार्थदान्यत: ।
जप्यन्ते सादरं नित्यं मयानियम पूर्वकम् ॥16॥
वेदेषु शिव नामानि श्रेष्ठानि अघहराणि च ।
सन्त्यनन्तानि सुभगे वेदेषु विविधेष्वपि ॥17॥
तेभ्यो नामानि संगृह्य कुमाराय महेश्वर: ।
अष्टोत्तर सहस्रं तु नाम्नामुपदिशत्पुरा ॥18॥
इति शिवाष्टोत्तर शतनामस्तोत्रं संपूर्णम् ॥

9. अथ गणेशतन्त्रम्

गणेशध्यानम्

नवरत्नमयं द्वीपं स्मरेदिक्षुरसाम्वुधौ ।
तद्वीचि धौत पर्यन्तं मन्दमारुत सेवितम् ॥1॥
मन्दारपारिजातादि कल्पवृक्ष लता कुलम् ।
उद्भूतरत्न छायाभिररुणीकृत भूतलम् ॥2॥
उद्यद् दिनकरेन्दुभ्यामुद्भासितदिगन्तरम् ।
तस्यमध्ये पारिजातं नवरत्नमयं स्मरेत् ॥3॥






Ganesh Ji

Subhash Calendar Co.
Nai Sarak. DELHI-6.

ऋतुभिः सेवितं षड्भिरनिशं प्रीति वर्धनैः ।
तस्याधस्तान् महापीठे रचिते मातृकाम्वुजे ॥4॥
षट्कोणान्तस्त्रिकोणाढ्यं महागणपतिं स्मरेत् ॥
गण्डपाली गलद्दान पूर लालसमानसान् ।
द्विरेफान्कर्णतालाभ्यां वारयन्तं मुहुर्मुहुः ॥5॥
कराग्रधृतमाणिक्य कुम्भवक्त्र विनिस्सृतैः ।
रत्नवर्षैः प्रीणयन्तं साधकं मदविह्वलम् ।
माणिक्य मुकुटोपेतं रत्नाभरणभूषितम् ॥6॥

अथ यन्त्रोद्धारः

षट्कोणञ्च त्रिकोणञ्च तद्वहिः अन्यत्सर्वम्मातृकायन्त्रवत् ।



अथ मन्त्रोद्धारः

श्रीशक्तिस्मरभूविघ्नवीजानि प्रथमं वदेत् ॥ ङेऽन्तङ्गणपतिम्पश्चाद्वरान्ते वरदम्परम् ॥ उक्त्वा सर्वजनम्मेऽन्ते वशमानय ठद्वयम् ॥ अष्टाविंशत्यक्षरोऽयन्तारार्द्यो मनुरीरितः ॥

अथ मन्त्रः

ॐ श्रीं ह्रीं क्लीं ग्लौं गंगणपतये वरवरद सर्वजनम्मे वशमानय ठः ठः ॥

अथ पूजाप्रयोगः

प्रातः कृत्यादि पीठन्यासान्तं विधाय पूर्वोक्तपीठशक्तीर्विन्यस्य ॥ तद्यथा ॥ केशरेषु मध्ये च ॥ तीव्रायै० ज्वालिन्यै० नन्दायै० भोगदायै० कामरूपिण्यै० उग्रायै० तेजोवत्यै० सत्यायै० विघ्ननाशिन्यै० तदुपरि मध्ये सर्वशक्तिकमलासनाय नमः ॥ सर्वत्र प्रणवादि नमोऽन्तेन पूजयेत् ॥

ततः ऋष्यादिन्यासमाचरेत्—शिरसि गणकऋषये नमः ॥ मुखे निचृदगायत्रीच्छन्दसे नमः ॥ हृदि गणपतयेदेवतायै नमः ॥

ततः कराङ्गन्यासौ—ॐ ह्रींश्रींक्लींग्लौंगंगां अङ्गुष्ठाभ्यान्नमः ॥ ॐ श्रींह्रींक्लींग्लौंगंगीं तर्जनीभ्यांस्वाहा ॥ 6 ॥ एवं गूं मध्यमाभ्यां वषट् ॥ 6 ॥ गैं तर्जनीभ्यांस्वाहा ॥ 6 ॥ अनामिकाभ्यां हूम् ॥ गौं कनिष्ठाभ्यांवषट् ॥ गःकरतलकरपृष्ठाभ्याम्फट् ॥ एवं हृदयादिषु ॥ केचित्तु ॐ गांहृदयायनमः श्रींगीशिरसेस्वाहेति तत्त्वषड्बीजस्थस्वबीजेन दीर्घभाजा प्रकल्पयेत् ॥ इति वचनाद्विशिष्टस्यैव ग्रहणात् ॥

अथ षोडशोपचारक्रमेण पूजाविधिः

अथ ध्यानम्—एकदन्तं शूर्पकर्णङ्गजवक्त्रञ्चतुर्भुजम् पाशाङ्कुशधरन्देवम्मोदकं बिभ्रतङ्करैः । रक्तपुष्पमयीम्मालाङ्कण्ठे हस्ते परां शुभाम् भक्तानां बरदं सिद्धिबुद्धिभ्यां सेवितं सदा । सिद्धिबुद्धिप्रदं नृणान्धर्मार्थकाममोक्षदम् । ब्रह्मरुद्रहरीन्द्राद्यैस्संस्तुतम्परमर्षिभिः ॥ इति ध्यानम् ॥

अथावाहनम्—आगच्छ जगदाधार सुरासुरवरार्चित ॥ अनाथनाथ सर्वज्ञ गीर्वाणपरिपूजित ॥ इत्यावाहनम् ॥

अथासनम्—स्वर्णसिंहासनन्दिव्यन्नानारत्नसमन्वितम् ॥ समर्पितम्मया देव तत्र त्वं समुपाविश ॥ इत्यासनम् ॥

अथ पाद्यम्—देवदेवेश सर्वेश सर्वतीर्थाहृतञ्जलम् ॥ पाद्यङ्गृहाण गणपते गन्धपुष्पाक्षतैर्युतम् ॥ इति पाद्यम् ॥

अथार्घ्यम्—प्रवालमुक्ताफलपूगरत्नन्ताम्बूलजाम्बूनदमष्टगन्धम् ॥ पुष्पाक्षतायुक्तममोघशक्ते दत्तम्मयार्घ्यं सफलीकुरुष्व ॥ इत्यर्घ्यम् ॥

अथाचमनीयम्—गङ्गादिसर्वतीर्थेभ्यः प्रार्थितन्तोयमुत्तमम् ॥ कर्पूरैलालवङ्गादिवासितं स्वीकुरु प्रभो ॥ इत्याचमनीयम् ॥

सुगन्धिततैलम्—चम्पकाशोकबकुलमालतीमल्लिकादिभिः ॥ वासितं स्निग्धताहेतुन्तैलञ्चारु प्रगृह्यताम् ॥ इति तैलम् ॥

अथ दुग्धस्नानम्—कामधेनुसमुद्भूतं सर्वेषाञ्जीवनम्परम् ॥ पावनं यज्ञहेतुन्ते पयः स्नानार्थमर्पितम् ॥ इति दुग्धस्नानम् ।

अथ दधिस्नानम्—धेनुदुग्धसमुद्भूतं शुद्धं सर्वगतं प्रियम् ॥ मयानीतन्दधि वरं स्नानार्थम्प्रतिगृह्यताम् ॥ इति दधिस्नानम् ॥

अथ घृतस्नानम्—नवनीतसमुत्पन्नं सर्वसन्तोषकारणम् ॥ यथाङ्गदेवताहारङ् घृतं स्नातुं समर्पितम् ॥ इति घृतस्नानम् ॥

अथ मधुस्नानम्—रक्तसारसम्भूतं सर्वतेजोविवर्द्धनम् ॥ सर्वपुष्टिकरन्देव मधु स्नानार्थमर्पितम् ॥ इति मधुस्नानम् ॥

अथ शर्करास्नानम्—इक्षुसारसमुद्भूतां शर्करां सुमनोहराम् ॥ मलापहारिणीं स्नातुङ् गृहाण त्वम्मयार्पिताम् ॥ इति शर्करास्नानम् ॥

अथ गुडस्नानम्—सर्वमाधुर्यताहेतुस्वादुस्सर्वप्रियङ्करः । पुष्टिकृत्स्नातुमानीतं इक्षुसारभवो गुडः ॥ इति गुडस्नानम् ॥

अथ मधुपर्कम्—कांस्ये कांस्येन पिहितो दधिमध्वाज्यपूरितः ॥ मधुपर्को मयानीतः पूजार्थम्प्रतिगृह्यताम् ॥ इति मधुपर्कः ॥

अथ शुद्धोदकस्नानम्—सर्वतीर्थाहृतन्तोयम्मया प्रार्थनया विभो ॥ सुवासितङ्गृहाणेदं सम्यक् स्नातुं सुरेश्वर ॥ इति शुद्धोदकस्नानम् ॥

अथ वस्त्रम्—रक्तवस्त्रयुगन्देव लोकलज्जानिवारणम् ॥ अनर्घ्यमतिसूक्ष्मञ्च गृहाणेदम्मयार्पितम् ॥ इति वस्त्रम् ॥

अथोपवीतम्—राजतम्ब्रह्मसूत्रञ्च काञ्चनं रक्तसंयुतम् ॥ भक्त्योपपादितन्देव गृहाण परमेश्वर ॥ इति यज्ञोपवीतम् ॥

अथ भूषणम्—अनेकरत्नयुक्तानि भूषणानि बहूनि च ॥ तत्तदङ्गे काञ्चनानि योजयामि तवाज्ञया ॥ इति भूषणानि ॥

अथ चन्दनम्—अष्टगन्धसमायुक्तं रक्तचन्दनमुत्तमम् ।। द्वादशाङ्गेषु ते देव लेपयामि कृपाङ्कुरु ।। इति चन्दनम् ।।

अथाक्षताः—रक्तचन्दनसंमिश्रांस्तन्दुलांस्तिलकोपरि ।। शोभायै सम्प्रदास्यामि गृहाण परमेश्वर ।। इत्यक्षताः ।।

अथ पुष्पाणि—पाटलङ्कर्णिकारञ्च बन्धूकं रक्तपङ्कजम् ।। मोगरम्मालतीपुष्पङ्गृहाण सुमनोहरम् ।। इति पुष्पाणि ।।

अथ धूपः—दशांगगुग्गुलन्धूपं सर्वसौगन्ध्यकारकम् ।। सर्वपापक्षयकरन्त्वं गृहाण मयार्पितम् ।। इति धूपः ।।

अथ दीपः—सर्वज्ञ सर्वलोकेश तमोनाशनमुत्तमम् ।। गृहाण मङ्गलन्दीपन्देवदेव नमोऽस्तु ते ।। इति दीपः ।।

अथ नैवेद्यानि—नानापक्वान्नसंयुक्तम्पायसं शर्करान्वितम् ।। नानाव्यञ्जनशोभाढ्यं शाल्योदनमनुत्तमम् ।। दधिदुग्धघृतैर्युक्तं लवङ्गैलासमन्वितम् ।। मरीचिचूर्णसहितक्वथिकावटकान्वितम् ।। राजिकाधान्यसंयुक्तम्मेथीपिष्टं स-तक्रकम् ।। हिङ्गु-जीरक-कूष्माण्ड-म्मरीचि-माष-पिष्टकैः ।। सम्पादितैः सुपक्वैश्च भर्जितैर्वटकैर्युतम् ।। मोदकापूप-लड्डूक-शष्कुली-मण्डका-दिभिः ।। पर्प्पटैरपि संयुक्तन्नैवेद्यममृतान्वितम् हरिद्रा-हिङ्गु-लवणसहितं सूपमुत्तमम् । स सामुद्रङ्गृहाणेदम्भोजनङ्कुरु सादरम् । इति नैवेद्यानि ।।

अथाचमनीयम्—सुतृप्तिकारकन्तोयं सुगन्धञ्च पिवेच्छया । त्वयि तृप्ते जगत्तृप्तन्नित्यतृप्ते महात्मनि । उत्तरापोशनार्थन्ते दद्मि तोयं सुवासितम् । मुखपाणिविशुद्ध्यर्थम्पुनस्तोयन्ददामि ते ।। इत्याचमनीयम् ।।

अथ फलानि—दाडिमम्मधुरन्निम्बु-जम्वाम्र-पनसादिकम् ।। द्राक्षारम्भाफलम्पक्वङ्कर्कन्धूः खार्जुरम्फलम् ।। नारिकेलञ्च नारिङ्गमञ्जिरञ्जम्बिरन्तथा । उर्वारुकञ्च देवेश फलान्येतानि मृह्यताम् ।। इति फलानि ।

अथ साचमनीयङ्करोद्वर्त्तनादिकम्—मुखपाणिविशुद्ध्यर्थम्पुनस्तोयन्ददामि ते ।। गृहाण चन्दनञ्चारु कराङ्गोद्वर्त्तनं शुभम् ।। नाना परिमलद्रव्यैर्निर्मितचूर्णमुत्तमम् ।। सुगन्धिनामकम्पुण्यं गन्धि चारु प्रगृह्यताम् ।। इति करोद्वर्त्तनम् ।।

अथ सिन्दूरम्—चारुशालूरसम्भूतं वंशसारसमुद्भवम् ।। सीमन्त-भूषणञ्चूर्णं लाक्षारञ्जितमस्तु ते ।। इति सिन्दूरम् ।।

अथ ताम्बूलम्—सचन्द्रपूगचूर्णाढ्यङ्काद्यखादिरसंय्युतम् ।। एलाल-वङ्गसंमिश्रन्ताम्बूलङ्केसरान्वितम् ।। इति ताम्बूलम् ।।

अथ द्रव्यम्—न्यूनातिरिक्तपूजायाः सम्पूर्णफलहेतवे ।। दक्षिणा-ङ्काञ्चनीन्देव स्थापयामि तवाग्रतः ।। इति दक्षिणा ।।

अथ माला—सितपीतैस्तथा रक्तैर्जलजैः कुसुमैः शुभैः ।। ग्रथितां सुन्दराम्मालाङ्गृहाण परमेश्वर ।। इति माला ।।

अथ दूर्वाः—हरिताश्श्वेतवर्णा वा पञ्चत्रिपत्रसंय्युताः ।। दूर्वाङ्कुरा मया दत्ता एकविंशतिसम्मिताः ।। इति दूर्वाः ।।

अथ प्रदक्षिणा—एकविंशतिसंख्याकाः कुर्य्यां देव प्रदक्षिणाः ।। पदे पदे ते देवेश नश्यन्तु पातकानि मे ।। इति प्रदक्षिणा ।।

अथारार्त्तिकम्—औदुम्बरे राजते वा कांस्ये काञ्चनसम्भवे ।। पात्रे प्रकल्पितान्दीपान्गृहाण चक्षुरर्णकाम् ।। पञ्चारार्त्तिम्पञ्चदीपर्द्दी-पिताम्परमेश्वरः ।। चारु चन्द्रनिभं दीपङ्गृहाण वीचिवारणम् ।। यथास्वंनेक्ष्यते भस्म तथा पापं विनाशय ।। इत्यारार्त्तिकम् ।।

इति पूजाविधिः

अथ गणेशस्तवराजः

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।। तन्नो दन्तिः प्रचो-दयात् ।। ॐ कारमाद्यम्प्रवहन्ति सन्तो, वाचः श्रुतीनामपि यंङ्गृणन्ति ।। गजाननन्देवगणानताङ्घ्रिम्भजेऽहमर्द्धेन्दुकृतावतंसम् ।। पादारविन्दार्चन-तत्पराणां, संसारदावानलभङ्गदक्षम् ।। निरन्तरन्निर्गतमानतोयैस्तन्नौमि विघ्नेश्वरमम्बुदाभम् ।। कृताङ्गरागन्नवकुङ्कुमेन, मत्तालिजालम्मद-पङ्कलग्नम् ।। निवारयन्तन्निजकर्णतालैः, को विस्मरेत्पुत्रमनङ्गशत्रोः ।। शम्भोर्जटाजूटनिवासिगङ्गाजलं समानीय कराम्बुजेन ।। लीलाभिरा-राच्छिवमर्चयन्तङ्गजाननम्भक्तियुता भजन्ति ।। कुमारभुक्तौ पुनरा-त्महेतोः पयोधरौ पर्वतराजपुत्र्याः ।। प्रक्षालयन्तङ्करशीकरेण मौग्ध्येन तन्नागमुखम्भजामि ।। तया समुद्धृत्य गजस्य हस्तं ये शीकराः पुष्कर-

रन्ध्रमुक्ता: ।। व्योमाङ्गणे विचरन्ति तारा: कालात्मना मौक्तिकतुल्य-भास: ।। क्रीडारते वारिनिधौ गजस्थे वेलामतिक्रामति वारिपूरे ।। कल्पावसानम्परिचिन्त्य देवा: कैलासनाथं श्रुतिभि: स्तुवन्ति ।। नागानने नागकृतोत्तरीये क्रीडारते देवकुमारसङ्घै: ।। त्वयि क्षणङ्कालगतिं विहाय तौ प्रापतु: कन्दुकतामिनेन्दू ।। मदोल्लसत्पञ्चमुखैरजस्रमध्यापयन्तं सकलागमार्थम् ।। देवानृषीन्भक्तजनैकमित्रं हेरम्बमर्कारुणमाश्रयामि ।। पादाम्बुजाभ्यामति वामनाभ्याङ्कृतार्थयन्तंकृपया धरित्रीम् ।। अकारणङ्कारणमाप्तवाचान्तन्नागवक्त्रन्न जहाति चेत: ।। येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या ।। तञ्चन्द्रमौलेस्तनयन्तपोभिराराध्यमानन्दघनम्भजामि ।। पदं श्रुतीनाम पदं स्तुतीनां लीलावतारम्परमात्ममूर्त्ते: ।। नागात्मकं वा पुरुषात्मकं वा त्वमेदमाज्ञाम्भज विघ्नराजम् ।। पाशाङ्कुशौ भग्नरदन्त्वभीष्टङ्करैर्दधानङ्कररन्ध्रमुक्तै: ।। मुक्ताफलाभै: पृथुशीकरौघै: सिञ्चन्तमङ्गं शिवयोर्भजामि ।। अनेकमेकङ्गजमेकदन्तञ्चैतन्यरूपञ्जगदादिबीजम् ।। ब्रह्मेति यं वेदविदो वदन्ति तं शंभुसूनुं सततम्भजामि ।। स्वाङ्कस्थिताया: निजवल्लभाया: मुखाम्बुजालोकनलोलनेत्रम् ।। स्मेराननाब्जम्मदवैभवेन रुद्धम्भजे विश्वविमोहनन्तम् ।। ये पूर्वमाराध्य गजाननन्त्वां सर्वाणि शास्त्राणि पठन्ति तेषाम् ।। त्वत्तो न चान्यत्प्रतिपाद्यमेतैस्तदस्ति चेत्सर्वमसत्यकल्पम् ।। हिरण्यवर्णाञ्जगदीशितारङ्कविम्पुराणं रविमण्डलस्थम् ।। गजाननं यम्प्रविशन्ति सन्तस्तत्कालयोगैस्तमहम्प्रपद्ये ।। वेदान्तगीतम्पुरुषम्भजेऽहमात्मानमानन्दघनं हृदिस्थम् ।। गजाननं यन्महसा जनानां विघ्नान्धकारो विलयम्प्रयाति ।। शम्भोस्समालोक्य जटाकलापे शशाङ्कखण्डन्निजपुष्पकरेण ।। सुभग्नदन्तम्प्रविचिन्त्य मौग्ध्यादाक्रष्टुकाम: श्रियमातनोतु ।। विघ्नार्गलानां विनिपातनार्थं यन्नारिकेलै: कदलीफलाद्यै: ।। प्रसारयन्तम्मदवारणास्यम्प्रभुं सदाभीष्टमहम्भजे यम् ।। यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यङ्गजराजवक्त्रम् ।। स्तुत्याऽनया ये विधिवत्स्तुवन्ति ते सर्वलक्ष्मीनिलया भवन्ति ।। इति गणेशस्तवराज: समाप्त: ।।

अथ कवचम्

ईश्वर उवाच

श्रृणु वक्ष्यामि कवचं सर्वसिद्धिकरम्प्रिये ॥ पठित्वा पाठयित्वा च मुच्यते सर्वसङ्कटात् ॥ अज्ञात्वा कवचन्देवि गणेशस्य मनुञ्जपेत् ॥ सिद्धिर्ना जायते तस्य कल्पकोटिशतैरपि ॥ ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि ॥ सम्मोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः ॥ गणक्रीडश्चक्षुर्युगनासायाङ्गणनायकः ॥ गणक्रीडार्चितः पातु वदने सर्वसिद्धये । जिह्वायां सुमुखः पातु ग्रीवायान्दुर्मुखः सदा । विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि ॥ गणानान्नायकः पातु वाहुयुग्मे सदा मम ॥ विघ्नकर्त्ता च उदरे विघ्नहर्त्ता च लिङ्गके ॥ गजवक्त्रः कटिदेशे एकदन्तो नितम्बके ॥ लम्बोदरः सदा पातु गुह्यदेशे ममारुणः ॥ व्यालयज्ञोपवीती माम्पातु पाद्युगे सदा ॥ जापकः सर्वदा पातु जानुजङ्घे गणाधिपः ॥ हारिद्रः सर्वदा पातु सर्वाङ्गे गणनायकः ॥ य इदम्प्रपठेन्नित्यङ् गणेशस्य महेश्वरि ॥ कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनम् ॥ सर्वसिद्धिकरं साक्षात् सर्वपापविमोचनम् ॥ सर्वसम्पत्प्रदं साक्षात्सर्वशत्रुक्षयङ्करम् ॥ ग्रहपीडा ज्वरा रोगा ये चान्ये गुह्यकादयः ॥ पठनाद्धारणादेव नाशमायान्ति तत्क्षणात् ॥ धनधान्यकरन्देवि कवचं सुरपूजितम् ॥ समो नास्ति महेशानि त्रैलोक्ये कवचस्य च ॥ हारिद्रस्य महेशानि कवचस्य च भूतले ॥ किमन्यैरसदालापैर्यत्रायुर्ययतामियात् ॥

इति विश्वसारतन्त्रे गणेशकवचं समाप्तम् ॥

अथोपनिषत्

ॐ लंस्वाहा नाववतु स्वाहा नौ भुनक्तु स्वाहा वीर्यं करवावहै ॥ तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ ॐ ॥ लंनमस्ते गणपतये ॥ त्वमेव प्रत्यक्षं तत्त्वमसि ॥ त्वमेव केवलं कर्त्तासि ॥ त्वमेव केवलन्धर्त्तासि ॥ त्वमेव केवलं हर्त्तासि । त्वमेवसर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यं ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम, अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात्

अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्द्ध्वात्तात् । अवाधरात्तात् । सर्वतो मामपाहि पाहि समन्तात् । त्वं वाङ्मयः त्वं चिन्मयः । त्वमानन्दमयः त्वं ब्रह्ममयस्त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि । सर्वजगदिदं त्वत्तो जायते । सर्वजगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । त्वं भूमिरापोऽनलोऽनिलोनभः । त्वं चत्वारि वाक्पदानि । त्वं गुणत्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रंयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं-विष्णुस्त्वं रुद्रः त्वमिन्द्र; त्वमग्निः स्वं वायुः त्वं सूर्यः त्वं चन्द्रमा त्वं ब्रह्म भूर्भुवः स्वरोम् । गणादीन् पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् । अनुस्वारः परतरः । अर्द्धेन्दुलसित तारेण रुद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वं रूपम् अकारोमध्यमरूपम् । अनुस्वारश्चान्त्य रूपम् । विन्दुरुत्तर रूपम् । नादः सन्धानम् । संहिता सन्धिः । सैषा गणेश विद्या । गण ऋषिः निचृद्गायत्री छन्दः । गणपतिर्देवता । ऊँ गं गणपतये नमः । एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्तिः प्रचोदयात् ।। एकदन्तं चतुर्हस्तं पाशमंकुशधारिणम् । रदं च वरदं हस्तैः विभ्राणं मूषकध्वजम् । रक्त लम्बोदर शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्तांगं रक्त पुष्पैः सुरपूजितम् । भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।। एवं ध्यायति यो नित्यं स योगी योगिनां वरः । ऊँ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्वोदराय एकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्त्तये नमः । एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते । सर्वविघ्नै र्न वाध्यते । स सर्वतः सुखमेधते । स पंचमहापापात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो अपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्ममर्थं कामं मोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहात् दास्यति स पापीयान् भवति । सहस्रावर्त्तनाद्यं यं काममधीते तं.तमनेन साधयेत् । अनेन गणपतिमभिषिञ्चति स वाग्मीभवति ।

चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति । इत्यथर्वण वाक्यम् । ब्रह्माद्याचरणं विद्यां न विभेति कदाचन इति । यो दूर्वांकुरैः यजति स वैश्रवणोपमो भवति । यो लाजैः यजति स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति स वाञ्छितं फलमवाप्नोति । यः साज्यं समिद्भिः यजति स सर्वं लभते स सर्वं लभते । अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वीभवति । सूर्यग्रहे महा नद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते । स सर्वविद् भवति स सर्वविद्भवति । यः एवं वेद । इत्युपनिषत् ।

सह नाववतु सह नौ भुनक्तु सह वीर्यं क.रवावहै, तेजस्विनावधीतमस्तु मा विद्विषावहै ।।

ओं शान्तिः शान्तिः शान्तिः ।। इति गणपत्युपनिषतु ।।

अथ शतनाम

ओं गणेश्वरो गणक्रीडो महागणपतिस्तथा ।
विश्वकर्त्ता विश्वमुखो दुर्जयो धूर्जयो जयः ।।1।।
सुरूपः सर्वनेत्राधिवासरे वीरासनाश्रयः ।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः ।।2।।
चित्रांकः श्यामदशनो भालचन्द्रश्चतुर्भुजः ।
शम्भुतेजा यज्ञकायः सर्वात्मा सामबृंहितः ।।3।।
कुलाचलांसो व्योमनाभिः कल्पद्रुमवनालयः ।
निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भजः ।।4।।
पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः ।
सर्वावयवसम्पूर्णः सर्व लक्षण लक्षितः ।।5।।
इक्षुचापधरः शूली कान्तिकन्दलिताश्रयः ।
अक्षमालाधरो ज्ञानमुद्रावान् विजयावहः ।।6।।
कामिनी कामनः काममालिनी केलिलालितः ।
अमोघसिद्धिराधारः आधाराधेय वर्जितः ।।7।।

इन्दीवरदलश्याम: इन्दुमण्डल निर्मल: ।
कर्मसाक्षी कर्मकर्त्ता कर्माकर्मफलप्रद: ।।8।।
कमण्डलुधर: कल्प: कपर्दी कटिसूत्रभृत् ।
कारुण्यदेह: कपिलो गुह्यागमनिरूपित: ।।9।।
गुहाशयो गुहाब्धिस्थो घट कुम्भो घटोदर: ।
पूर्णानन्द: परानन्दो धनदो धरणीधर: ।।10।।
वृहत्तमो ब्रह्मपुरो ब्रह्मण्यो ब्रह्मवित् प्रिय: ।
भव्यो भूतालयो भोगदाता चैव महामना: ।।11।।
वरेण्यो वामदेवश्च वन्द्यो वज्रनिवारण: ।
विश्वकर्त्ता विश्वचक्षु: हवनं हव्यकव्यभुक् ।।12।।
स्वतन्त्र: सत्यसंकल्प: तथा सौभाग्य वर्द्धन: ।
कीर्त्तिद: शोकहारी च त्रिवर्गफलदायक: ।।13।।
चतुर्बाहु: चतुर्दन्तश्चतुर्थीतिथि सम्भव: ।
सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात् ।।14।।
कामरूप: कामगति: द्विरदो द्वीप रक्षक: ।
क्षेत्राधिप: क्षमाभर्त्ता लयस्थो लड्डुकप्रिय: ।।15।।
प्रतिवादि मुखस्तम्भो दुष्टचित्तप्रसादन: ।
भगवान् भक्तिसुलभो याज्ञिको याजकप्रिय: ।।16।।
इत्येवं देवदेवस्य गणराजस्य धीमत: ।
शतमष्टोत्तरनाम्नां सारभूतं प्रकीर्तितम् ।।17।।
सहस्रनाम्नामाकृष्यमयाप्रोक्तं मनोहरम् ।
ब्राह्मे मुहूर्ते चोत्थाय स्मृत्वा देवंगणेश्वरं ।।18।।
पठेत् स्तोत्रमिदं भक्त्या गणराज: प्रसीदति ।।
इति गणेशस्याष्टोत्तरशत नाम स्तोत्रम् ।

———————


10 अथ सूर्यतन्त्रम्

श्री सूर्यध्यानम्

भास्वद्रत्नाढ्य मौलि: स्फुरदधररुचा रञ्जितश्चारु केशो ।
भास्वान्यो दिव्यतेजा: कर कमलयुत: स्वर्णवर्ण प्रभाभि: ।
विश्वाकाशावकाशो ग्रहगणसहितो भाति यश्चोदयाद्रौ ।
सर्वानन्दप्रदाता हरिहर नमित: पातु मां विश्वचक्षु: ।।

अथ यन्त्रोद्धार:

पूर्वमष्ट दलं पद्मं प्रणवादि प्रतिष्ठितम् ।
माया बीजं दलाष्टाग्रे यन्त्रमुद्धारयेदिति ।
आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ।
मार्तण्डं तपनं चेति दलेष्वष्टसु योजयेत ।
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ।
अमोघा विद्युता चेति मध्ये श्री: सर्वतोमुखी ।



अथ मन्त्रोद्धार:

तारो घृणिर्भृगु: पश्चाद्वामकर्णविभूषित: ।। वह्न्यासनो मरुच्छेष: सनेत्रोदित्यपश्चिम: ।। अष्टाक्षरो मनु प्रोक्तो भानोरभिमत: पर: ।।

अथ मन्त्र:

ॐ घृणि: सूर्य: आदित्य: ।

अथ पूजाविधि:

प्रात:कृत्यादि प्राणायामान्तं विधाय पीठन्यासङ्कुर्यात् ।। तत्र विशेष: ।। हृदयस्य पूर्वादिदिक्षु मध्ये च प्रभूतं विमलं सारं समाराध्यम्पर-सुखं विन्यस्याधारशक्त्यादि असूर्यमण्डलाय दशकलात्मनेनम: इत्यन्तं विन्यसेत् ।। तथा च निवन्धे ।। पीठे च क्लृप्ते प्रथमन्दिक्षु मध्ये च संयजेत् ।। प्रभूतं विमलं सारं समाराध्यमनन्तरम् ।। परमादिसुखम्पीठं स्वविम्वान्तम्प्रकल्पयेत् ।। तत: केसरेषु मध्ये च ।। रांदीप्तायैनम: ।। एवं रींसूक्ष्मायै०, रूंजयायै०, रैंभद्रायै०, वैंविभूत्यै०, वोंविमलायै०, वौअ-मोघायै०, रंविद्युतायै०, द:सर्वतोमुख्यै० ।। तथा च निवन्धे ।। दीप्ता सूक्ष्या जया भद्रा विभूतिर्विमला पुन: ।। अमोघा विद्युता सर्वतोमुखी पीठशक्तय: ।। दीप्तदीपशिखाकाराबीजान्यासां विदु: क्रमात् ।। अक्लीवह्ल-स्वत्रितयस्वरान् बिन्द्वग्निसंयुतान् ।। ॐ तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नम: ।। तथा च शारदायाम् ।। वदेत्पदञ्चतुर्थ्यन्तम्ब्रह्म-विष्णुशिवात्मकम् ।। सौराय योगपीठाय नम: पदमनन्तरम् ।। पीठमन्त्रोऽय-माख्यातो दिनेशस्य जगत्पते: ।।

तत: ऋष्यादिन्यास: ।। शिरसि देवभागऋषयेनम: ।। मुखे गायत्री-छन्दसेनम: ।। हृदि आदित्याय देवतायैनम: ।। तथा च निवन्धे ।। देवभागो मुनि: प्रोक्तो गायत्रीछन्द ईरितम् ।। आदित्यो देवता प्रोक्ता दृष्टादृष्टफल-प्रदा ।।

तत: कराङ्गन्यासौ ।। सत्याय तेजोज्वालामणे हुंफट् स्वाहा अगुष्ठाभ्यां नम: एवं ब्रह्मणेतेजो ज्वालामणे तर्जनीभ्यां स्वाहा । विष्णवे ते० मध्यमाभ्यां । रुद्राय ते० अनामिकाभ्यां हुम् । अग्नये ते० कनिष्ठाभ्यां वौषट् । सर्वाय वषट् । ते०करतलकरपृष्ठाभ्यां फट् ।। एवं हृदयादिषु ।। तथा च शारदायाम् ।।

सत्याय हृदयम्प्रोक्तम्ब्रह्मणे शिर ईरितम् ।। विष्णवे स्याच्छिखा वर्म्म रुद्राय परिकीर्त्तितम् ।। अग्नये नेत्रमाख्यातं सर्वायास्त्रमुदाहृतम् ।। तेजोज्वालामणे हुंफट् द्विठान्ता: परिकीर्त्तिता: ।।

ततो मूर्त्तिन्यास: ।। यथा ।। ॐ शिरसि आदित्यायनम: ।। एवं मुखे एंरवये०, हृदये उंभानवे०, गुह्ये इंभास्कराय, चरणयो: अंसूर्य्याय० ।। तथा च निबन्धे ।। आदित्यं विन्यसेन्मूर्ध्नि रविम्मुखगतंन्यसेत् ।। हृदयं भानुनामानम्भास्करङ्गुह्यदेशत: ।। सूर्यञ्चरणयोर्न्यस्य वर्णै: सत्यादिपञ्चभि: ।।

ततो न्यास: ।। शिरसि ॐ नम:, आस्ये ॐ घृंनम:, कण्ठे ॐ णिनम:, हृदि ॐ सूनम:, कुक्षौ ॐ र्यनम:, नाभौ ॐ आनम:, लिङ्गे ॐ दि नम:, पादयो: ॐ त्य नम: ।। तथा च ॐ मूर्द्धाऽऽस्यकण्ठ-हृदय-कुक्षि-नाभि-ध्वजाङ्घ्रिषु ।। मन्त्रवर्णान्न्यसेदष्टौ प्रत्येकम्प्रणवादिकम् ।।

ततो ध्यानम् ।। रक्ताब्जयुग्माभयदानहस्तङ्केयूरहाराङ्गदकुण्डलाढ्यम् ।। माणिक्यमौलिन्दिननाथमीडे वन्धूक कान्ति विलसत्त्रिनेत्रम् ।। एवन्ध्यात्वा मानसै: सम्पूज्य कुम्भस्थापनङ्कुर्य्यात् ।। ततो गुरुपङ्क्तपूजाङ्कृत्वा पीठपूजाङ्कुर्य्यात् ।। ॐ खंखखोल्कायनम: इतिमन्त्रेण मूर्ति सङ्कल्प्य पुनर्ध्यात्वाऽऽवाहनादिपुष्पांजलिदानपर्य्यन्तं विधायाऽऽवरणपूजामारभेत् ।। तथा च निबन्धे ।। तारादिखंखखोल्काय मनुना मूर्त्तिकल्पना ।। साक्षिणं सर्वलोकानान्तस्यामावाह्य पूजयेत् ।। केसरेष्वग्न्यादिकोणे मध्ये दिक्षु च सत्याय तेजोज्वालामणि हुंफट्स्वाहा हृदयायनम: एवं ब्रह्मणे० शिरसेस्वाहा । विष्णवे० शिखायैवषट् । रुद्राय० कवचायहुम् । अग्नये० नेत्रत्रयायवौषट् । सर्वाय० अस्त्रायफट् ।। दिक्पत्रेषु पूर्वादिषु ॐ आदित्यायनम: एवं एं रवये० उं भानवे० दं भास्कराय० विदिक्पत्रेषु अग्न्यादि ॐ उषायै० एवं प्रं प्रज्ञायै०. पम्प्रभायै०. संसन्ध्यायै० ।। तथा च ।। अङ्गानि पूजयेदादौ दिक्पत्रे सूर्यमूर्त्तय: ।। आदित्याद्यश्चतस्रोऽर्च्या: शक्तय: कोणपत्रगा: ।। स्वस्वनामादिवर्णा: स्युस्तासाम्बीजान्यनुक्रमात् ।। उषा-प्रज्ञा-प्रभा-सन्ध्या: शक्तय: परिकीर्त्तिता: ।। तत: पत्रेषु ब्राह्म्याद्या: पुरतोऽहणम-

र्चयेत् ॥ तथा च शारदायाम् ॥ पत्राग्रसंस्था ब्रह्म्याद्याः पुरतोऽरुणमर्चये-
दिति ॥ तद्बाह्ये पूर्वादिचन्द्रादीन्पूजयेत् ॥ ॐ चन्द्रायनमः, ॐ मङ्ग-
लायनमः, एवं बुधाय०, बृहस्पतये०, शुक्राय०, शनैश्चराय०, राहवे०,
केतवेनमः ॥ तथा च शारदायाम् ॥ चन्द्रादीन्वज्राद्रादींश्च सम्पूज्य धूपादि-
विसर्जनान्तङ्कर्म समापयेत् ॥ अस्य पुरश्चरणमष्टलक्षजपः ॥ तथा च ॥
वसुलक्षञ्जपेन्मन्त्रमाज्येन च दशांशतः ॥ तिलैर्वा मधुरासिक्तैर्जुहुयाद्वि-
जितेन्द्रियः ॥ इति पूजा ।

अथ स्तोत्रम्

वसिष्ठ उवाच ॥

स्तुवंस्तत्र ततः साम्बः कृशोधर्मनिसन्ततः ॥
राजन्नाम सहस्रेण सहस्रांशुन्दिवाकरम् ॥
विद्यमानन्तु तन्दृष्ट्वा सूर्यः कृष्णात्मजन्तदा ॥
स्वप्ने तु दर्शनन्दत्वा पुनर्वचनमब्रवीत् ॥

श्रीसूर्य्य उवाच ॥

साम्ब साम्ब महाबाहो शृणु जाम्बवतीसुत ।
अलन्नाम सहस्रेण पठस्वेमं स्तवं शुभम् ॥
यानि नामानि गुह्यानि पवित्राणि शुभानि च ॥
तानि ते कीर्त्तयिष्यामि श्रुत्वा वत्सावधानतः ॥
विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः ॥
लोकप्रकाशकः श्रीमांल्लोकचक्षुर्ग्रहेश्वरः ॥
लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ॥
तपनस्तापसश्चैव शुचिः सप्ताश्ववाहनः ॥
गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः ॥
एकविंशतिरित्येष स्तव इष्टः सदा मम ॥
श्रीरारोग्यकरश्चैव धनवृद्धियशस्करः ॥
स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः ॥
य एतेन महाबाहो द्वे सन्ध्ये स्तवनोदये ॥
स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते ॥

कायिकं वाचिकञ्चैव मानसं यच्च दुष्कृतम् ।।
एष जाप्येन तत्सर्व्वम्प्रणश्यति न संशयः ।।
एष जप्यश्च होमश्च सन्ध्योपासनमेव च ।।
बलिमन्त्रोऽर्घ्यमन्त्रश्च धूपमन्त्रस्तथैव च ।।
अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे ।।
पूजितोऽयम्महामन्त्रः सर्वपापहरः शुभः ।।
एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः ।।
आमन्त्र्य कृष्णतनयन्तत्रैवान्तरधीयत ।।
साम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् ।।
पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ।।
इति साम्वपुराणें सूर्य्यस्तवः सम्पूर्णः ।।

अथ कवचम्

श्रीसूर्य्य उवाच ।।

साम्व साम्व महाबाहो श्रृणु मे कवचं शुभम् ।।
त्रैलोक्यमङ्गलन्नाम कवचम्परमाद्भुतम् ।।
यज्ज्ञात्वा मन्त्रवित्सम्यक्फलमाप्नोति निश्चितम् ।।
यद्धृत्वा च महादेवो गणानामधिपोऽभवत् ।।
पठनाद्धारणाद्विष्णुः सर्वेषाम्पालकः सदा ।।
एवमिन्द्रादयः सर्वे सर्वैश्वर्य्यमवाप्नुयुः ।।
कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतम् ।।
श्रीसूर्य्यो देवता चात्र सर्वदेवनमस्कृतः ।।
आरोग्ययशोमोक्षेषु विनियोगः प्रकीर्त्तितः ।।
प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम् ।।
सूर्योऽव्यान्नयनद्वन्द्वमादित्यः कर्णयुग्मकम् ।।
अष्टाक्षरो महामन्त्रः सर्वाभीष्टफलप्रदः ।।
ह्रींबीजम्मे मुखम्पातु हृदयम्भुवनेश्वरी ।।
चन्द्रबीजं विसर्गाढ्यम्पातु मे गुह्यदेशकम् ।।
अक्षरोऽसौ महामन्त्रः सर्वतन्त्रेषु गोपितः ।।

शिवोवह्निसमायुक्तो वामाक्षिविन्दुभूषितः ।।
एकाक्षरो महामन्त्रः श्रीसूर्यस्य प्रकीर्त्तितः ।।
गुह्याद्गुह्यतरो मन्त्रो वाञ्छाचिन्तामणिः स्मृतः ।।
शीर्षादिपादपर्यन्तं सदा पातु मनूत्तमः ।।
इति ते कथितन्दिव्यन्त्रिषु लोकेषु दुर्लभम् ।।
श्रीप्रदङ्कान्तिदन्नित्यन्धनारोग्यविवर्द्धनम् ।।
कुष्ठाधिरोगशमनम्महाव्याधिविनाशनम् ।।
त्रिसन्ध्यं यः पठेन्नित्यमरोगी वलवान्भवेत् ।।
वहुना किमिहोक्तेन यद्यन्मनसि वर्त्तते ।।
तत्तत्सर्वम्भवत्येव कवचस्य च धारणात् ।।
भूतप्रेत-पिशाचाश्च यक्ष-गन्धर्व-राक्षसाः ।।
व्रह्म-राक्षस-वेताला नैव द्रष्टुमपि क्षमाः ।।
दूरादेव पलायन्ते तस्य सङ्कीर्त्तनादपि ।।
भूर्ज्जपत्रे समालिख्य रोचनागुरुकुङ्कुमैः ।।
रविवारे च सङ्क्रान्त्यां सप्तम्याञ्च विशेषतः ।।
धारयेत्साधकश्रेष्ठस्त्रैलोक्यविजयी भवेत् ।।
त्रिलोहमध्यगङ्कृत्वा धारयेद्दक्षिणे भुजे ।।
शिखायामथवा कण्ठे सोऽपि सूर्य्यो न संशयः ।।
इति ते कथितं साम्व त्रैलोक्यमङ्गलाभिधम् ।।
कवचन्दुर्ल्लभं लोके तव स्नेहात्प्रकाशितम् ।।
अज्ञात्वा कवचन्दिव्यं यो जपेत्सूर्यमुत्तमम् ।।
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ।।18।।
इति व्रह्मयामले त्रैलोक्यमङ्गलं नाम श्रीसूर्य्यकवचं सम्पूर्णम् ।

अथ आदित्य हृदयम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।।
रावणञ्चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ।।1।।
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।।
उपगम्याव्रवीद्राममगस्त्यो भगवांस्तदा ।।2।।

राम राम महावाहो श्रृणु गुह्यं सनातनम् ।।
येन सर्वानरीन्वत्स समरे विजयिष्यसे ।।3।।
आदित्यहृदयम्पुण्यं सर्वशत्रुविनाशनम् ।।
जयावहञ्जपन्नित्यमक्षम्यपरमं शिवम् ।।4।।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।।
चिन्ताशोकप्रशमनमायुर्वर्द्धनमुत्तमम् ।।5।।
रश्मिमन्तं समुद्यन्तन्देवासुरनमस्कृतम् ।।
पूजयस्व विवस्वन्तम्भास्करम्भुवनेश्वरम् ।।6।।
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावन: ।।
एष देवासुरगणांन्लोकान् पाति गभस्तिभि: ।।7।।
एष ब्रह्मा च विष्णुश्च शिव: स्कन्द: प्रजापति: ।।
महेन्द्रो धनद: कालो यम: सोमो ह्यपाम्पति: ।। 8।।
पितरो वसव: साध्या अश्विनौ मरुतो मनु: ।।
वायुर्वह्नि: प्रजा: प्राण, ऋतुकर्ताप्रभाकर: ।।9।।
आदित्य: सविता सूर्य: खगपूषा गभस्तिमान् ।
सुवर्ण सदृशो भानुर्हिरण्यरेता दिवाकर: ।।10।।
हरिदश्व: सहस्राचि सप्तसप्ति: मरीचिमान् ।
तिमिरोन्मथन: शम्भुस्त्वष्टा मार्त्तण्डकोऽंशुमान् ।।11।।
हिरण्यगर्भ: शिशिरस्तपनोऽहस्करो रवि: ।
अग्निगर्भोऽदिते: पुत्र: शंख: शिशिरनाशन: ।।12।।
व्योमनाथस्तमोभदी ऋग्यजु: सामपारग: ।
घनवृष्टि रपाम्मित्रो विन्ध्यवीथी प्लवंगम: ।।13।।
आतपी मण्डली मृत्यु: पिंगल: सर्वतापन: ।
कविर्विश्वो महा तेजो रक्त: सर्व भवोद्भव: ।।14।।
नक्षत्र ग्रह ताराणामधिपो विश्वभावन: ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तुते ।।15।।
नम: पूर्वाय गिरये पश्चिमायाद्रये नम: ।
ज्योतिर्गणानाम्पतये दिनाधिपतये नम: ।।16।।

जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ।।17।।
नमः उग्राय वीराय सारंगाय नमो नमः ।
नमः पद्म प्रबोधाय प्रचण्डाय नमोऽस्तु ते ।।18।।
ब्रह्मेशानाच्युतेशाय सुरायाऽऽदित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ।।19।।
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषाम्पतये नमः ।।20।।
तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ।।21।।
नाशयत्येष वै भूतन्तमेव भूतन्तमेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ।।22।।
एष सुप्तेषु जागर्त्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रञ्च फलञ्चैवाग्निहोत्रिणाम् ।।23।।
देवाश्च क्रतवश्चैव क्रतूनाम् फलमेव च ।
यानि कृत्यानि लोकेषु सर्वेषु परम प्रभुः ।।24।।
एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्त्तयन् पुरुषः नावसीदति राघव ।।25।।
पूजयस्वैन मेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसे ।।26।।
अस्मिन् क्षणे महावाहो रावणं त्वं जयिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ।।27।।
एवं तच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ।।28।।

आदित्यं वीक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ।।29।।
रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागतम् ।
सर्वयत्नेन महतावृतस्तस्य वधेऽभवत् ।।30।।
अथ रविरवदन् निरीक्ष्यरामं
मुदितमनाः परमं हृष्यमाणः ।
निशिचर पतिसंक्षयं विदित्वा
सुरगण मध्यगतो वचस्त्वरेति ।।
इति वाल्मीकीये श्रीमद्रामायणे आदित्य हृदय स्तोत्रम् ।।

---


11 अथ विष्णुतन्त्रम्

अथ विष्णुध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघ-वर्णं शुभांगम् । लक्ष्मीकान्तं कमलनयन योगिभिः ध्यानगम्यभ्वन्दे विष्णुं भवभयहरं सर्व लोकैक नाथम् ।।

अथ यन्त्रोद्धारः

अमुक्तकल्पे यन्त्रन्तु लिखेत पद्म दलाष्टकम् षट्कोणं कर्णिकं तत्र वेद-द्वारोपशोभितम् ।।



अथ मन्त्रोद्धारः

स-चतुर्थीनमोऽन्तैश्च नामभिर्विन्यसेत्सुधीः ।। तारन्नमः पदम्ब्रूयान्नरौ दीर्घसमन्वितौ ।। यवर्णो णायमन्त्रोऽयम्प्रोक्तो वस्वक्षरः परः ।।



RADHA KRISHAN

Subhash Picture Publisher
4416, Nai Sarak, Delhi-6.

अथ मन्त्रः

ओं नमो नारायणाय ।

अथ पूजाप्रयोगः

प्रातः कृत्यादि मातृकान्यासान्तंकर्म्म विधाय केशवकृत्यादिन्यासं-कुर्य्यात् ।। अथ ऋष्यादिन्यासः ।। शिरसि प्रजापतयेऋषयेनमः ।। मुखे गायत्रीछन्दसेनमः ।। हृदि अर्द्धलक्ष्मीहरये देवतायै नमः ।। ततः कराङ्ग-न्यासौ ।। श्रीं अङ्गुष्ठाभ्यान्नमः इत्यादि ।। तथा च गौतमीये ।। ऋषिः प्रजापतिश्छन्दो गायत्री देवता पुनः ।। अर्द्धलक्ष्मीहरिः प्रोक्तः श्रींबीजेनाङ्ग-कल्पनेति ।। ततो ध्यानम् ।। उद्यत्प्रद्योतनशतरुचिन्तप्तहेमावदातम्पार्श्व-द्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ।। नानारत्नोल्लसितविविधा-कल्पमापीतवस्त्रं विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ।। एवं-ध्यात्वा न्यसेत् ।। वर्णान्मुक्त्वा सार्द्धचन्द्रानिति दर्शनात् । अंकेशवकृत्यैनमो ललाटे ।। आंनारायणायकान्त्यैनमो मुखे ।। इंमाधवायपुष्ट्यैनमो दक्षनेत्रे ।। ईंगोविन्दायपुष्ट्यैनमो वामनेत्रे ।। नमः सर्वत्र ।। उंविष्णवेधृत्यै० दक्ष-कर्णे ।। ऊंमधुसूदनायशान्त्यै० वामकर्णे । ऋंत्रिविक्रमायक्रियायै० दक्षना-सापुटे ।। ॠंवामनायदेव्यायै० वामनासापुटे । लृंश्रीधरायमेधायै० दक्ष-गण्डे । ॡंहृषीकेशायदुर्गायै० वामगण्डे । एंपद्मनाभायश्रद्धायै० ओष्ठे । ऐंदामोदरायलज्जायै० अधरे । ओंवासुदेवायलक्ष्म्यै० ऊर्ध्वदन्तपङ्क्तौ ।। औं सङ्कर्षणायसरस्वत्यै० अधोदन्तपङ्क्तौ । अंप्रद्युम्नायधृत्यै मस्तके । अः अनिरुद्धायरत्यै० मुखे । कंचक्रिणेजयायै०, खंगदिनेदुर्गायै०, गंशार्ङ्गिणे-प्रभायै०, घंखड्गिनेसत्यायै०, ङंशङ्खिनेचन्द्रायै० दक्षकरमूलसन्ध्यग्रकेषु ।। चंहलिनेवाण्यै०, छंमुसलिने विलासिन्यै०, जंशूलिनेविजयायै०, झंपाशिने-विरजायै०, अंअङ्कुशिनेविम्वायै० वामकरमूलसन्ध्यग्रकेषु ।। टंमुकुन्दाय विनदायै०, ठंनन्दजाय सुनन्दायै०, डंनन्दिनेस्मृत्यै०, ढंनरायऋद्ध्यै०, णंनरकजितेसमृद्ध्यै० दक्षपादमूलसन्ध्यग्रकेषु ।। तंहरयेशुद्ध्यै०, थंकृष्णायवृद्ध्यै०, दंसत्यायभूम्यै०, धंसात्वतायमत्यै० नंसौराष्ट्राय-क्षमायै० वामपादमूलसन्ध्यग्रकेषु ।। पंशराय रमायै० दक्षपार्श्वे ।। फंजनार्द-नाय उमायै० वामपार्श्वे । बंभूधराय क्लेदिन्यै० पृष्ठे । भंविश्वमूर्त्तये

क्लिन्नायै० नाभौ । मंवैकुण्ठायवसुदायै० उदरे । यंत्वगात्मने पुरुषोत्तमाय वसुधायै० हृदि । रंअसृगात्मनेवलिनेपरायै० दक्षांसे । लंमांसात्मनेवालानुजाय-परायणायै० ककुदि । वंमदआत्मनेवलायसूक्ष्मायै० वामांसे । शंअस्थ्यात्मने-वृषघ्नायसंधायै० हृदादिदक्षकरे । षंमज्जात्मनेवृषायप्रज्ञायै० हृदादिवामकरे । संशुक्लात्मनेहंसायप्रभायै० हृदादिदक्षपादे । हंप्राणात्मनेवराहायनिशायै० हृदादिवामपादे । लंजीवात्मनेविमलायअमोघायै० हृदाद्युदरे । क्षंक्रोधात्मने नृसिंहायविद्युतायै० हृदादिमुखे ॥ तथा च गौतमीये ॥ केशवादिरयंन्यासो न्यास-मात्रेण देहिनाम् ॥ अच्युतत्वन्ददात्येव सत्यं सत्यन्न संशयः ॥ मातृकार्णं समुच्चार्य्य केशवाय इति स्मरेत् ॥ कीर्त्यै च नमसायुक्त-मित्यादि न्यासमाचरेत् ॥ केशवाय ततः कीर्त्यै कान्त्यै नारायणाय च ॥ इत्याद्यगस्त्यसंहितावचनाच्चायं क्रमः ॥ न तु केशवकीर्तिभ्याम् इत्यादि ॥ तथा भुक्तिमुक्तिमिच्छता ऽयन्न्यासः कर्त्तव्यः श्रीबीजादि ॥ यथा—॥ श्रीं अं केशवायकीर्त्यैनम इत्यादि ॥ अथोपचारक्रमेण पूजा ॥ अथावाहनम् ॥ यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये ॥ कृपया देवदेवेश मदग्रे सन्निधोभव ॥ यस्य ते परमेशान स्वागतं स्वागतम्प्रभो ॥ कृतार्थोऽनु-गृहीतोऽसि सफलञ्जीवनम्मम ॥ यदागतोऽसि देवेश चिदानन्दमयाव्यय ॥ अज्ञानाद्वा प्रमादाद्वा वैकल्पात्साधकस्य च ॥ यदपूर्णम्भवेत्कृत्यन्तथाप्य-भिमुखोभव ॥ इत्यावाहनम् ॥ अथ पाद्यम् ॥ यद्भक्तिलेशसम्पर्कात्परमा-नन्दसम्भवः ॥ तस्मै ते परमेशान पाद्यं शुद्धाय कल्पये ॥ इति पाद्यम् ॥ अथाचमनम् ॥ देवानामपि देवाय देवानान्दैवताय च ॥ आचामङ्कल्पयामीश स्वधया शुद्धिहेतवे ॥ इत्याचमनम् ॥ अथार्घ्यम् ॥ तापत्रयहरंदिव्यम्परमा-नन्दलक्षणम् ॥ तापत्रयविमोक्षाय तवार्घ्यङ्कल्पयाम्यहम् ॥ इत्यर्घ्यम् ॥ अथ मधुपर्कम ॥ सर्वकालुष्यहीनाय परिपूर्णसुधात्मकम् ॥ मधुपर्कमिमन्देव कल्पयामि प्रसीद मे ॥ इति मधुपर्कम् ॥ अथ पुनराचमनीयम् ॥ उच्छिष्टो-प्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनराचमन-न्त्विदम् ॥ इति पुनराचमनीयम् ॥ अथाभ्यङ्गम् ॥ गन्धतैलंगृहीत्वा पठेत् । स्नेहं गृहाण स्नेहेन लोकनाथ महाशय ॥ सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम् ॥ इत्यभ्यङ्गम् ॥ अथ स्नानम् ॥ ओं सहस्रशीर्षा पुरुषः

सहस्राक्ष: सहस्रपात् ॥ स भूमिं सर्वतस्स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ 1 ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ॥ 2 ॥ एतावानस्य महिमातो ज्यायांश्च पूरुष: ॥ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ 3 ॥ त्रिपादूर्ध्व उदैत्पुरुष: पादोऽस्येहाभवत्पुन: ॥ ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥4॥ ततो विराडजायत विराजो अधि पूरुष: ॥ स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुर: ॥ 5 ॥ तस्माद्यज्ञात्सर्वहुत: सम्भृतम्पृषदाज्यम् ॥ पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥6॥ तस्माद्यज्ञात्सर्वहुत ऋच: सामानि जज्ञिरे ॥ छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥7। तस्मादश्वा अजायन्त ये के चोभयादत: ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावय: ॥8॥ तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रत: ॥ तेन देवा अयजन्त साद्धया ऽऋषयश्च ये ॥9॥ यत्पुरुषं व्यदधु: कतिधा व्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा उच्येते ॥10॥ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य: कृत: ॥ ऊरू तदस्य यद्वैश्य: पद्भ्यां शूद्रो अजायत ॥11॥ चन्द्रमा मनसो जातश्चक्षो: सूर्यो अजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥12॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौ: समवर्त्तत ॥ पद्भ्यामभूमिर्दिश: श्रोत्रात्तथा लोकां 2 अकल्पयन् ॥13॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥ वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्म: शरद्धवि: ॥14॥ सप्तास्यासन्परिधयस्त्रि: सप्त समिध: कृत: ॥ देवा यद्यज्ञन्तन्वाना अवघ्नन पुरुषम्पशुम् ॥14॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकम्महिमान: सचन्त यत्र पूर्वे साध्या: सन्ति देवा: ॥16॥ अथ तान्त्रिकमन्त्रा ॥ परमानन्दबोधाब्धिनिमग्ननिजमूर्त्तये ॥ साङ्गोपाङ्गमिदं स्नानङ्कल्पयाम्यहमीश ते ॥ इति स्नानम् ॥ अथ वास: ॥ मायां विना न ते जन्म निजगूहोरुतेजसे ॥ निरावरणविज्ञाय वासस्ते कल्पयाम्यहम् ॥ इति वास: ॥ यमाश्रित्य महामाया जगत्संमोहिनी तु सा ॥ तस्मै ते परमेशान कल्पयाम्युत्तरीयकम् ॥ अथ यज्ञसूत्रम् ॥ यस्य शक्तित्रयेणेदं सम्प्रोक्तमखिलञ्जगत् ॥ यज्ञसूत्राय तस्मै ते यज्ञसूत्रम्प्रकल्पयेत् ॥ इति यज्ञसूत्रम् ॥ अथ भूषणम् ॥ स्वभाव-

सुन्दराङ्गाय सत्यासत्याश्रयाय ते ।। भूषणानि विचित्राणि कल्पयामि सुरार्चित ।। इति भूषणम् ।। अथ जलम् ।। समस्तदेवदेवेश सर्वतृप्तिकरम्परम् ।। अखण्डानन्दसम्पूर्णङ्गृहाण जलमुत्तमम् ।। इति जलम् ।। अथ गन्धम् ।। परमानन्दसौरभ्यपरिपूर्णदिगन्तरम् ।। गृहाण परमङ्गन्धं कृपया परमेश्वर ।। इति गन्धम् ।। अथ पुष्पम् ।। तुरीयगुणसम्पन्न-नानागुण-मनोहरम् ।। आनन्दसौरभम्पुष्पं गृह्यतामिदमुत्तमम् ।। इति पुष्पम् ।। अथ धूपः ।। वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः ।। आघ्रेयः सर्वदेवानान्धूपोऽयम्प्रतिगृह्यताम् ।। इति धूपः ।। अथ दीपः ।। सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ।। सबाह्याभ्यन्तरज्योतिर्दीपोयम्प्रतिगृह्यताम् ।। इति दीपः ।। अथ नैवेद्यम् ।। सत्पात्रसिद्धं स-हविर्विविधानेकभक्षणम् ।। निवेदयामि देवेश सानुगाय गृहाण तत् ।। इति नैवेद्यम् ।। अथाचमनार्थंजलम् ।। समस्तदेवदेवेश सर्वज्ञप्तिकरम्परम् ।। अखण्डानन्दसम्पूर्ण गृहाण जलमुत्तमम् ।। इति जलम् ।। अथ ताम्बूलम् ।। ताम्बूलञ्च वरन्दिव्यङ्कर्पूरादि सुवासितम् ।। मया निवेदितम्भक्त्या गृहाण परमेश्वर ।। इति ताम्बूलम् ।। इति पूजा ।।

अथ स्तोत्रम्

आदाय वेदान्सकलान्समुद्रान्निहत्य चोन्मथ्य मधुं ह्युदग्रम् ।। दत्ता पुरा येन पितामहाय विष्णुन्तमाद्यम्भज मत्स्यरूपम् ।।1।। दिव्यामृतार्थम्मथिते महाब्धौ देवासुरैर्वासुकिमन्दराभ्याम् ।। भूमेर्महावेगविघूर्णितायान्तं कूर्ममाधारगतन्नमामि ।।2।। समुद्रकाञ्चीसरिदुत्तरीया वसुन्धरामेरुकिरीट-भारा ।। दंष्ट्रागतो येन समुद्धृताऽभूत्तमादिकोलं शरणम्प्रपद्ये ।।3।। भक्तार्त्तिभङ्गक्षमयाधिपाय स्तम्भान्तरालादुदितो नृसिंहः ।। रिपुं सुराणान्निशितैर्नखाग्रैर्विदारयन्तन्न च विस्मरामि ।।4।। चतुस्समुद्राभरणाधरित्रीन्यासाय नालञ्चरणस्य यस्य ।। एकस्य नान्यस्य पदं सुराणान्त्रिविक्रमं सर्वगतन्नमामि ।।5।। त्रिसप्तकृत्वो नृपतीन्निहत्य यस्तर्पणं रक्तमयम्पितृभ्यः ।। चकार दोर्दण्डबलेन सम्यक्तमादिशूरम्प्रणमामि रामम् ।।6।। कुले रघूणां समवाप्य जन्म विधाय सेतुञ्जलधेर्जलान्तः । लङ्केश्वरं यः शमयाञ्चकार सीतापतिंतम्प्रणमामि भक्त्या ।।7।। हलेन सर्वानसुरान्नि-

कृष्य चकार चूर्णम्मुसलप्रहारैः ॥ यः कृष्णमासाद्य वलम्वलीयान्भक्त्या भजे तम्वलभद्ररामम् ॥8॥ पुरा सुराणामसुरान्विजेतुं सम्भावयच्छ्रीवरचिह्नवेषम् ॥ चकार यः शास्त्रममोघकल्पन्तम्मूलभूतम्प्रणतोऽस्मि बुद्धम् ॥9॥ कल्पावसाने निखिलैः सुरैस्स्वैस्सङ्घट्टयामास निमेषमात्रात् ॥ यस्तेजसा स्वेन ददाह भीमो विश्वात्मकन्तन्तुरगम्भजामः ॥10॥ शङ्खं सुचक्रं सुगदां सरोजंदोर्भिर्दधानङ्गरुडाधिरूढम् ॥ श्रीवत्सचिह्नञ्जगदादिमूलन्तमालनीलं हृदि विष्णुमीडे ॥11॥ क्षीराम्वुधौ शेषविशेषतल्पे शयानमन्तः स्मितशोभिवक्त्रम् ॥ उत्फुल्लनेत्राम्वुजमम्वुदाम्भसामाद्यं श्रुतीनामसकृत्स्मरामि ॥12॥ प्रीणयेदनया स्तुत्या जगन्नाथञ्जगन्मयम् ॥ धर्मार्थकाममोक्षाणामाप्तये पुरुषोत्तमम् ॥13॥ इति श्रीविष्णुस्तोत्रं समाप्तम् ॥

अथ कवचम्

श्रीनारद उवाच ॥ भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितम् ॥ त्रैलोक्यमङ्गलन्नाम कृपया कथय प्रभो ॥1॥ सनत्कुमार उवाच ॥ शृणु वक्ष्यामि विप्रेन्द्र कवचपरमाद्भुतम् ॥ नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥2॥ ब्रह्मणा कथितम्मह्यम्परं स्नेहाद्वदामि ते ॥ अतिगुह्यतरन्तत्त्वम्ब्रह्ममन्त्रौघविग्रहम् ॥3॥ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवम् ॥ यद्धृत्वा पठनात्पाति महालक्ष्मीर्जगत्त्रयम् ॥4॥ पठनाद्धारणाच्छम्भुः संहर्त्ता सर्वमन्त्रवित् ॥ त्रैलोक्यजननी दुर्गा महिषादिमहासुरान् ॥5॥ वरदृप्ताञ्जघानैव पठनाद्धारणाद्यतः ॥ एवमिन्द्रादयस्सर्वे सर्वैश्वर्य्यमवाप्नुयुः ॥6॥ इदङ्कवचमत्यन्तगुप्तङ्कुत्रापि नो वदेत् ॥ शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥7॥ शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ त्रैलोक्यमङ्गलस्यास्य कवचस्य प्रजापतिः ॥8॥ ऋषिश्छन्दश्च गायत्री देवो नारायणः स्वयम् ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥9॥ प्रणवो मे शिरः पातु नमो नारायणाय च ॥ भालम्मे नेत्रयुगलमष्टार्णो भक्तिमुक्तिदः ॥10॥ क्लीम्पायाच्छ्रोत्रयुग्मञ्चैकाक्षरसर्वमोहनः ॥ क्लींकृष्णाय सदा घ्राणङ्गोविन्दायेति जिह्विकाम् ॥ गोपीजनपद वल्लभाय स्वाहाननम्मम ॥11॥ अष्टादशाक्षरो मन्त्रः कंठम्पातु दशाक्षरः ॥12॥ गोपीजनपद वल्लभाय स्वाहा भुजद्वयम् ॥ क्लींग्लौंक्लीं-

श्यामलाङ्गाय नमः स्कन्धौ दशाक्षरः ॥13॥ क्लींकृष्णः क्लीं करौ पायात्क्लींकृष्णायाङ्गतोऽवतु ॥ हृदयम्भुवनेशानी क्लींकृष्णाय क्लीं स्तनौ मम ॥14॥ गोपालायाग्निजायान्तङ्कुक्षियुग्मं सदावतु ॥ क्लींकृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमः ॥15॥ कृष्णगोविन्दकौ कट्यां स्मराद्यौ ङेयुतौ मनुः ॥ अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु ॥16॥ पृष्ठं क्लींकृष्णकङ्कालं क्लींकृष्णाय द्विठान्तकः ॥ सक्थिनी सततम्पातु श्रींह्रींक्लीं कृष्ण ठद्वयम् ॥17॥ ऊरूसप्ताक्षरः पायात्त्रयोदशाक्षरोऽवतु ॥ श्रींह्रींक्लींपदतो गोपीजनवल्लभ दन्ततः ॥18॥ भाय स्वाहेति पायुं वै क्लींह्रींश्रीं सदशार्णकः । जानुनी च सदा पातु ह्रींश्रींक्लीं च दशाक्षरः ॥19॥ त्रयोदशाक्षरः पातु जङ्घे चक्राद्युदायुधः ॥ अष्टादशाक्षरो ह्रींश्रीं-पूर्वको विंशदर्णकः ॥20॥ सर्वाङ्गम्मे सदा पातु द्वारकानायको बली ॥ नमो भगवते पश्चाद्वासुदेवाय तत्परम् ॥21॥ ताराद्यो द्वादशार्णोऽयम्प्राच्याम्मां सर्वदाऽवतु ॥ श्रींह्रींक्लीं च दशार्णस्तु क्लींह्रींश्रीं षोडशार्णकः ॥22॥ गदाद्युदायुधो विष्णुम्मामग्नेर्दिशि रक्षतु ॥ ह्रींश्रीं दशाक्षरो मन्त्रो दक्षिणे मां सदाऽवतु ॥23॥ तारो नमो भगवते रुक्मिणीवल्लभाय च ॥ स्वाहेति षोडशार्णोऽयन्नैर्ऋत्यान्दिशि रक्षतु ॥24॥ क्लींहृषीकेशदेशाय नमो मां वारुणेऽवतु ॥ अष्टदशार्णः कामान्तो वायव्ये मां सदावतु ॥25॥ श्रींमायाकामकृष्णाय ह्रींगोविन्दाय द्विठो मनुः ॥ द्वादशार्णात्मको विष्णु-रुत्तरे मां सदावतु ॥26॥ वाग्भावङ्कामं कृष्णाय ह्रींगोविन्दाय तत्परम् ॥ श्रींगोपीजनवल्लभान्ते भाय स्वाहा हसौस्ततः ॥27॥ द्वाविंशत्यक्षरो मन्त्रो मामैशान्ये सदावतु ॥ कालियस्य फणानांमध्ये दिव्यन्नृत्यङ्करोति तम् ॥28॥ नमामि देवकीपुत्रन्नृत्यराजानमच्युतम् ॥ द्वात्रिंशदक्षरो मन्त्रोऽप्यधो मां सर्वदावतु ॥29॥ कामदेवाय विद्महे पुष्पबाणाय धीमहि ॥ तन्नोऽनङ्गः प्रचोदयादेषा माम्पातु चोर्द्ध्वतः ॥30॥ इति ते कथितं विप्र ब्रह्ममन्त्रौघविग्रहम् ॥ त्रैलोक्यमङ्गलन्नाम कवचम्ब्रह्मरूपकम् ॥31॥ ब्रह्मणा कथितम्पूर्वन्नारायणमुखाच्च्युतम् ॥ तव स्नेहान्ममाऽऽख्यातम्प्रवक्तव्यन्न कस्यचित् ॥32॥ गुरुम्प्रणम्य विधिवत्कवचम्प्रपठेत्ततः ॥ सकृद्द्विस्त्रिर्यथाज्ञानं सोऽपि सर्वतपोमयः ॥33॥ मन्त्रेषु सकलेष्वेव देशिको

नात्र संशय: ।। शतमष्टोत्तरञ्चास्य पुरश्चर्याविधि: स्मृत: ।।34।। हवनादीन्दशांशेन कृत्वां तत्साधयेद्ध्रुवम् ।। यदि स्यात्सिद्धकवचो विष्णुरेव भवेत्स्वयम् ।।35।। मन्त्रसिद्धिर्भवेत्तस्य पुरश्चर्य्याविधानत: ।। स्पर्द्धामुद्धूय सततं लक्ष्मीर्वाणी वसेत्तत: ।।36।। पुष्पाञ्जल्यष्टकन्दत्वा मूलेनैव पठेत्सकृत् ।। दशवर्षसहस्राणाम्पूजाया: फलमाप्नुयात् ।।37।। भूर्जे विलिख्य गुटिकां स्वर्णस्थान्धारयेद्यदि ।। कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशय: ।।38।। अश्वमेधसहस्राणि वाजपेयशतानि च ।। महादानादि यान्येव प्रादक्षिण्यम्भुवस्तथा ।।39।। कलान्नार्हन्ति तान्येव सकृदुच्चारणात्तत: ।। कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नर: ।।40।। त्रैलोक्यङ्क्षोभयत्येव त्रैलोक्यविजयी भवेत् ।। इदङ्कवचमज्ञात्वा यजेद्य: पुरुषोत्तमम् ।। शतलक्षप्रजप्तोऽपि न मन्त्रस्तस्य सिद्ध्यति ।।41।। इति कवचं समाप्तम् ।।

अथ हृदयम्

आचम्य प्राणानायम्य देशकालौ स्मृत्वा ममाभीष्टसिद्ध्यर्थं सङ्कलीकरणरीत्या सम्पुटीकरणरीत्या वा नारायणहृदयस्य सकृदावर्त्तनङ्करिष्ये ।। अस्य श्रीनारायणहृदयस्तोत्रमन्त्रस्य, भार्गवऋषि:, अनुष्टुप्छन्द:, श्रीलक्ष्मीनारायणो देवता, ॐ बीजम्, नम: शक्ति:, नारायणायेति कीलकम्, श्रीलक्ष्मीनारायणप्रीत्यर्थे जपे विनियोग: ।। ॐ नारायण: परञ्ज्योतिरित्यङ्गुष्ठाभ्यान्नम:, ॐ नारायण: परब्रह्मेति तर्जनीभ्यां०, ॐ नारायण: परो देव इतिमध्यमाभ्यां०, ॐ नारायण: परो ध्यातेति अनामिकाभ्यां०, ॐ नारायण: परन्धामेति कनि०, ॐ नारायण: परो धर्म इति करतलकर०, एवं हृदयादि ।। अथ दिग्बन्ध: ।। ॐ ऐंद्र्यादि ... दिशम् ।। "ॐ नम: सुदर्शनाय सहस्राराय हुम्फट् बध्नामि नमश्चक्राय स्वाहा" इति प्रतिदिशं योज्यम् ।। अथ ध्यानम् ।। उद्यदादित्यसङ्काशम्पीतवाससमच्युतम् ।। शङ्खचक्रगदापाणिन्ध्यायेल्लक्ष्मीपतिं हरिम् ।। "ॐ नमो नारायणाय" इति जप: ।। अथ मूलाष्टकम् ।। ॐ नारायण: परञ्ज्योतिरात्मा नारायण: पर: ।। नारायण: परब्रह्म नारायण नमोस्तु ते ।।1।। नारायण: परो देवो दाता नारायण: पर: ।। नारायण: परो ध्याता नारायण नमोऽस्तु ते ।।2।। नारायण: परन्धाम ध्यानन्नारायण: पर: ।।

नारायण: परो धर्मो नारायण नमोऽस्तु ते ॥3॥ नारायणपरो वेदो विद्या नारायण: परा ॥ विश्वन्नारायणस्साक्षान्नारायण नमोऽस्तु ते ॥4॥ नारायणाद्विधिर्जातो जातो नारायणाच्छिव: ॥ जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते ॥5॥ रविर्नारायणन्तेजश्चान्द्रन्नारायणम्मह: ॥ वह्निर्नारायण: साक्षान्नारायण नमोऽस्तु ते ॥6॥ नारायणउपास्य: स्याद्गुरुर्नारायण: पर: ॥ नारायण: परो बोधो नारायण नमोऽस्तु ते ॥7॥ नारायण: फलम्मुख्यं सिद्धिर्नारायण: सुखम् ॥ सेव्यो नारायणश्शुद्धो नारायण नमोऽस्तु ते ॥8॥ इति मूलाष्टकम् । अथ प्रार्थनादशकम् ॥ नारायणस्त्वमेवासि दहराख्ये हृदि स्थित: ॥ प्रेरक: प्रेर्यमाणानान्त्वया प्रेरितमानस: ॥1॥ त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ॥ नानोपासनमार्गाणाम्भावहृद्भावबोधक: ॥2॥ भावार्थकृद्भावभूतो भावसौख्यप्रदो भव ॥ त्वन्मायामोहितं विश्वन्त्वयैव परिकल्पितम् ॥3॥ त्वदधिष्ठानमात्रेण सैषा सर्वार्थकारिणी ॥ त्वमेव ताम्पुरस्कृत्य मम कामान्समर्पय ॥4॥ न मे त्वदन्यस्त्रातास्ति त्वदन्यन्न हि दैवतम् ॥ त्वदन्यन्न हि जानामि पालकस्पुण्यरूपकम् ॥5॥ यावत्सांसारिको भावो मन:स्थो भावनात्मक: ॥ तावत्सिद्धिर्भवेत्साध्या सर्वथा सर्वदा विभो ॥6॥ पापिनामहमेवाग्रयो दयालूनान्त्वमग्रणी: ॥ दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥7॥ त्वयाप्यहन्न सृष्टश्चेन्न स्यात्तव दयालुता ॥ आमयो नैव सृष्टश्चेदौषधस्य वृथोदय: ॥8॥ पापसङ्घपरिक्रान्त: पापात्मा पापरूपधृक् ॥ त्वदन्य: कोऽत्र पापेभ्यस्त्राता मे जगतीतले ॥9॥ त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव, त्वमेव विद्या च गुरुस्त्वमेव, त्वमेव सर्वम्मम देवदेव ॥10॥ प्रार्थनादशकञ्चैव मूलाष्टकमुदाहृतम् ॥ य: पठेच्छृणुयान्नित्यं तस्य लक्ष्मी: स्थिरा भवेत् ॥11॥ नारायणस्य हृदयं सर्वाभीष्टफलप्रदम् ॥ लक्ष्मीहृदयकं स्तोत्रं यदि चेत्तद्विना कृतम् ॥12॥ तत्सर्वन्निष्फलम्प्रोक्तं लक्ष्मी: क्रुद्ध्यति सर्वदा ॥ एतत्सङ्कलितं स्तोत्रं सर्वकर्मफलप्रदम् ॥13॥ लक्ष्मीहृदयकञ्चैव तथा नारायणात्मकम् ॥ जपेद्य: सङ्कलीकृत्वा सर्वाभीष्टमवाप्नुयात् ॥14॥ नारायणस्य हृदयमादौ जप्त्वा तत: परम् ॥ लक्ष्मीहृदयकं स्तोत्रञ्जपेन्नारायणम्पुन: ॥15॥

पुनर्नारायणञ्जप्त्वा पुनर्लक्ष्मीकृतञ्जपेत् ॥ पुनर्न्नारायणञ्जाप्यं सङ्कुलीकरणम्भवेत् ॥13॥ एवम्मध्ये द्विवारेण जपेत्सङ्कुलितं हि तत् ॥ लक्ष्मीहृदयकं स्तोत्रं सर्वकामप्रकाशितम् ॥17॥ तद्वज्जपादिकङ्कुर्यदित-त्सङ्कुलितं शुभम् ॥ सर्वान्कामानवाप्नोति आधिव्याधिभयं हरेत् ॥18॥ गोप्यमेतत्सदा कुर्यान्न सर्वत्र प्रकाशयेत् ॥ इति गुह्यतमं शास्त्रम्प्राप्त-म्ब्रह्मादिकैः पुरा ॥19॥ तस्मात्सर्वप्रयत्नेन गोपयेत्साधयेत्सुधीः ॥ यत्रैतत्पुस्तकन्तिष्ठेल्लक्ष्मीनारायणात्मकम् ॥20॥ भूतपैशाचवेताला न स्थिरास्तत्र सर्वदा ॥ लक्ष्मीहृदयकम्प्रोक्तं विधिना साधयेत्सुधीः ॥21॥-भृगुवारे च रात्रौ च पूजयेत्पुस्तकद्वयम् ॥ सर्वस्वं सर्वदा सत्यङ्गोपये त्साधयेत्सुधीः ॥22॥ गोपनात्साधनाल्लोके धन्यो भवति तत्त्वतः ॥23॥ इत्यथर्वणरहस्ये उत्तरभागे श्रीनारायणहृदयं सम्पूर्णम् ॥

अथोपनिषत्

कश्यप उवाच ॥ एकशृङ्ग वृषसिन्धो वृषाकपे सुरवृष अनादि-सम्भव रुद्र कपिल विष्वक्सेन सर्वभूतपते ध्रुवधर्म वैकुण्ठ वृषावर्त्त अनादिमध्यनिधन धनञ्जय शुचिश्रवः पृश्नितेजः निजजय अमृतशय सनातन त्रिधामन् तुषित महातत्त्व लोकनाथ पद्मनाभ विरञ्च बहुरूप अक्षय अक्षर हव्यभुक् खण्डपरशो शक्र मुञ्जकेश हंस महादक्षिण हृषीकेश सूक्ष्म महानियमधर विरजः लोकप्रतिष्ठ अरूप अग्रज धर्मज धर्मनाभ हव्यभुक् गभस्तिनाथ शतक्रतुनाथ चन्द्ररथ सूर्यतेजः समुद्रवासः अज सहस्रशिरः सहस्रपाद अयोमुख महापुरुष पुरुषोत्तम सहस्रवाहो सहस्रमूर्त्ते सहस्रास्य सहस्रसम्भव विश्वन्त्वामाहुः ॥ पुष्पहासचरम त्वमेव वौषट्-कारस्त्वामाहुरस्यमखेषु प्राशितारम् ॥ शतधारं सहस्रधारं बभूव ॥ भूवन्द्य भूनाथ भृगुपुत्र वेदवेद्य ब्रह्मशय ब्रह्मणप्रिय त्वमेव द्यौरसि मातरिश्वासि धर्मोसि होता पोता हन्ता मन्ता नेता होमहेतुस्त्वमेव ॥ अग्रयश्च धाम्नां त्वमेव ऋग्भिः सुभाण्ड इज्योऽसि सुमेधोसि समिधस्त्वमेव मतिर्गतिर्दाता त्वमसि मोक्षोऽसि योगोऽसि सृजसि धाता परमयज्ञोऽसि सोमोसि दीक्षितो-ऽसि दक्षिणासि विश्वमसि ॥ स्थविर हिरण्यगर्भ नारायण त्रिनयन आदि-वर्ण आदित्यतेजः महापुरुष पुरुषोत्तम आदिदेव भूविक्रम त्रिविक्रम प्रभाकर

शम्भो स्वयम्भू भूतादिमहाभूतोऽसि । विश्वभूत विश्वं त्वमेव विश्वगोप्तासि पवित्रमसि विश्वभव ऊर्ध्वकर्मन् अमृत दिवस्पते वाचस्पते घृतार्चे अनन्तकर्म वंशप्राग्वंशधी: त्वमश्वमेध: वरार्थिना वरदोऽसि त्वम् ।। चतुर्भिश्च चतुर्भिश्च द्वाभ्याम्पञ्चभिरेव च ।। हूयते च पुनर्द्वाभ्यान्तुभ्यं होत्रात्मने नम: ।। इत्युपनिषत्समाप्ता ।।

अथाष्टोत्तरशतनाम

अष्टोत्तरशतन्नाम्ना विष्णोरतुलतेजस: ।। यस्य श्रवणमात्रेण नरो नारायणो भवेत् ।।1।। विष्णुर्ज्जिष्णुर्वषट्कारो देवदेवो वृषाकपि: ।। दामोदरो दीनवन्धुरादिदेवोऽदितेस्सुत: ।।2।। पुण्डरीक: परानन्द: परमात्मा परात्पर: ।। परशुधारी विश्वात्मा कृष्ण: कालीमलापह: ।।3।। कौस्तुभोद्भासितोरस्को नरो नारायणो हरि: ।। हरो हरप्रिय: स्वामी वैकुण्ठो विश्वतोमुख: ।।4।। हृषीकेशोऽप्रमेयात्मा वराहो धरणीधर: ।। वामनो वेदवक्ता च वासुदेवस्सनातन: ।।5।। रामो विरामो विरजो रावणारी रमापति: ।। वैकुण्ठवासी वसुमान् धनदो धरणीधर: ।।6।। धर्मेशो धरणीनाथो ध्येयो धर्मभृतांवर: ।। सहस्रशीर्षापुरुष: सहस्राक्षस्सस्रपात् ।।7।। सर्वग: सर्ववित्सर्व: शरण्य: साधुवल्लभ: ।। कौसल्यानन्दनश्श्रीमानृक्ष: कुलविनाशक: ।।8।। जगत्कर्त्ता जगद्धर्त्ता जगज्जेता जनार्त्तिहा ।। जानकीवल्लभो देवो जयरूपो जलेश्वर: ।।9।। क्षीराब्धिवासी क्षीराब्धितनयावल्लभस्तथा ।। शेषशायी पन्नगारिवाहनो विष्टरश्रवा: ।।10।। माधवो मथुरानाथो मोहदो मोहनाशन: ।। दैत्यारि: पुण्डरीकाक्षो ह्यच्युतो मधुसूदन: ।।11।। सोमसूर्याग्निनयनो नृसिंहो भक्तवत्सल: ।। नित्यो निरामयश्शुद्धो नरदेवो जगत्प्रभु: ।।12।। हयग्रीवो जितरिपुरुपेन्द्रो रुक्मिणीपति: ।। सर्वदेवमय: श्रीश: सर्वाधार: सनातन: ।।13।। सौम्य: सौम्यप्रद: स्रष्टा विष्वक्सेनो जनार्दन: ।। यशोदातनयो योगी योगशास्त्रपरायण: ।।14।। रुद्रात्मको रुद्रमूर्त्ती राघवो मधुसूदन: ।। इति ते कथितन्दिव्यन्नाम्नामष्टोत्तरं शतम् ।।15।। सर्वपापहरम्पुण्यं विष्णोरमिततेजस: ।। दु:खदारिद्य्रदौर्भाग्यनाशनं सुखवर्द्धनम् ।।16।। सर्वसम्पत्करं सौम्यम्महापातकनाशनम् ।। प्रातरुत्थाय विप्रेन्द्र पठेदेकाग्रमानस: ।। तस्य नश्यन्ति विपदां राशय: तत: सिद्धिमाप्नुयात् ।।17।। इत्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।।

12. अथ नारायणहृदयस्तोत्रम्

(नारायण हृदय स्तोत्र से लक्ष्मी हृदय स्तोत्र को सम्पुटित करने से अभीष्टसिद्धि की प्राप्ति होती है। लक्ष्मी की प्राप्ति के लिए इस को प्रतिदिन स्नानादि करके शुद्धासन पर बैठकर शुद्ध वस्त्र धारण कर इस स्तोत्र का इस विधि से पाठ करें।)

ममाभीष्ट सिद्ध्यर्थं सम्पुटीकरणरीत्या नारायण हृदयेन लक्ष्मीहृदयस्य सम्पुटमहं करिष्ये ।

अस्य श्री नारायण हृदय स्तोत्र मन्त्रस्य भार्गव ऋषिः, अनुष्टुप् छन्दः, श्री लक्ष्मी नारायणो देवता, ॐ बीजम्, नमः शक्तिः, नारायणायेति कीलकम्, श्री लक्ष्मी नारायण प्रीत्यर्थे जपे विनियोग? ।

अगंन्यास—ॐ नारायणः परं ज्योतिः अगंुष्ठाभ्यां नमः । हृदयाय ।
,, नारायणः परं ब्रह्म तर्जनीभ्यां नमः । शिरसे ।
,, नारायणः परो देवः मध्यमाभ्यां नमः । शिखायै ।
,, नारायणः परो ध्याता अनामिकाभ्यां नमः । कवचाय ।
,, नारायणः परं धाम कनिष्ठिकाभ्यां नमः । नेत्रयाय ।
,, नारायणः परोधर्मः करतलकर पृष्ठाभ्यां नमः । अस्त्राय ।

ऐन्द्रादि दशदिग्वन्धनम्—ॐ नमः सुदशर्नाय सहस्राय हुं फट् बध्नामि नमश्चक्राय स्वाहा । इति प्रतिदिशं योज्यम् ।

ध्यानम्—उद्यदादित्य संकाशं पीतवाससमच्युतम् ।
शंख चक्र गदापाणिं ध्यायेल्लक्ष्मी पति हरिम् ॥

मन्त्रः—ॐ नमोनाराणाय—इति जपः । अष्टोत्तरशतम् ।

अथ मूलाष्टकम्

1. नारायणः परं ज्योतिरात्मा नारायणः परः ।
नारायणः परं ब्रह्म नारायण नमोऽस्तुते ॥

2. नारायण: परो देवो दाता नारायण: पर: ।
नारायण: परो ध्याता नारायण नमोऽस्तुते ॥
3. नारायण: परं धाम ध्यानं नारायण: पर: ।
नारायण: परो धर्मो नारायण नमोऽस्तुते ॥
4. नारायण: परो वेदो विद्या नारायण: परा ।
विश्वं नारायण: साक्षान्नारायण नमोऽस्तुते ॥
5. नारायणाद् विधिर्जातो जातो नारायणाच्छिव: ।
जातो नारायणादिन्द्रो नारायण नमोऽस्तुते ते ॥
6. रवि: नारायणं तेजश्चान्द्रं नारायणं मह: ।
वह्नि: नारायण: साक्षान्नारायण नमोऽस्तुते ॥
7. नारायण: उपास्य: स्याद् गुरु: नारायण: पर: ।
नारायण: परो बोधो नारायण नमोऽस्तु ते ॥
8. नारायण: फलं मुख्यं सिद्धिर्नारायण: सुखम् ।
सेव्यो नारायण: शुद्धो नारायण नमोऽस्तु ते ॥

अथ प्रार्थनादशकम्

1. नारायणस्त्वमेवासि दहराख्ये हृदि स्थित: ।
प्रेरक: प्रेर्यमाणानां त्वया प्रेरितमानस: ॥
2. त्वदाज्ञां शिरसा धृत्वा जपामि जन पावनम् ।
नानोपासन मार्गाणां भावहृद् भाव बोधक: ॥
3. भावार्थ कृद् भाव भूतो भाव सौख्य प्रदो भव ।
त्वन्माया मोहितं विश्वं त्वयैव परिकल्पितम् ॥
4. त्वदधिष्ठान मात्रेण सैषा सर्वार्थ कारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान् समर्पय ॥
5. न मे त्वदन्यस्त्राताऽस्ति त्वदन्यं नहि दैवतम् ।
त्वदन्यं नहि जानामि पालकम् पुण्य रूपकम् ॥
6. यावत्संसारिको भावो मन:स्थो भावनात्मक: ।
तावत्सिद्धि: भवेत्साध्या सर्वथा सर्वदा विभो ॥

7. पापिनामहमेवाग्रो दयालूनां त्वमग्रणी: ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ।।
8. त्वयाप्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो नैव सृष्टश्चेदौषधस्य वृथोदय: ।।
9. पापसंघ परिक्रान्त: पापात्मा पाप रूपधृक् ।
त्वदन्य: कोऽत्र पापेभ्य स्त्राता मे जगती तले ।।
10. त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या च गुरुस्त्वमेव,
त्वमेव सर्वं मम देव देव ।।
11. प्रार्थना दशकं चैव मूलाष्टक मुदाहृतम् ।
य: पठेच्छृणुयान्नित्य तस्य लक्ष्मी स्थिरा भवेत् ।।

फलम्—नारायणस्य हृदयं सर्वाभीष्ट फलप्रदम् ।
लक्ष्मीहृदयकं स्तोत्रं यदि चेत्तद्विना कृतम् ।।12।।
तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीक्रुध्यति सर्वदा ।
एतत्संकलितं स्तोत्रं सर्व काम फलप्रदम् ।।13।।
लक्ष्मी हृदयकं चैव तथा नारायणात्मकम् ।
जपेद्य: संकलीकृत्य सर्वाभीष्टमवाप्नुयात् ।।14।
नारायणस्य हृदयमादौ जप्त्वा तत: परम् ।
लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुन: ।।15।।
पुन: नारायणं जप्त्वा पुन: लक्ष्मीकृतं जपेत् ।
पुन: नारायणं जाप्यं सकलीकरणं भवेत् ।।16।।
एवं मध्ये द्विवारेण जपेत्संकलितं हि तत् ।
लक्ष्मीहृदयकं स्तोत्रं सर्वकाम प्रकाशितम् ।।17।।
तद्वज्जपादिकं कुर्यादेतत्संकलितं शुभम् ।।
सर्वान् कामानाप्नोति आधिव्याधिभयं हरेत् ।।18।।

गोप्यमेतत् सदा कुर्यान्न सर्वत्र प्रकाशयेत ।
इति गुह्यतमं शास्त्रं प्राप्तं ब्रह्मादिकैः पुरा ॥19॥
तस्मात् सर्व प्रयत्नेन गोपयेत्साधयेत् सुधीः ।
यत्रैतत्पुस्तकं तिष्ठेत् लक्ष्मी नारायणात्मकम् ॥20॥
भूत पैशाचवेताला: न स्थिरास्तत्र सर्वदा ।
लक्ष्मी हृदयकं प्रोक्तं विधिना साधयेत् सुधी ॥21॥
भृगुवारे च रात्रौ च पूजयेत् पुस्तकद्वयम् ।
सर्वस्वं सर्वदा सत्यं गोपयेत् साधयेत् सुधी ॥22॥
गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः ॥23॥
इत्यथर्वण रहस्ये उत्तरभागे श्री नारायण-हृदयं सम्पूर्णम् ॥

13. अथ महालक्ष्मी हृदयस्तोत्रम्

ओ३म्-अस्य श्री महालक्ष्मी हृदय माला मन्त्रस्य, भार्गव ऋषि:, आद्यादि श्री महालक्ष्मीर्देवता, अनुष्टुबादि नानाछन्दांसि, श्री बीजम्, ह्रीं शक्ति:, ऐं कीलकम्, श्री महालक्ष्मी प्रसाद सिद्धयर्थं जपे विनियोग: ।

न्यास:—उों भार्गव ऋषये नम: शिरसि ।
अनुष्टुबादि नानाछन्दोभ्यो नमो मुखे ।
आद्यादि श्री महालक्ष्म्यै देवतायै नमो हृदये ।
श्रीं बीजाय नमो गुह्ये ।
ह्रीं शक्तये नम: पादयो: ।
ऐं कीलकाय नम: सर्वाङ्गे ।

करन्यास:—श्रीं अंगुष्ठाभ्यां नम: ।
ह्रीं तर्जनीभ्यां नम: ।
ऐं मध्यमाभ्यां नम: ।
श्रीं अनामिकाभ्यां नम: ।
ह्रीं कनिष्ठकाभ्यां नम: ।
ऐं करतल करपृष्ठाभ्यां नम: ।

अंगन्यास—उों श्रीं हृदयाय नम: ।
ह्रीं शिरसे स्वाहा ।
ऐं शिखायै वषट् ।
श्रीं कवचाय हुम् ।
ह्रीं नेत्रत्रयाय वौषट् ।
ऐं अस्त्राय फट् ।
उों श्रीं ह्रीं ऐं दिग्बन्ध: ।

ध्यानम्—हस्तद्वयेन कमले धारयन्तीं स्व लीलया ।
हार नूपुर संयुक्तां लक्ष्मीं देवीं विचिन्तये ॥

इति ध्यात्वा मानसोपचारैः संपूज्य ।

शंख चक्र गदाहस्ते शुभ्रवर्णे सुवासिनी ।
मम देहि वरं लक्ष्मि सर्वसिद्धि प्रदायिनि ।।

इति संप्रार्थ्य—ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा ।

इति मन्त्रं जप्त्वा पुनः हृदयादि न्यासं कृत्वा स्तोत्रं पठेत् ।

1. वन्दे लक्ष्मीं परशिवमयीं शुद्ध जांबू नदाभाम् ।
तेजो रूपां कनकवसनां सर्व भूषोज्ज्वलांगीम् ।।
बीजा पूरं कनक कलशं हेम पद्मं दधाना—
माद्यां शक्तिं सकल जननीं विष्णु वामांक संस्थाम् ।।

2. श्रीमत्सौभाग्य जननीं स्तौमि लक्ष्मीं सनातनीम् ।
सर्व काम फलावाप्तिं साधनैक सुखावहाम् ।।

3. स्मरामि नित्यं देवेशि त्वया प्रेरित मानसः ।
त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ।।

4. समस्त सम्पत्सुखदां महाश्रियं
समस्त सौभाग्य करीं महाश्रियम् ।
समस्तकल्याण करीं महाश्रियं,
भजाम्यहं ज्ञान करीं महाश्रियम् ।।

5. विज्ञान सम्पत्सुखदां सनातनीं,
विचित्र वाग्विभूति करीं मनोहराम् ।
अनन्त सामोद सुखप्रदायिनीं
नमाम्यहं भूति करीं हरि प्रियाम् ।।

6. समस्त भूतान्तर संस्थिता त्वं
समस्त भोक्त्रीश्वरि विश्वरूपे ।
तन्नास्ति यद्वद् व्यतिरिक्त वस्तु,
त्वत्पाद पद्मं प्रणमाम्यहं श्रीः ।।

7. दारिद्रय दुःखौघ तमोपहन्त्री,
त्वत्पाद पद्मं मयि सन्निधत्स्व,

दीनार्ति विच्छेदन हेतुभूतैः,
कृपाकटाक्षैरभिषिंच मां श्रीः ॥

8. अम्ब प्रसीद करुणासुधयार्द्रं दृष्टया,
मां त्वत्कृपाद्रविण गेह मिमं कुरुष्व ।
आलोकय प्रणत हृद्‌गत शोक हन्त्री,

9. शान्त्यै'नमोऽस्तु शरणागत रक्षणायै,
कान्त्यै नमोऽस्तु कमनीय गुणाश्रयायै
क्षान्त्यै नमोऽस्तु दुरित क्षय कारणायै,
धात्र्यै नमोऽस्तु धनधान्य समृद्धिदायै ॥

10. शक्त्यै नमोऽस्तु शशिशेखर संस्तुतायै,
रत्यै नमोऽस्तु रजनीकर सोदरायै ।
भक्त्यै नमोऽस्तु भवसागर तारकायै,
मत्यै नमोऽस्तु मधुसूदनवल्लभायै ॥

11. लक्ष्म्यै नमोऽस्तु शुभलक्षण लक्षितायै,
सिद्धयै नमोऽस्तु शिवसिद्धि सुपूजितायै ।
धृत्यै नमोऽस्त्वमित दुर्गति भंजनायै,
गत्यै नमोऽस्तु वर सद्‌गति दायकायै ॥

12. देव्यै नमोऽस्तु दिवि देव गणार्चितायै,
भूत्यै नमोऽस्तु भुवनार्ति विनाशनायै ।
दात्र्यै नमोऽस्तु धरणीधर वल्लभायै,
पुष्ट्यै नमोऽस्तु पुरुषोत्तम वल्लभायै ॥

13. सुतीव्र दारिद्रय विदुःख हन्त्र्यै,
नमोऽस्तुते सर्वभयापहन्त्र्यै ।
श्री विष्णु वक्षस्थल संस्थितायै,
नमो नमः सर्वविभूतिदायै ॥

14. जयतु जयतु लक्ष्मी लक्षणालंकृतांगी,
जयतु जयतु पद्मा पद्म सद्‌माभिवन्द्या ।
जयतु जयतु विद्या विष्णु वामांक संस्था,

जयतु जयतु सम्यक् सर्वसंपत्करी श्रीः ॥

15. जयतु जयतु देवी देव संघाभि पूज्या,
जयतु जयतु भद्रा भार्गवी भाग्य रूपा ।
जयतु जयतु नित्या निर्मल ज्ञान वेद्या,
जयतु जयतु सत्या सर्वभूतान्तरस्था ॥

16. जयतु जयतु रम्या रत्न गर्भान्तरस्था,
जयतु जयतु शुद्धा शुद्ध जाम्बूनदाभा ।
जयतु जयतु कान्ता कान्तिमद् भासितांगी,
जयतु जयतु शान्ता शीघ्रमागच्छ सौम्ये ॥

17. यस्या, कलाया: कमलोद्भवाया:,
रुद्राश्च शक्रप्रमुखाश्च देवा: ।
जीवन्ति सर्वा अपि शक्तयस्ता:,
प्रभुत्वमाप्ता: परमायुपस्ते ॥

18. लिलेख निटिले विधिर्मम लिपिं विसृज्यापरं,
त्वया विलिखितव्य मेतदिति तत्फल प्राप्तये ।
तदन्तर फले स्फुटं कमल वासिनि श्रीरिमां
समर्पय स्वमुद्रिकां सकल भाग्य संसूचिकाम् ॥

19. कलया ते यथा देवि, जीवन्ति सचराचरा: ।
तथा संपत्करे लक्ष्मी: सर्वदा संप्रसीद मे ॥

20. यथा विष्णु ध्रुवे नित्यं स्व कलां संन्यवेशयेत् ।
तथैत्र स्व कलां लक्ष्मि मयि सम्यक् समर्पय ॥

21. सर्व सौख्यप्रदे देवि भक्तानामभयप्रदे ।
अचलां कुरु यत्नेन कलां मयि निवेशिताम् ॥

22. मुदास्तां मद्भाले परमपद लक्ष्मी स्फुट कला,
सदा वैकुण्ठ श्री निवसतु कला मे नयनयो: ।
वसेत्सत्ये लोके मम वचसि लक्ष्मीर्वरकला,
श्रिय: श्वेत द्वीपे निवसतु कला मेऽस्तु करयो: ॥

23. तावन्नित्यं ममाङ्गेषु क्षीराब्धौ श्रीकला वसेत् ।
सूर्या चन्द्रमसौ यावद्यावल्लक्ष्मीपति श्रिया ॥
24. सर्वमंगल सम्पूर्णा सर्वैश्वर्य समन्विता ।
आद्यादि श्री महालक्ष्मीस्त्वत्कला मयि तिष्ठतु ॥
25. अज्ञानतिमिरं हन्तुं शुद्धज्ञान प्रकाशिका ।
सर्वैश्वर्य प्रदा मेऽस्तु त्वत्कलामयि संस्थिता ॥
26. अलक्ष्मीः हरतु क्षिप्रं तमः सूर्य प्रभा यथा ।
वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता ॥
27. ऐश्वर्य मंगलोत्पत्तिस्त्वत्कलाया निधीयते ।
मयि तस्मात्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥
28. भवदावेश भाग्यार्हो भाग्यवानस्मि भार्गवि ।
त्वत्प्रसादात्पवित्रोऽहं लोक मातर्नमोऽस्तु ते ॥
29. पुनासि मां त्वं कलयैव यस्मादतः समागच्छ ममाग्रतः त्वम् ।
परं पदं श्री भव सुप्रसन्ना मय्यच्युतेन प्रविशादि लक्ष्मीः ॥
30. श्रीवैकुण्ठस्थिते लक्ष्मीः समागच्छ ममाग्रतः ।
नारायणेन सह मां कृपा दृष्ट्याऽवलोकय ॥
31. सत्य लोक स्थिते लक्ष्मी स्त्वं समागच्छ सन्निधिम् ।
वासुदेवेन सहिता प्रसीद वरदा भव ॥
32. श्वेत द्वीप स्थिते लक्ष्मीः शीघ्रमागच्छ सुव्रते ,
विष्णुना सहिते देवि जगन्मातः प्रसीद मे ॥
33. क्षीराम्बुधि स्थिते लक्ष्मीः समागच्छ समाधवे ।
त्वत्कृपादृष्टि सुधया सततं मां विलोकय ॥
34. रत्नगर्भ स्थिते लक्ष्मीः परिपूर्ण हिरण्मयी ।
समागच्छ समागच्छ स्थित्वाशु पुरतो मम ॥
35. स्थिरा भव महालक्ष्मीः निश्चला भव निर्मले ।
प्रसन्ने कमले देवि प्रसन्न हृदया भव ॥
36. श्रीधरे श्रीमहाभूते त्वदंतस्थं महानिधिम् ॥
शीघ्र मुद्धृत्य पुरतः प्रदर्शय समर्पय ॥

37. वसुन्धरे श्री वसुधे वसुदोग्ध्रि कृपां मयि ।
त्वत्कुक्षिगत सर्वस्वं शीघ्रं मे सम्प्रदर्शय ।।
38. विष्णुप्रिये रत्नगर्भे समस्त फलदे शिवे ।
त्वद्‌गर्भगत हेमादीन संप्रदर्शय दर्शय ।।
39. रसातल गते लक्ष्मी शीघ्रमागच्छ मे पुर: ।
न जाने परमं रूपं मातर्मे संप्रदर्शय ।।
40. आविर्भव मनोवेगाच्छीघ्रमागच्छ मे पुर: ।
मा वत्सभैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ।।
41. देवि शीघ्रं समागच्छ धरणीगर्भ संस्थिते ।
मातस्त्वद्‌भृत्य भृत्योऽहं मृगये त्वां कुतूहलात् ।।
42. उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि ।
अक्षयान् हेमकलशान्सुवर्णेन सुपूरितान् ।।
43. निक्षेपान्मे समाकृष्य समुद्‌धृत्य ममाग्रत: ।
समुन्नतानना भूत्वा समाधेहि धरान्तरात् ।।
44. मत्सन्निधिं समागच्छ मदाहितकृपारसात् ।
प्रसीद श्रेयसां दोग्ध्रि लक्ष्मी मे नयनाग्रत: ।।
45. अत्रोपविश लक्ष्मीस्त्वं स्थिरा भव हिरण्मयी ।
सुस्थिरा भव संप्रीत्या प्रसीद वरदा भव ।।
46. आनीय त्वं तथा देवी निधीन्मे संप्रदर्शय ।
अद्य क्षणेन सहसा दत्त्वा संरक्ष मां सदा ।।
47. मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि ।
अभयं कुरु मे देवि महालक्ष्मी नमोऽस्तु ते ।।
48. समागच्छ महालक्ष्मी: शुद्धजांबूनद प्रभे ।
प्रसीद पुरत: स्थित्वा प्रणतं मां विलोकय ।।
49. लक्ष्मी भुवं गता भासि यत्र यत्र हिरण्मयीं ।
तत्र-तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ।।
50. क्रीडसे बहुधा भूमौ परिपूर्णा कृपामयि ।
मम मूर्ध्नि स्थिते हस्तमविलम्बिमर्पय ।।

51. फलद्भाग्योदये लक्ष्मी: समस्त पुरवासिनी ।
प्रसीद मे महालक्ष्मी: परिपूर्ण मनोरथे ।।
52. अयोध्यादिषु सर्वेषु नगरेषु समाश्रिते ।
विभवै: विविधै: युक्ते समागच्छ वलान्विते ।।
53. समागच्छ समागच्छ ममाग्रे भव सुस्थिरा ।
करुणा रस निष्यन्द नेत्रद्वय विशालिनी ।।
54. संविधत्स्व महालक्ष्मीस्त्वं पाणिं मम मस्तके ।
करुणासुधया मां त्वमभिषिञ्च स्थिरं कुरु ।।
55. सर्वराज गृहे लक्ष्मी: समागच्छ वलान्विते ।
स्थित्वाशु पुरतो मेऽद्य प्रसादेनाभङ्कुरु ।।
56. सादरं मस्तके हस्तं मम त्वं कृपयाऽर्पय ।
सर्वराजगृहे लक्ष्मी: त्वत्कलामयि तिष्ठतु ।।
57. आद्यादि श्रीर्महालक्ष्मी: विष्णु वामाङ्क संस्थिते ।
प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ।।
58. प्रसीद मे महालक्ष्मी सुप्रसीद महाशिवे ।
अचला भव संप्रीत्या सुस्थिरा भव मद् गृहे ।।
59. यावत्तिष्ठन्ति वेदाश्च यावत्त्वन्नाम तिष्ठति ।
यावद् विष्णुश्च यावत्त्वं तावत्कुरु कृपां मयि ।।
60. चान्द्री कला यथा शुक्ले वर्धते सा दिने दिने ।
तथा दया ते मय्येव वर्धतामभिवर्धताम् ।।
61. यथा वैकुण्ठ नगरे यथा वै क्षीर सागरे ।
तथा मद्भवने तिष्ठ स्थिरं श्री विष्णुना सह ।।
62. योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना ।
तथा मद्भवने तिष्ठ स्थिरं श्री विष्णुना सह ।।
63. नारायणस्य हृदये भवती यथाऽऽस्ते,
नारायणोऽपि तव हृत्कमले यथाऽऽस्ते ।
नारायणस्त्वमपि नित्यमुभौ तथैव,
तौ तिष्ठतां हृदि ममापि दयावती श्रीः ।।

64. विज्ञान वृद्धि हृदये कुरु श्रीः,
सौभाग्य वृद्धि कुरु मे गृहे श्रीः ।
दया सुवृद्धि कुरुतां मयि श्रीः,
सुवर्णवृद्धि कुरु मे गृहे श्रीः ॥

65. न मां त्यजेथाः श्रितकल्पवल्लि,
सद्भक्ति चिन्ता मणि काम धेनो ।
विश्वस्य मात र्भव सुप्रसन्ना,
गृहे कलत्रेषु च पुत्र वर्गे ॥

66. आद्यादि माये त्वमजाण्डवीजं,
त्वमेव साकार निराकृतिस्त्वम् ॥
त्वया धृताश्चाब्ज भवाण्ड संघा,
श्चित्रं चरित्रं तव देवि विष्णोः ॥

67. ब्रह्मरूद्रादयो देवाः वेदाश्चापि न शक्नुयुः ।
महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम् ॥

68. अम्ब त्वद्वत्स वाक्यानि सूक्तासूक्तानि यानि च ।
तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥

69. भवतीं शरणं गत्वा कृतार्थाः स्युः पुरातनाः ।
इति संचिन्त्य मनसा त्वामहं शरणं व्रजे ॥

70. अनन्ताः नित्य सुखिनः त्वद्भक्ता त्वत्परायणाः ।
इति वेद प्रमाणाद्धि देवि त्वां शरणं व्रजे ॥

71. तव प्रतिज्ञा मद्भक्ताः न नश्यन्तीत्यपि क्वचित् ।
इति संचिन्त्य संचिन्त्य प्राणान् संधारयाम्यहम् ॥

72. त्वदधीनस्त्वहं मातस्त्वत्कृपामयि विद्यते ।
यावत्सम्पूर्णकामः स्यां तावद् देहि दयानिधे ॥

73. क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना ।
न जीवन्तीह जलजाः जलं त्यक्त्वा जलग्रहाः ॥

74. यथा हि पुत्र वात्सल्याज्जननी प्रस्नुतस्तनी ।
वत्सं त्वरितमागत्य संप्रीणयति वत्सला ॥

75. यदि स्यां तव पुत्रोऽहं माता त्वं यदि मामकी ।
दयापयोधरस्तन्य सुधाभिरभिषिंच माम् ।।
76. मृग्यो न गुणलेशोऽपि मयि दोषैक मन्दिरे ।
पांसूनां वृष्टि विन्दूनां दोषाणां च मे मितिः ।।
77. पापिनामहं मेवाग्रयो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ।।
78. विधिनाहं न सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ।।
79. कृपा मदग्रजः किं ते अहं किं वा तदग्रज; ।
विचार्य देहि मे वित्तं तव देहि दयानिधे ।।
80. माता पिता त्वं गुरु सद्गति श्रीः,
त्वमेव संजीवन हेतु भूता ।
अन्यन्न मन्ये जगदेक नाथे,
त्वमेव सर्वं मम देवि सत्ये ।।
81. आद्यादि लक्ष्मि भव सुप्रसन्ना,
विशुद्ध विज्ञान सुखैक दोग्ध्री ।
अज्ञानहन्त्री त्रिगुणातिरिक्ता,
प्रज्ञाननेत्री भव सुप्रसन्ना ।।
82. अशेषवाग्जाड्य मलापहन्त्री,
नवं नवं स्पष्ट सुवाक्प्रदायिनी ।
ममेह जिह्वाग्र सुरंग नर्तकी,
भव प्रसन्ना वदने च मे श्रीः ।
83. समस्तसम्पत्सु विराजमाना,
समस्त तेजश्च य भासमाना ।
विष्णुप्रिये त्वं भव दीप्यमाना,
वाग्देवता मे नयने प्रसन्ना ।।
84. सर्व प्रदर्शे सकलार्थदे त्वं,
प्रभासु लावण्य दया प्रदोग्ध्री ।

सुवर्णदे त्वं सुमुखी भव श्रीः,
हिरण्मयी मे नयने प्रसन्ना ॥
85. सर्वार्थदा सर्व जगत्प्रसूतिः,
सर्वेश्वरी सर्व भयापहन्त्री ।
गर्वोन्नता त्वं सुमुखी भव श्रीः,
हिरण्मयी मे नयने प्रसन्ना ॥
86. समस्तविघ्नौघ विनाशकारिणी,
समस्त भक्तोद्धरणे विचक्षणा ।
अनन्त सौभाग्य सुखप्रदायिनी,
हिरण्मयी मे नयने प्रसन्ना ॥
87. देवि प्रसीद दयनीयतमाय,
मह्यं देवाधिनाथ भव देव गणाभिवन्द्ये ।
मातस्तथैव भव संनिहिता दृशोर्मे,
पत्या समं मम मुखे भव सुप्रसन्ना ॥
88. मा वत्स भैरभयदान करोऽर्पितस्ते,
मौलौ ममेति मयि दीन दयानुकम्पे ।
मातः समर्पय मुदा करुणा कटाक्षं,
मांगल्य बीजमिह नः सृज जन्म मातः ॥
89. कटाक्ष इह कामधुक् तव मनस्तु,
चिन्तामणिः करः सुर तरुः सदा नवनिधिस्त्वमेवेन्दिरे ।
भवेत्तव दया रसो मम रसायनं चान्वहं,
मुखं तव कलानिधिर्विविधवांछितार्थ प्रदम् ॥
90. यथा रसस्पर्शनतोऽयसोऽपि,
सुवर्णता स्यात्कमले तथा ते ।
कटाक्ष संस्पर्शनतो जनाना
ममङ्गलानामपि मङ्गलत्वम् ॥
91. देहीति नास्तीति वचः प्रवेशाद्
भीतो रमे त्वां शरणं प्रपद्ये ।

अत: सदाऽस्मिन् अभयप्रदा त्वं
सहैव पत्या मयि सन्निधेहि ।।

92. कल्पद्रुमेण मणिना सहिता सुरम्या,
श्रीस्ते कला मयि रसेन रसायणेन ।
आस्तां यतो मम च दृक् शिरपाणिपाद—
स्पृष्टा: सुवर्ण वपुष: स्थिर जंगमा: स्यु: ।।

93. आद्यादि विष्णो: स्थिरधर्मपत्नी,
त्वमेव पत्या मयि संनिधेहि ।
आद्यादिलक्ष्मि त्वदनुग्रहेण,
पदे पदे मे निधिदर्शनं स्यात् ।।

94. आद्यादि लक्ष्मी हृद्यं पठेद्य:
स राज्य लक्ष्मीमचलां तनोति ।
महादरिद्रोऽपि भवेद्धनाढ्य:,
तदन्वये श्री: स्थिरतां प्रयाति ।।

95. यस्य स्मरण मात्रेण तुष्टा स्याद् विष्णु वल्लभा ।
तस्याभीष्टं ददात्याशु तं पालयति पुत्रवत् ।।

96. इदं रहस्यं हृदयं सर्वकामफलप्रदम् ।
जप: पंच सहस्रं तु पुरश्चरणमुच्यते ।।

97. त्रिकालमेक कालं वा नरो भक्ति समन्वित: ।
य: पठेच्छृणुयाद्वापि स याति परमां श्रियम् ।।

98. महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे ।
इदं श्री हृदयं जप्त्वा पञ्चवारं धनी भवेत् ।।

99. अनेन हृदयेनान्नं गर्भिण्या अभिमन्त्रितम् ।
ददाति तत्कुले पुत्रो जायते श्रीपति स्वयम् ।।

100. नरेण वाऽथवा नार्या लक्ष्मीहृदयमन्त्रिते ।
जले पीते च तद्वंशे मन्दभाग्यो न जायते ।।

101. य: आश्विने मासि शुक्ल पक्षे,
रमोत्सवे संनिहितैक भक्त्या ।

पठेत्तथैकोत्तर वार वृद्धया,
लभेत्स सौवर्णमयीं सुवृष्टिं ॥

102. य एक भक्तोऽन्वहमेक वर्षं,
विशुद्धधी: सप्तति वार जापी,
स मन्दभाग्योऽपि रमाकटाक्षाद्
भवेत्सहस्राक्ष शताधिकश्री: ॥

103. श्रीशांघ्रि भक्ति हरिदास दास्यम्,
प्रसन्नमन्त्रार्थ दृढैक निष्ठाम् ।
गुरो: स्मृति निर्मलवोध वृद्धि,
प्रदेहि मात: परमं पदं श्री: ॥

104. पृथ्वीपतित्वं पुरुषोत्तमत्वं,
विभूति वासं विविधार्थसिद्धिम् ।
सम्पूर्ण कीर्ति वहुवर्षभोगं,
प्रदेहि मे देवि पुन: पुनस्त्वम् ॥

105. वादार्थ सिद्धि वहुलोक वश्यं,
वय: स्थिरत्वं ललनासु भोगम् ।
पौत्रादिलब्धिं सकलार्थ सिद्धि
प्रदेहि मे भार्गवि जन्म जन्मनि ॥

106. सुवर्णवृद्धि कुरु मे गृहे श्री:
विभूतिवृद्धि कुरु मे गृहे श्री: ।
शिरोवीजम्—ॐ यं हं कं लं पं श्रीं
ध्यायेल्लक्ष्मीं प्रहसित मुखीं कोटिवालार्कभासाम्
विद्युद् वर्णाम्वरधरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिज युगं विभ्रतीं स्वर्णपात्रं,
भर्त्रायुक्तां मुहुरभयदां मह्यमप्यच्युत श्री: ॥107॥
गुह्यातिगुह्य गोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिता ॥

इति अथर्वणरहस्ये लक्ष्मीहृदयस्तोत्रंसम्पूर्णम् ॥

नारायणहृदयस्तोत्रम्

1. नारायणस्त्वमेवासि दहराख्ये हृदि स्थितः ।
प्रेरकः प्रेर्यमाणान्त्वया प्रेरितमानसः ॥

2. त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ।
नानोपासन मार्गाणां भावहृद् भावबोधकः ॥

3. भावार्थकृद् भावभूतो भाव सौख्य प्रदो भव ।
त्वन्माया मोहितं विश्वं त्वयैव परिकल्पितस् ॥

4. त्वदधिष्ठान मात्रेण सैषा सर्वार्थकारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान् समर्पय ॥

5. न मे त्वदन्यस्त्राताऽस्ति त्वदन्यं नहि दैवतम् ।
त्वदन्यं न हि जानामि पालकं पुण्यरूपकम् ॥

6. यावत्संसारिको भावो मनस्थो भावनात्मकः ।
तावत्सिद्धिः भवेत्साध्या सर्वथा सर्वदा विभो ॥

7. पापिनामहमेवाग्रयो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥

8. त्वयाप्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ।
आमयो नैव सृष्टश्चेदौषधस्य वृथोदयः ॥

9. पापसंघ परिक्रान्तः पापात्मा पापरूपधृक् ।
त्वदन्यः कोऽत्र पापेभ्यस्त्राता मे जगतीतले ॥

10. त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या च गुरुस्त्वमेव
त्वमेव सर्वं मम देव देव ॥

11. प्रार्थना दशकं चैव मूलाष्टकमुदाहृतम् ।
यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥

———

अथ अथर्वणवेदोक्त प्रत्यंगिरासूक्तम्

(यह मन्त्र पाठ जीवन की महत्त्वपूर्ण उपलब्धि है। इसके पाठ से मनुष्य का सभी प्रकार का कल्याण होता है। अनेकविध आपदाओं को पार कर जीवन में शान्ति एवं सुख प्राप्त होता है। इससे जीवन की रक्षा होती है। व्यक्ति कल्याण को देखता है। जीवन का श्रेय एवं प्रेय प्राप्त करता है।

देवी प्रत्यंगिरा का पूजन कर—दशदिशाओं का पूजन करे। अन्त में 48 मन्त्रों का पाठ कर दधि-मधु-धृत से विल्व की समिधा में हवन करे। 27 दिन करने का विधान है। एक चमत्कारी सर्वसिद्ध विधान है।

यह वेदोक्त विधि है। आज तक यह विधान अप्रकाशित रहा है।

ओं श्री गणेशाय नम:। ओं नम: प्रत्यंगिरायै ॥

ओं सुमुखश्चैक० । अद्य पूर्वेत्यादि ॥

अथ प्रत्यंगिरा सूक्त पारायणमन्त्रं करिष्ये ।

ओं अखण्ड मण्डला कारं व्याप्तं येन चराचरं ।
तत्पदं दर्शितं येन तस्मै श्री गुरुवे नम: ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्या संप्रदाय कर्तृभ्यो वंश ऋषिभ्यो नमो गुरुभ्य: ।

सर्वोपप्लव रहित: प्रज्ञान घन: प्रत्यगर्थो ब्रह्मैवाहमस्मि ।

ओं नमो भगवते अथर्वणवेदाय ।

ब्रह्म लोके सुखासीनं सर्व लोके गुरुं शिवम् ।
सर्व देव मयं साक्षात् सर्व तेजो मयं परम् ॥
सर्वविद्या करं सम्यग् ज्ञानोपायार्णव प्लवम् ।
प्रणम्य सर्व देवाश्च ऋषय: प्रष्टुमागता: ॥
वशिष्टो वामदेवश्च जावालि: कपिलस्तथा ।
नारदश्च शुक: कण्वो विश्वामित्रश्च कश्यप: ॥
अगस्त्यश्च पुलस्त्यश्च दुर्वासोरण्यकादय: ।
एवमादि मुनीन्द्राणां वृन्द मध्ये पितामहम् ॥
पप्रच्छ स मुनिश्रेष्ठ: शौनक: सुमहातपा: ।

अथर्वणस्य माहात्म्यं यथावद् वक्तुमर्हति ॥
उवाच तस्मै देवेशो रहस्यं परमं शिवम् ।
सर्वं देवमयं साक्षादथर्वण मिहोच्यते ॥
तादृशं मन्त्र भागेषु प्रत्यंगिरस उच्यते ।
चत्वारिंशद् ऋच्यनुष्टुप् अष्ट ऋग्भिश्च त्रिष्टुभि: ।
गुह्याद् गुह्यतरं साक्षात् त्रैलोक्य विजयं पुरा ॥
शिवेनोक्तं मयालब्धं समाहितमना: शृणु ।
शान्तौ पुष्टौ च वृद्धौ च अपमृत्यु भये तथा ॥
आभिचारिक कृत्यायां शान्त्यां प्रत्यभिचारिके ।
निग्रहानुग्रहे चैव सर्वं पापहरं शुभम् ॥
भूत प्रेत पिशाचादि ग्रहवाधा निवारणम् ।
स्तंभनं पर सैन्यस्य स्व सैन्यस्य च रक्षणम् ॥
गजाश्वयो: प्रशान्ति: स्यात् राष्ट्रशान्तिर्भयापहम् ।
स्वदेश भ्रंश शमनं पर चक्र भयापहम् ॥
सर्व शत्रु क्षय करं वृष्टिस्तम्भनिवारणम् ।
उत्पात शान्ति: देवानां कोप शान्ति स्तथैव च ॥
ग्रह शान्ति रोग शान्ति: कृत्या शान्ति स्तथैव च ।
एवमादीनि कर्माणि सिध्यन्ति फलवन्ति च ॥
कुलद्वय विशुद्धात्मा मन्त्रार्थ ज्ञान कोविद: ।
आचार-प्रभवा शुद्धि: वाक्सिद्धि: मानसस्तथा ॥
शान्त वुद्धि: प्रसन्नात्मा जितक्रोधो जितेन्द्रिय: ।
दंभाहंकारमोहादि रहितो ज्ञानवित्तम: ॥
ध्यानयोगासनारूढ: सर्वाभीष्ट प्रदायकम् ।
मन्त्रमांगिरसं लव्ध्वा स एक: सर्व विज्जयी ॥
विनियोगमथो वक्ष्ये चत्वारिंशद् ऋचेन च ।
प्रत्यंगिरा नाम ऋषि: छन्दोऽनुष्टुप् प्रकीर्तितम् ॥
उग्र कृत्या देवता स्यात् सर्वारिष्ट विनाशिनी ।
विनियोगोऽत्र सर्वेषु कार्येषु च तथाविध: ॥

लक्षयेत्प्रत्यरीन् सर्वान् ब्राह्मणे नैव योजयेत् ।
प्रयुक्तो ब्राह्मणे मन्त्रो विपरीतफलप्रद: ।।
उत्तमं सर्व विद्यानामैहिकामुष्मिक प्रदम् ।
तत्रादौ शरीर साधनार्थं प्राजापत्यं तथा चरेत् ।।

कुशोदकेन पंच गव्येन वा चरु हविष्या शिवा कपिला क्षीरं भुंजान: ।

दिन त्रयं प्रत्यहमष्टोत्तरशतं जपेत् ।

कृत पुरश्चरणो भवति ।

ततो दुर्गा गायत्रीं जपेत् दशवारम् ।

उों कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि तन्नो दुर्गा प्रचोदयात् ।।

तत: स्वात्मरक्षां कुर्याद् यथा ।

ओम इत्यादि मन्त्राणां प्रत्यंगिरा ऋषि: अतिजगती छन्द: इन्द्रादयो देवता: आत्म सुरक्षार्थे जपे विनियोग: ।

पूर्वदिग्भागस्य इन्द्रो देवता ।

अ/20/5/70—उों इन्द्रो वो विश्वत स्परि हवामहे जनेभ्य: अस्माकमस्तु केवल: । इन्द्राय नम: ।। इन्द्रो मे देव: सुप्रीत: सुप्रसन्नो वरदो भवतु । शमग्नि रग्निभि: कर छन्नस्तपतु सूर्य: । शं वातो वातु रया अपस्रिध: ।

यो मे करोति प्रद्वारे यो गृहे यो निवेशने ।

यो मे केश नखे कुर्यादञ्जने दन्त धावने ।

यो मे स्व क्षेत्र कलत्र पशु पुत्र मित्र भ्रातृगृह धन देहाभिमानिन: प्राणान्वाधितं पूर्वं दिग्भागादागत: पाप्मा पापकेनेहकर्मणा इन्द्रस्तं देवो राजा जंभयतु । जृंभयतु । स्तंभयतु । शापयतु । शोषयतु । मोहयतु । नाशयतु । मारयतु । क्षोभयतु । त्रासयतु । भ्रामयतु क्लेशयतु । कलिं तस्मै प्रयच्छतु ।

उों कृतं मम शिवं । मम शुभं मम शान्ति: स्वस्त्ययनं मम । भद्रं नो अपि वात यमन: । मरुतामोजसे स्वाहा । इन्द्रो विश्वस्य राजति शन्नोभव द्विपदेशं चतुष्पदे । यो नो रयिं दुश्चरितासो अग्ने जह्नु: मर्तासो अनृतं वदन्त: तेषां वपूंष्यर्चिषा जातवेद: शुष्कं न वृक्षमभिसंदहस्व ।

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद: । स न पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि: । उों नमो विष्णु गणेभ्य: सर्वं रक्षा करेभ्य: । इन्द्राय नम: । **पूर्वदिग्भागं वंधयामि ।**

2. आग्नेय दिग्भागस्य अग्निदेवता ।

उों अग्नि दूतं वृणीमहे होतारं विश्व वेदसं । अ/20/9/10

अस्य यज्ञस्य सुक्रतम् । अग्नये नम: ।

अग्नि: मे देव: सुप्रीत: सुप्रसन्नो वरदो भवतु ।

शमग्निरग्निभि: करछन्नस्तपतु सूर्य: ।

शं वातो वातु रया अपस्त्रिध: ।

यो मे करोति प्रद्वारे यो गृहे यो निवेशने ।

यो मे केशनखे कुर्यादञ्जने दन्त धावने ।।

यो मे स्वक्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिन: । प्राणान्वाधितुं आग्नेय दिग्भागादागत: पाप्मा पापकेनेह कर्मणा । अग्नेस्तं देवी राजा जंभयतु । जृंभयतु । स्तंभयतु । शापयतु । शोषयतु । मोहयतु । नाशयतु । मारयतु । क्षोभयतु । त्रासयतु भ्रामयतु । क्लेशयतु । कलिं तस्मै प्रयच्छतु ।। उों कृतं मम शिवं मम शुभम् मम शान्ति: स्वस्त्ययनं मम ।

भद्रं नो पि वातय मन: मरुतामोजसे स्वाहा । इन्द्रो विश्वस्य राजति शन्नो भव द्विपदे शं चतुष्पदे । यो नो रयिं दुश्चरितासो अग्ने जह्वः मर्तासो अनृतं वदन्त: । तेषां वपूंष्यर्चिषा जातवेद: शुष्कं न वृक्षमभि संदहस्व । जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेद: । स न: पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि: । उों नमो विष्णु गणेभ्य: सर्वं रक्षा करेभ्य: । अग्नये नम: । **आग्नेय दिग्भागं वन्धयामि ।।**

3. दक्षिणादिग्भागस्य यमो देवता ।

उों यमाय सोमं सुनुत यमाय जुहुता हवि: । ऋ/10/14/13

यमं ह यज्ञो गच्छत्यग्नि दूतो अरंकृत: । अ/18/2/1

यमाय नम: । यमो मे देव: सुप्रीत: सुप्रसन्नो वरदो भवतु । शमग्नि रग्निभि: कर छन्नस्तपतु सूर्य: । शं वातो वात्वरय: अपस्त्रिध: । यो मे करोति प्रद्वारे यो गृहे यो निवेशने ।

यो मे केशनखे कुर्यादञ्जने दन्तधावने। यो मे स्व क्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिन:। प्राणान्वाधितुं दक्षिणदिग्भागादागत:। पाप्मा पापकेनेह कर्मणा यमस्तं देवो राजा जंभयतु। जृंभयतु। स्तंभयतु। शापयतु। शोषयतु। मोहयतु। नाशयतु। मारयतु। क्षोभयतु। त्रासयतु। भ्रामयतु। क्लेशयतु कलिं तस्मै प्रयच्छतु। उँ कृतं मम शिवं मम शुभं मम शान्ति: स्वस्त्ययनं मम भद्रं नो अपि वातय मन: मरुतामोजसे स्वाहा। इन्द्रो विश्वस्य राजति। शं नो भव द्विपदे शं चतुष्पदे। यो नो रयिं दुश्चरितासो अग्ने जह्रु: मर्त्या सो अनृतं वदन्त:। तेषां वपूंष्यर्चिषा जातवेद: शुष्कन्न वृक्षमभि संदहस्व। जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद:। स न पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि:। उँ नमो विष्णु गणेभ्य: सर्वं रक्षा करेभ्य:। यमाय नम:।

दक्षिण दिग्भागं वन्धयामि।

4. निर्ऋति दिग्भागस्य निर्ऋति: देवता॥

य/12/62—उँ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहि तस्करस्य। अन्यमस्मदिच्छ सात इत्या नमो देवि निर्ऋते तुभ्यमस्तु। निर्ऋतये नम:।। निर्ऋति: मे देव: सुप्रीत: सुप्रसन्नो वरदो भवतु। शमग्नि रग्निभि: करच्छन्नस्तपतु सूर्य:। शं वातो वात्वरया अपस्रिध:। यो मे करोति प्रद्वारे यो गृहे यो निवेशने। यो मे केशनखे कुर्यादञ्जने दन्तधावने। यो मे स्व क्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिन: प्राणान्वाधितुं निर्ऋति दिग्भागादागत:। पाप्मा पापकेनेह कर्मणा निर्ऋति: तं देवो राजा। जंभयतु। जृंभयतु। स्तंभयतु। क्षोभयतु। त्रासयतु। भ्रामयतु। क्लेशयतु कलिं तस्मै प्रयच्छतु। उँ कृतं मम शिवं मम शुभं मम शान्ति: स्वस्त्ययनं मम। भद्रं नो अपि वातय मन: मरुता मोजसे स्वाहा। इन्द्रो विश्वस्य राजति शन्नो भव द्विपदे शं चतुष्पदे। यो नो रयिं दुश्चरितासो अग्ने जह्रु: मर्त्यासो अनृतं वदन्त:। तेषां वपूंष्यर्चिषा जातयेद: शुष्कं न वृक्षमभि संदहस्व। जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद: स न: पर्षदति। दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि:। उँ नमो विष्णु गणेभ्य: सर्वं रक्षा करेभ्य: निर्ऋतये नम:।

निर्ऋति दिग्भागं वंधयामि।

5. पश्चिस दिग्भागस्य वरुणो देवता ।

(हे वरुण ! मन्त्रयुक्त वाणी से स्तवन करता हुआ तुम से ही याचना करता हूं । हवि वाला यजमान, क्रोध न करने की आप से प्रार्थना करता हुआ आयु मांगता है) ।

ऋ/1/24/11—उों तत्त्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह वोध्युरूशᳬसमान आयुः प्रमोषीः । वरुणाय नमः । वरुणो मे देवः सुप्रीतः सुप्रसन्नो वरदोभवतु । शमग्निरग्निभिः करच्छन्नस्तपतु सूर्यः । शं वातो वात्वरया अपस्त्रिधः । यो मे करोति प्रद्वारे यो गृहे यो निवेशने । यो मे केश नखे कुर्यादञ्जने दन्तधावने । यो मे स्वक्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिनः प्राणान्वाधितुं पश्चिम दिग्भागादागतः । पाप्मा पापकेनेह कर्मणा वरुणस्तं देवो राजा जंभयतु । जृंभयतु । स्तंभयतु । शापयतु । शोषयतु । मोहयतु । नाशयतु । मारयतु । क्षोभयतु । त्रासयतु । भ्रामयतु । क्लेशयतु कलिं तस्मै प्रयच्छतु । उों कृतं मम शिवं मम शुभं मम शान्तिः स्वस्त्ययनं मम । भद्रन्नो अपि वातय मनः मरुतामोजसे स्वाहा । इन्द्रो विश्वस्य राजति शन्नो भव द्विपदे श चतुष्पदे । यो नो रयिं दुश्चरितासो अग्ने जह्रुः मर्त्या सो अनृतं वदन्तः । तेषां वपूंष्यर्चिपा जातवेदः शुष्कं न वृक्षमभिसंदहस्व । जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वाना-वेवसिन्धुं दुरिता त्यग्निः । उों नमो विष्णु गणेभ्यः । सर्व रक्षा करेभ्यः । **पश्चिमदिग्भागं वन्धयामि ।**

6. वायु दिग्भागस्य वायुः देवता ।

(हे विचित्र कर्म वाले वायो ! तुम यज्ञ के स्वामी और त्वष्टा के जामाता हो । हम आप की रक्षाएं प्राप्त करें) ।

उों तव वायवृतस्पते त्वष्टु र्जामातरद्भुतं । अवांस्या-वृणीमहे-वायवे नमः । ऋ/8/26/21

वायुर्मे देवः सुप्रीतः सुप्रसन्नो वरदो भवतु ।
शमग्नि रग्निभिः करच्छन्नस्तपतु सूर्यः ।
शं वातो वात्वरया अपस्त्रिधः । यो मे करोति प्रद्वारे यो गृहे यो निवेशने ।

यो मे केशनखे कुर्यादञ्जने दन्त धावने। यो मे स्वक्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिन:। प्राणान्वाधितु वायु दिग्भागादागत: पाप्मा पापकेनेह कर्मणा वायुस्तं देवो राजा जंभयतु। जृंभयतु। स्तंभयतु। शापयतु। शोषयतु। मोहयतु। नाशयतु। मारयतु। क्षोभयतु। त्रासयतु। भ्रामयतु। क्लेशयतु कलिं तस्मै प्रयच्छतु।

उों कृतं मम शिवं मम शुभं मम शान्ति: स्वस्त्ययनं मम। भद्रं नो अपि वातय मन: मरुतामोजसे स्वाहा। इन्द्रो विश्वस्य राजति शं नो भव द्विपदेशं चतुष्पदे। यो नो रयिं दुश्चरितासो अग्ने जह्रु: मर्तासो अनृतं वदन्त:। तेषां वपूंष्यर्चिषा जातवेद: शुष्कन्न वृक्षमभि संदहस्व। जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद:। स न: पर्षदति दुर्गाणि विश्वाना-वेव सिन्धुं दुरिता त्यग्नि।

उों नमो विष्णुगणेभ्य: सर्व रक्षा करेभ्य:-वायवे नम:।

वायुदिग्भागं वन्धयामि।

7. उत्तर दिग्भागस्य कुवेरो देवता।

(गौ, अश्व के देने वाले तथा कर्मवान्, गृहकार्य कुशल, यज्ञाधिकारी, पितरों को यश दिलाने वाले पुत्र के दाता सोम को हवि देनी चाहिये)।

उों सोमो धेनुं सोमो अर्वन्तमाशु: सोमो वीरं कर्मण्यं ददाति। सादन्यं विदत्थ्यं सभेयं पितृ श्रवणं यो ददाशदस्मै—कुवेराय नम:।

ऋ/1/91/20

कुवेरो मे देव: सुप्रीत: सुप्रसन्नो वरदो भवतु।

शमग्निरग्निभि: करच्छन्नस्तपतु सूर्य:।

शं वातो वात्वरया अपस्त्रिध:। यो मे करोति प्रद्वारे यो गृहे यो निवेशने। यो मे केशेनखे कुर्यादञ्जने दन्तधावने। यो मे स्वक्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिन: प्राणान्वाधितुं उत्तर दिग्भागादागत: पाप्मा पापकेनेह कर्मणा कुवेरस्तं देवो राजा जंभयतु। जृंभयतु। स्तंभयतु। शापयतु। शोषयतु। मोहयतु। नाशयतु। मारयतु। क्षोभयतु। त्रासयतु। भ्रामयतु। क्लेशयतु कलिं तस्मै प्रयच्छतु। उों कृतं मम शिवं मम शुभं मम शान्ति: स्वस्त्ययनं मम। भद्रं नो अपि वाताय मन: मरुता-मोजसे स्वाहा। इन्द्रो विश्वस्य राजति। शन्नोभव द्विपदे शं चतुष्पदे।

यो नो रयिं दुश्चरितासो अग्ने जह्रु: मर्त्यासो अनृतं वदन्त: तेषां वपूंष्यर्चिषा जातवेद: शुष्कन्न वृक्षमभि-संदहस्व । जातवेदसे सुनवाम सोम-मरातीयतो निदहाति वेद: । स न: पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि: । उों नमो विष्णु गणेभ्य: सर्वरक्षाकरेभ्य: कुवेराय नम: ।

उत्तर दिग्भागं वन्धयामि ।

8. ईशान दिग्भागस्य ईशानो देवता ।

(स्थावर-जंगम के पालनकर्त्ता, बुद्धि प्रेरक विश्वे देवों को हम रक्षार्थ बुलाते हैं, जिससे अहिंसित पूषा हमारे धन के बढ़ाने वाले और रक्षक हों) ।

उों तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् । पूषानो यथा वेदसा मसद्‌वृधे रक्षितापायुरदब्ध: स्वस्तये—ईशानाय नम: । ऋ/1/89/5

ईशानो मे देव: सुप्रीत: सुप्रसन्नो वरदो भवतु ।

शमग्नि रग्निभि: करच्छन्नस्तपतु सूर्य: । शं वातो वात्वरया अपस्त्रिध: । यो मे करोति प्रद्वारे यो गृहे यो निवेशने । यो मे केशनखे कुर्यादञ्जने दन्तधावने । यो मे स्वक्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिन: प्राणान्वाधितुं—ईशानदिग्भागादागत: पाप्मा पापकेनेह कर्मणा ईशानस्तं देवो राजा जंभयतु । जृंभयतु । स्तंभयतु । शापयतु । शोपयतु । मोहयतु । नाशयतु । मारयतु । क्षोभयतु । त्रासयतु । भ्रामयतु । क्लेशयतु कलिं तस्मै प्रयच्छतु । उों कृतं मम शिवं मम शुभं मम शान्ति: स्वस्त्ययनं मम । भद्रं नो अपि वातय मन: मरुता मोजसे स्वाहा । इन्द्रो विश्वस्य राजति । शन्नो भव द्विपदे शं चतुष्पदे । यो नो रयिं दुश्चरितासो अग्ने जह्रु: मर्त्यासो अनृतं वदन्त: । तेषां वपूंष्यर्चिषा जातवेद: शुष्कं न वृक्षमभि संदहस्व । जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद: । स न: पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दूरिता त्यग्नि: । उों नमो विष्णु-गणेभ्य: सर्व रक्षाकरेभ्य:—ईशानाय नम: ।

ईशानदिग्भागं वंधयामि ।

9. उों ऊर्ध्व दिग्भागस्य ब्रह्मा देवता

य/13/3 उों ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमत: सुरुचो वेन आव: ।

सुवुध्न्या उपमा अस्य विष्ठा: सतश्च योनिमसतश्च विव:—ब्रह्मणे नम: ।

ब्रह्मा देव: सुप्रीत: सुप्रसन्नो वरदो भवतु ।

शमग्नि रग्निभि: करच्छन्नस्तपतु सूर्य: ।

शं वातो वात्वरया अपस्त्रिध: । यो मे करोति प्रद्वारे यो गृहे यो निवेशने । यो मे केशनखे कुर्यादञ्जने दन्तधावने । यो मे स्व क्षेत्र कलत्र पशु पुत्र मित्रभ्रातृ गृह धन देहाभिमानिन: । प्राणान्वाधितुं ऊर्ध्वदिग्भागादागत: । पाप्मा पापकेनेह कर्मणा ब्रह्मा त्वं देवो राजा जंभयतु । जृंभयतु । स्तंभयतु । शापयतु । शोषयतु । मोहयतु । नाशयतु । मारयतु । क्षोभयतु । त्रासयतु । भ्रामयतु । क्लेशयतु कलिं तस्मै प्रयच्छतु । उों कृतं मम शिवं मम शुभं मम शान्ति: स्वस्त्ययनं मम ।
भद्रं नो अपि वातय मन: मरुताभोजसे स्वाहा । इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे । यो नो रयिं दुश्चरितासोऽग्ने जह्नु: मर्त्यासो अनृतं वदन्त: । तेषां वपूंष्यर्चिपा जातवेद: शुष्कं न वृक्षमभिसंदहस्व । जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेद: । स न पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि: । उों नमो विष्णु गणेभ्य: सर्व रक्षाकरेभ्य:—ब्रह्मणे नम: । **ऊर्ध्वदिग्भागं वन्धयामि ।**

10. अधो दिग्भागस्य विष्णु देवता

य/5/15 उों इदं विष्णु विचक्रमे त्रेधा निदधे पदं समूढमस्य पाꣳसुरे स्वाहा । विष्णवे नम: । विष्णु: मे देव: सुप्रीत: सुप्रसन्नो वरदो भवतु । शमग्नि रग्निभि: करच्छन्नस्तपतु सूर्य: । शं वातो वात्वरया अपस्त्रिध: । यो मे करोति प्रद्वारे यो गृहे यो निवेशने । यो मे केशनखे कुर्यादञ्जने दन्तधावने । यो मे स्वक्षेत्र कलत्र पशु पुत्र मित्र भ्रातृगृह धन देहाभिमानिन: प्राणान्वाधितुं अधोदिग्भागादागत: पाप्मा पापकेनेह कर्मणा विष्णुस्तं देवो राजा जृंभयतु । जंभयतु । स्तंभयतु । शापयतु । शोषयतु । मोहयतु । नाशयतु । मारयतु । क्षोभयतु । त्रासयतु । भ्रामयतु । क्लेशयतु कलिं तस्मै प्रयच्छतु । उों कृतं मम शिवं मम शुभं मम शान्ति: स्वस्त्ययनं मम । भद्रं नो अपि वातय मन: मरुता मोजसे स्वाहा । इन्द्रो

विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे । यो नो रयिं दुश्चरितासो अग्नेजह्नुः मर्त्यासो अनृतं वदन्तः । तेषां वपूंष्यर्चिषाजातवेदः शुष्कं न वृक्षमभिसंदहस्व । जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वानावेवसिन्धुं दुरितात्यग्निः । उों नमो विष्णु गणेभ्यः सर्व रक्षा करेभ्यः—विष्णवे नमः । **अधो दिग्भागं वन्धयामि ।**

11. अन्तरिक्ष दिग्भागस्य रुद्रो देवता

(मेधावी. अभीष्ट वर्द्धक महावली रुद्र के निमित्त किस स्तुतिकापाठ करें) ।

उों कद्रुद्राय प्रचतसे मीढुष्टमाय तव्यसे । वोचेमशंतमः रुद्रे । शर्वे त्येष रुद्रः तस्मै रुद्राय नमो अस्तु रुद्राय नमः । ऋ/1/43/

रुद्रो मे देवः सुप्रीतः सुप्रसन्नो वरदो भवतु ।

शमग्नि रग्निभिः करच्छन्नस्तपतु सूर्यः ।

शं वातो वात्वरया अपस्त्रिधः । यो मे करोति प्रद्वारे यो गृहे यो निवेशने । ये मे केशनखे कुर्यादिञ्जने दन्तधावने । यो मे स्वक्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिनः प्राणान्वाधितुं अन्तरिक्ष दिग्भागादागतः । पाप्मा पापकेनेह कर्मणा रुद्रस्तं देवो राजा जंभयतु । जृंभयतु । स्तंभयतु । शापयतु । शोपयतु । मोहयतु । नाशयतु कलिं तस्मै प्रयच्छतु । उों कृतं मम शिवं मम शुभं मम शान्तिः स्वस्त्ययनं मम । भद्रं नो अपि वातय मनः मरुतामोजसे स्वाहा । इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे । यो नो रयिं दुश्चरितासो अग्नेजह्नुः मर्त्या सो अनृतं वदन्तः । तेषां वपूंष्यर्चिषा जातवेदः । शुष्कं न वृक्षमभिसंदहस्व । जातवेदसे सुनवाम सोम मरातींयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः । उों नमो विष्णुगणेभ्यः सर्वरक्षाकरेभ्यः रुद्राय नमः । **अन्तरिक्ष दिग्भागं वन्धयामि ।**

12. अवान्तर दिग्भागस्य गरुडो देवता-

य/12/4—सुपर्णोहि गरुत्मान् त्रिवृत्ते शिरोगायत्रं चक्षु र्वृहद्रथन्तरे पक्षौ । स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम । सामते तनू र्वमि देव्यं

यज्ञाय यज्ञियं पुच्छं धिष्ण्याः शफाः सुपर्णोसि गुरुत्मान् दिवं गच्छ स्वः पत । गरुत्मते नमः । गरुडो मे देवः सुप्रीतः सुप्रसन्नो वरदो भवतु । शमग्मिरग्निभिः करच्छन्नस्तपतु सूर्यः शं वातो वात्वरया अपस्निधः । यो मे करोति प्रद्वारे यो गृहे यो निवेशने । यो मे केशनखे कुर्यादञ्जने दन्तधावने । यो मे स्व क्षेत्र कलत्र पशु पुत्र मित्र भ्रातृ गृह धन देहाभिमानिनः प्राणान्वाधितु अवान्तर दिग्भागादागतः पाप्मा पपकेनेह कर्मणा । गरुडस्तं देवो राजा जंभयतु । जृंभयतु । स्तंभयतु । शापयतु । शोषयतु । मोहयतु । नाशयतु । मारयतु । क्षोभयतु । त्रासयतु । भ्रामयतु । क्लेशयतु कलिं तस्मै प्रयच्छतु । ओं कृतं मम शिवं मम शुभं मम शान्ति स्वस्त्ययनं मम । भद्रं नो अपि वातय मनः मरुतामोजसे स्वाहा । इन्द्रो विश्वस्य राजति । शन्नो भव द्विपदे शं चतुष्पदे । यो नो रयिं दुश्चरितासो अग्ने जह्रुः मर्तासो अनृतं वदन्तः । तेषां वपूंष्यर्चिषा जातवेदः शुष्कं न वृक्षमभिसंदहस्व । जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः । ओं नमो विष्णु गणेभ्यः सर्व रक्षाकरेभ्यः गरुत्मते नमः ।

अवान्तर दिग्भागं वन्धयामि ।

सर्व दिग्भागस्य पर ब्रह्म देवता ।

यो मे आध्यात्मिकाधिदैविकाधिभौतिकादागतः ।

पाप्मा पापकेनेह कर्मणा । परं ब्रह्म तं देवो राजा ।

ओं भूः तत्सवितुर्वरेण्यम् । ओं भुवः भर्गो देवस्य धीमहि । ओं स्वः धियो योनः प्रचोदयात् ।

ओं भूर्भुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । ओं स्वः धियो यो नः प्रचोदयात् । ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् । परो रजसि सावदोम् ।। ओं श्रियै नमः । ओं पुष्ट्यै नमः । ओं तुष्ट्यै नमः । ओं भूत्यै नमः । ओं प्रभूत्यै नमः । ओं ज्वालामुख्यै नमः ।

ओं ज्वालामुख्यै नमः । ओं प्रज्वालामुख्यै नमः । ओं ब्रह्मज्वालामुख्यै नमः । ओं आत्माज्वालामुख्यै नमः । ओं वरदायै नमः । ओं सिद्धिविनाय-

काय नमः। ओं शीघ्रसिद्धिविनायकाय नमः। ओं अनेकाय नमः। ओं नीति मतये नमः। ओं प्रकामपतये नमः।

इत्यंगिरा देवताः॥ ओं ऐं ह्लीं हं सौं प्रत्यंगिरादेवि सकल मनोरथान् साधय साधय देवि तुभ्यं नमः। पुनः कवचदिग्वन्धनं करिष्ये।

शिरो रक्षतु ब्रह्माणी मुखं माहेश्वरी तथा।
कौमारी हृदयं चैव वैष्णवी नाभी रक्षतु।
वाराही कटि-गुह्यं च ऐन्द्रीरुरुद्वयं तथा।
चामुण्डा जानुदेशं च पादौ रक्षत चण्डिका।
अंग प्रत्यंगिरा रक्षेत् सर्वं रक्षन्तु मातरः।
ओं आं ह्लीं क्रों महायोगिनी गौरी हुं फट् स्वाहा।
त्रिशूल भीषणैः हस्तैः समभिः त्रिभिः अंघ्रिभिः।
जिह्वायां रक्तवर्षिण्यां लेलिहान निजोन्मुखाम्।
उद्गरन्तीव नेत्राभ्यां आद्या शक्तिः हविः भुजाम्।
नरास्थि मालां बिभ्राणां रिपुत्वक्कुल मेखलाम्।
कपाल-कुण्डलोपेतां प्रहसन्निर्भयाननाम्।
ओष्ठे च लम्बमानाभ्यां स्तनाभ्यां मुक्तमूर्धजाम्।
अधिरूढां खर स्कन्ध मन्धकार निभाकृतिम्।
स्फुलिंग मण्डलोपेतां विमुक्ता कोप भूषणाम्।
उत्थाय प्रांजलि भूंत्वा किं करोमीति भाषसे।

अथ पुष्पांजलि

1. ओ ह्लीं नमः कृष्ण वाससे शतसहस्रानिल कोटि सिंहासने सहस्रवदने अष्टादश भुजे महाबलपराक्रम पुंजिते। अपराजिता देवि महा प्रत्यंगिरे परसैन्य परकर्म विध्वंसिनी परमंत्रोत्पाटनी सर्व भूतदमनीके। ज्रौं प्रें ह्लीं क्रौं मांस परिवारेभ्यः सर्वोपद्रवेभ्यः रक्ष रक्ष ह्लीं क्रों सर्वदेवानां मुखं स्तंभय-स्तंभय। सर्व विघ्नान् छिन्दय छिदय सर्व दुष्टान् भक्षय भक्षय। वर्मालय ज्वाला जिह्वे करालवक्त्रे सर्व यन्त्राणि स्फोटय स्फोटय। शृंखलस्त्रोटय त्रोटय। सर्व मुद्राः विद्रावय विद्रावय।

ज्वाला जिह्वे कराल वदने प्रत्यंगिरे मां रक्ष रक्ष।

मम शत्रून् भक्षय भक्षय इति प्रथम पुष्पाञ्जलिं समर्पयमि । ऊँ

2. ह्लीं ह्लां ह्लू जंभिनी मोहे मोहिनी । स्तंभे स्तंभिनी ।

ऊँ हूं हुं फट् स्वाहा । इति द्वितीय पुष्पाञ्जलिं समर्पयामि ।

3. तच्छं यो: शंयु विश्वेदेवा: शक्वरी शान्त्यर्थे जपे विनियोग: ।

तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये ।

देवी स्वस्ति रस्तुन: । स्वस्ति: मानुषेभ्य: ।

ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे शं चतुष्पदे । ऊँ शान्ति: शान्ति: शान्ति: । तै/2/6/10/2

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्मृत्यो मुंक्षीय मामृतात् । य/3/60

सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इ डस्पदे समिध्यसे स नो वसून्या भर । ऋ/10/191/1

तत्सवितु: वरेण्यं भर्गोदेवस्य धीमहि धियो योन: प्रचोदयात् ।
य/3/35

जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेद: । स न: पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि: । ऋ/1/99/1

तामग्नि वर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नम: । सुतरसि तरसे नम: ।

अग्ने त्वं पारयानव्यो अस्मान् स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी वहुला न उर्वी भवातोकाय तनयाय शंयो: । ऋ.1/189/2

विश्ववानि नो दुर्गहा जातवेद: सिंधुं न नावा दुरितातिपर्षि ।

अग्ने अत्रिवन्नमसा गृणानोऽस्माकं वोध्यविता तनूनाम् ।। ऋ./5/4/9 पृतना जितऽसहमान मग्नि मुक्थै: हवामहे परमात् सधस्थात् । स न: पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरिता त्यग्नि: ।। एवापित्रे विश्व देवाय वृष्णे यज्ञै:विधे यमनसा हविर्भि: । तै/1/8/22/6

वृहस्पते सुप्रजावीरवंतो वयं स्याम पतयो रयीणाम् ।।

एवेन्द्राग्निभ्यां पितृवन्नवीयो मंधातृवदंगिरस्वदवाचि: ।

त्रिधातुना शर्मणा पातमस्मान् वयं स्याम पतयो रयीणाम् ।

ऋ/8/40/12

यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणाना: ।
जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् ।

ऋ/5/55/10

त्वं सोम पितृभि: संविदानोऽनु द्यावापृथिवी आततंथ ।
तस्मैत इन्द्रो हविषा विधेम वयं स्याम पतयो रयीणाम् ।

तै/2/6/12/4

प्रजापते न त्व देतान्यन्यो विश्वा जातानि परिता वभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥

ऋ/10/121/10

नमो व्रह्मणे नमो अस्त्वग्नये नम: पृथिव्यै नम: औषधीभ्य: । नमो वाचे नमो वाचस्पतये नमो विष्णवे वृहते करोमि भद्रं नो अपि वातय मन: ।

ॐ शान्ति: शान्ति: इति तृतीय पुष्पाञ्जलिं समर्पयामि । इत्याद्यन्तयो: जपित्वा ।

विनियोग:—ॐ अस्य श्री प्रत्यंगिरा सूक्त व्रह्मविद्याया प्रत्यंगिरसो भगवन्त: ऋषय: व्रह्माण: परमेष्ठिन: परम ऋषय: द्वात्रिंशदृचानुष्टुप् छन्द: । यथे त्रयर्च: पंक्ति: छन्द: । अव व्रह्मेत्येक पदा गायत्री । ये नो इति त्रिष्टुप् छन्द: । शिष्टानुष्टुभ: सर्वापत्प्रतिहन्त्री कृत्या भगवती व्रह्माग्नि: देवता कालाग्निरुद्रा: श्री महादेवो देवोऽधिदेवता । क्रां वीजं, फट् शक्ति:, स्वाहा कीलकं मदीय पुरुषार्थस्य ये ये अस्मत्प्रतिकूलकारिण: समूलोन्मूलत्वे सानुकूलत्वे वा जपे विनियोग: ।

कर न्यास:—क्रां ह्लां खट् फट् जहि अंगुष्ठाभ्यां नम: ।
क्रीं ह्लीं महाकृत्ये तर्जनीभ्यां नम: ।
क्रूं ह्लूं विधू माग्नि सम प्रभे मध्यमाभ्यां नम: ।
क्रैं ह्लैं देवि देवि अनामिकाभ्यां नम: ।
क्रौं ह्लौं महादेवी कनिष्ठिकाभ्यां नम: ।

क्र: ह्ल: विनाशाय करतल कर पृष्ठाभ्यां नम: ।

षडंगन्यास:—क्रां ह्लां खट् फट् जहि हृदयाय नम: ।

क्रीं ह्लीं महा कृत्ये शिरसे नम: ।

क्रूं ह्लूं विधूमाग्निसमप्रभे शिखायै नम: ।

क्रैं ह्लैं देवि देवि कवचाय नम: ।

क्रौं ह्लौं महादेवि नेत्रत्रयाय नम: ।

क्र: ह्ल: विनाशाय अस्त्राय नम: ।

ध्यानम्—सिंही सिंहमुखीं सुखीं भगवत: प्रोत्फुल्ल नेत्रोज्ज्वलां शूल स्थूल कपाल पाश डमरु व्यग्रोग्र हस्ताम्वुजाम् । दंष्ट्रा कोटि विशं कटास्य कुहरामा रक्त नेत्र त्रयीं । वालेन्दूज्ज्वल मौलिकां भगवतीं प्रत्यंगिरां भावयेत् ।

लं पृथिव्यात्मिकायै गन्धं लेपयामि ।

हं आकाशात्मिकायै पुष्पं निवेदयामि ।

यं रं लं वं अथ मुद्रा ।

कपाल शूल गदापाश अंकुश धेनु निर्याण मुद्रा: प्रदर्श्य ।

अथ मनु:—अस्य श्री अथर्वण भद्रकाली महामन्त्रस्य अंगिरा ऋषि: अनुष्टुप छन्द: अथर्वण भद्रकाली देवता क्षं वीजं हुं शक्ति, फट् कीलकं अथर्वण भद्रकालिप्रसाद सिध्यर्थे जपे विनियोग: ।

क्षां अंगुष्ठाभ्यां नम: । क्षीं तर्जनी० । क्षुं मध्य० । क्षैं अनामिकाभ्यां० । क्षौं कनि० । क्ष: करतल० । क्षां हृद० । क्षीं शि० स्वाहा । क्षुं शिखा० । क्षैं कव० । क्षौं नेत्र० । क्ष: अस्त्रयफट् ।

ध्यानम्—ओं ध्यायेत्समस्त शत्रुघ्नीं सर्व सौख्य जयावहांम्
कालीं कराल वदनां कालजीमूत संनिभाम् ।
भीम दंष्ट्रां ज्वलन्नेत्र त्रय ज्वाला शिखोज्ज्वलाम् ।
अष्ट नाग कृता कल्पामष्टदिक् पूर्ण विग्रहाम् ।
सहस्र भुज दण्डोद्यत् सहस्रायुध शोभितां
विभ्रतीं किंकिणी मालामापादतल लंविनीं ।
पर प्रयुक्त कर्मघ्नीं पर राष्ट्र प्रदायिनीं ।

समस्त शत्रु रुधिरयन्म भर्ता परां शिवाम् ।
एवं ध्यायेन्महाकृत्यां जपेन्मंत्रान् यथाविधि: ।
लमित्यादि पंच पूजां कृत्वा धेनु मुद्रां प्रदर्श्य ।
गायत्री मंत्रमुच्चार्य ।

मन्त्र—भक्षं भक्ष ज्वाला जिह्वे करालदंष्ट्रे प्रत्यंगिरे क्षं ह्रीं हुं फट् । इति विंशत्यक्षरो मंत्र: ।। चतु:षष्टि सहस्रसंख्या जपं कृत्वा दशांश जप होम:, तद्दशांश तर्पणम्, तद्दशांशमार्जनम् । ब्राह्मण भोजनं-पश्चात् प्रयोगविधि: ।

भद्रकाली मंत्र—जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेद: । स न: पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि: ।

यथा शक्ति: जपित्वा, जपान्ते गायत्री मूलं जातवेदसे इत्यग्नि इत्येकवारं जपित्वा अंगुष्ठादि पंच पूजांन्तं विधाय । निर्याण मुद्रां प्रदर्श्य ।

तंच्छं यो, रावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्ति रस्तु न: स्वस्ति र्मानुषेभ्य: ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे ।

उत्तु दिशि मिजावरि तल्ये जेत्तल्प उतु गिरिरनुप्रवेशाय । मरीचि रूपसन्तुद यावदित: पुरस्तादुदयाति सूर्य: तावदितो मुन्नाशय योऽस्मान् द्वेष्टि यं च वयं द्विष्म: । ओं शान्ति: शान्ति: शान्ति: ।

स्तोत्रम्

यां कल्पयन्ति नोऽरय: क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणा परि निङ्म: प्रत्यक्कर्तारमृच्छतु ।।1।।
शीर्षण्वतीं कर्णवतीं विश्वरूपां भयंकरीम् ।
य: प्रहिणोमि ह्यद्य त्वा वि तत्त्वं योजयाशुभि: ।।2।
येन चितेन वदसि प्रतिकूल मघायूनि ।
तमेवं ते नि कृत्ये ह मास्माँ ऋषयो अनागस: ।।3।।
अभिवर्तस्व कर्तारं निरस्तास्माभि-रोजसा ।
आयुरस्य निवर्तस्व प्रजां च पुरुषादिनि ।।4।।
यस्त्वा कृत्ये चकारेह तं त्वं गच्छ पुनर्नवे ।

अरातीः कृत्यां नाशय सर्वाश्च यातुधान्यः ॥5॥
क्षिप्रं कृत्ये निवर्तस्व कर्तु रेव गृहान् प्रति ।
पशूंश्चावास्य नाशय वीरांश्चास्य नि वर्हय ॥6॥
यस्त्वा कृत्ये प्रजिगाति विद्वां अविदुषो गृहांन् ।
तस्यै वेत परेत्याशु तनुं कृधि परुष्यसः ॥7॥
प्रतीचीं त्वाप सेधतु ब्रह्म रोचिष्णव मित्रहा ।
अग्निश्च कृत्ये रक्षोहा रि प्रहा चाज एकपात् ॥8॥
यथा त्वाङ्गिरसः पूर्वे भृगवश्चाप सेधिरे ।
अत्रयश्च वसिष्ठाश्च तथैव त्वाप सेधिम ॥9॥
यस्ते परुंषि संदधौ रथस्येव ऋभुर्धिया ।
तं गृच्छ तत्र ते जनमज्ञातस्तेऽयं जनः ॥10॥
यो नः कश्चिद्रणस्थो वा कश्चिद्वान्यो ऽभिहिंसति ।
तस्य त्वं द्रोरिवेद्धो ऽग्निस्तनुः पृच्छस्व हेतितः ॥11॥
भवा शर्वा देव हेलिमस्य ते पाप कृत्वने ।
हरस्वतीस्त्वं त्र कृत्ये नोच्छिषस्तस्य किंचन ॥12॥
ये नो शिवासः पन्थानः परायान्ति परावतम् ।
तै र्देव्यरातीः कृत्या नो गमयस्वा नि वर्तय ॥13॥
यो नः कश्चिद् द्रुहो ऽरातिर्मनसाप्यभि दासति ।
दूरस्थो वान्तिकस्थो वा तस्य हृद्य मसृक् पिव ॥14॥
येनासि कृत्ये प्रहिता दृढयेनास्मज्जिघांसया ।
तस्य व्यनच्चाव्य नच्च हिनस्तु शरदाशनि ॥15॥
यद्यु वैषि द्विपद्यस्मान् यदि वैषि चतुष्पदी ।
निरस्तातो ऽव्रतास्माभिः कर्तु रष्टापदी गृहम् ॥16॥
यो नः शपादशपतो यश्च नः शपतः शपात् ।
वृक्ष इव विद्युता हत आ मूलादनु शुष्यतु ॥17॥
यं द्विष्मो यश्च नो द्वेष्ट्यघायु र्यश्च न शपात् ।
शुने पेष्ट्र मिवाव क्षामं तं प्रत्यस्यामि मृत्यवे ॥18॥

यश्च सापत्नः शपथो यश्च जाम्या शपथः ।
ब्रह्मा च यत्क्रुद्धः शपात् सर्वं तत् कृध्यधस्पदम् ॥19॥
सबन्धुश्चास बन्धुश्च यो अस्मां अभि दासति ।
तस्य त्वं भिन्ध्यधिष्ठाय पदा विष्पूर्यते शिरः ॥20॥
अभि प्रेहि सहस्राक्षं युक्त्वाशु शपथ रथम् ।
शत्रूंरन्विच्छती कृत्ये वृकी वा विवृतो गृहान् ॥21॥
परिणो वृङ्धि शपथान् दहन्नाग्निरिव व्रजम् ।
शत्रूं रेवा वि नो जहि दिव्या वृक्षमिवाशनिः ॥22॥
शत्रून्मे प्रोष्ट शपथान् कृत्याश्च सुहृदो हृद्याः ।
जिह्वाः श्लक्ष्णाश्च दुर्हृदः समिद्धं जातवेदसम् ॥23॥
असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि ।
अभयं सततं पश्चाद् भद्रमुत्तरतो गृहे ॥24॥
परेहि कृत्ये मा तिष्ठ वृद्धस्येव पदं नय ।
मृगस्य हि मृगारिस्त्वं तं त्वं निकर्तुमर्हसि ॥25॥
अघ्नास्ये घोर रूपे वर रूपे विनाशनि ।
जम्भिताः प्रत्या गृभ्नीष्व स्वयमादार्याद्भुतम् ॥26॥
त्वामिन्द्रो यमो वरुण स्त्वमापो अग्निरथानिलः ।
ब्रह्मा चैव रुद्रश्च त्वष्टा चैव प्रजापतिः ॥27॥
आवर्तध्वं निर्वतध्वमृतवः परिवत्सराः ।
अहो रात्राश्चाब्दाश्च त्वं दिशः प्रदिशश्च मे ॥28॥
त्वमिन्द्रो यमो वरुणस्त्वमापो अग्नि रथानिलः ।
अत्याहृत्य पशून् देवानुत्पादयस्वाद्भुतम् ॥29॥
अभ्यक्तास्ताः स्वलंकृताः सर्वं नो दुरितं जहि ।
जानीयाश्चैव कृत्यानां कर्तॄन्मॄन् पाप चेतसः ॥30॥
यथा हन्ति पूर्वासिनं तथैवेष्वाशु कृज्जनः ।
तथा त्वया युजा वयं तस्य निकृण्म स्थास्नु जङ्गमम् ॥31॥
उत्तिष्ठैव परेहितोऽघ्नास्ये किमिहेच्छसि ।
ग्रीवास्ते कृत्ये पदा चापि कर्त्स्यामि निर्द्रव ॥32॥

स्वायसा सन्ति नो सयो विघ्नश्चैव परूंषि ते ।
तैः स्थ निकृण्म स्थान्यग्रे यदि नो जीवयस्व ईम् ॥33॥
मास्योच्छिषो द्विपदं मो च किंचिच्चतुष्पदम् ।
मा ज्ञाती रनु जास्वन्वा मा वेशं प्रति वेशिना ॥34॥
शत्रूयता प्रहितामिमां येनाभि यथायथा ।
ततस्तथा त्वा नुदतु योऽयमन्तर्मपि श्रितः ॥35॥
एवं त्वं निकृतास्माभि र्ब्रह्मणा देवि सर्वशः ।
यथा तमाश्रितं कर्त्वा पापधीरेव नो जहि ॥36॥
यो नः स्वो अरणो यश्च निष्टयो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥37॥
यथा विद्युद्धतो वृक्ष आ मूलादनु शुष्यति ।
एवं स प्रति शुष्यतु यो मे पापं चिकीर्षति ॥38॥
यथा प्रतिहता भूत्वा तामेव प्रतिधावति ।
पापं तमेव धावतु यो मे पापं चिकीर्षति ॥39॥
कुवीरं ते सुखं रुद्रं नन्दीमानं विमथ ह ।
ज्वरं मृत्युं भयं घोरे विषं नाशय मे ऽजर ।
ब्रह्म वर्मं ममान्तर शर्म वर्म ममान्तरं धर्म वर्म ममान्तरम् ॥40॥
उत्त्वा मन्दन्तु स्तोमा कृणुष्व राधो अद्रिवः ।
अव ब्रह्म द्विषो जहि ॥41॥
ये मे दमे दारुगर्भे शयानं धिया सहितं पुरुषं नि जह्नुः ।
कुम्भीपाकं नरकं ग्रीवबद्धं हता एवं पुरुषासो यमस्य ॥42॥
यो मे करोति प्रद्वारे यो गृहे यो निवेशने ।
यो मे केशनखे कुर्यादञ्जने दन्तधावने ॥43॥
प्रतिसर प्रतिधाव कुमारीव पितु र्गृहान् ।
मूर्धानि मेषां स्फोटय पदमेषां कुले कृधि ॥44॥
ये नो रयिं दुश्चरितासो अग्ने जह्नुः मर्तासो अनृतं वदन्तः ।
तेषां वपूंष्यर्चिषा जातवेदः शुष्कं न वृक्षमभि संदहस्व ॥56॥
कृष्ण वर्णे महद्रूपे बृहत्कर्णे महद्भये ।
देवि देवि महादेवि मम शत्रून् विनाशय ॥46॥

खट् फट जहि महाकृत्ये विधूमाग्नि समप्रभे ।
जहि शत्रूंस्त्रि शूलेन क्रुध्यस्व पिव शोणितम् ॥47॥
ये द्रुह्यु: ऋजवे मह्यमग्ने कदाधियो दुर्मदा अश्मनास: ।
आवध्यैतान् शोचिषा विध्य तन्तून वैवस्वतस्य सदनं नयस्व ॥48॥


मूलाधार चक्रे वर्तमानाय सांगांय सपरिवाराय सायुधाय सालंकाराय, सवाहनाय-ऋद्धिसिद्धि सहिताय गणाधिपतये अजपा जपानां षट्शतं नम: ।

अ अ:	कठ	उफ	बल	वस
विशुद्धि चक्र	अनाहत	मणिपूरक	स्वाधिष्ठान	मूलाधार गणेश
	6000	6000	वाणीहिरण्यगर्भ	600
1000			6000	
जीवात्मा	उमामहेश्वर	लक्ष्मीनारायण		

1000 परमात्मा सहस्रारचक्रे तेजोमयायगुर्वे परमशिवरूपिणे
हं-सं: द्विदले आज्ञाचक्रे 1000
नादात्मनेपरमात्मने

त्रैलोक्य चैतन्यमयाधि देवि प्रत्यांगिरे त्वच्चरणाज्ञयैव ।
प्रात: समुत्थाय तवप्रियार्थं संसारयात्रामन्वर्तयिष्ये ॥
संसारयात्रामन्वर्तमानं प्रत्यंगिरे श्री परमेशि देवि ।
स्पर्धा तिरस्कार कलिप्रमाद भयानि मां नाभिभवन्तु मात: ॥

———



पन्द्रियायन्त्र

ह्लीं ८	ह्लीं १	ह्लीं ६	श्रीं
ह्लीं ३	ह्लीं ५	ह्लीं ७	श्रीं
ह्लीं ४	ह्लीं ९	ह्लीं २	श्रीं